X

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.

Coll. No. 35

TIRTHADHARMAPRAKARANA
From: SAMAYA PRAGHATTAKA
Title

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 35 Subject: Dharmaśāstra

Title: Tīrtha Dharma Prakarana

Author: Nārāyaṇa Bhatta Scribe:

Date of the work: Date of the Ms.: VS. 1745.

Place of the work: Place of the Ms.: Kāśī kṣetra.

Size: 10.4" x 4.8" Extent: 64 Folios.

Language: Sanskrit. Script: Devanāgarī

Remarks: Complete. The work is a part of bigger work named Trimali Setu.

१. से. प्र.
१

॥ ॥ श्रीगणेशाय नमः ॥ मातापितृभ्यां नमः ॥ सरस्वतीं नमस्यामः प्रसन्नहृद्भूहृद्गतां पापरेकनाशनविज्ञानां चित्रसंविन्निरूत्तमाम् ॥ १ ॥
विघ्नाधिपत्यमस्मत्संविघ्नसंघविघातनम् । प्रणमेऽरवपात्युद्धं बुद्धिमुद्दिविधायकम् ॥ २ ॥ उन्निद्रपद्मजातपत्रसगोत्रनेत्रं स्तुमो तुलि
चर्मं तिचित्रचरित्रपात्रम् । उन्नीलनीलमणिवर्णसवर्णगात्रं रामं जनेक्षु लपतिं कमलाकलत्रम् ॥ ३ ॥ विश्वामित्रकुलोदधौ विधुरि
वास्तवः कलानां निधिर्वागुंफे निखिले पियूषवसुधाशिष्यप्रशिष्यैः श्रितः । विद्यापद्मविकासने कतरणिः श्रीमद्गोविंदराजः
संख्यावद्गणनाग्रणीर्विजयते श्रीमद्रामेश्वरः ॥ ४ ॥ श्रिता वाराणसी येन नगरी नगरीयसी । यतोन्या नगरी हेमनगरीतिमुक्ते
मुक्ती ॥ ५ ॥ शास्त्रविपश्चीतीपितुरेनयः श्रुतीः स्मृतीः समालोच्य वेदशरीरीनीः नारायणारान्नत्रयोऽविमुक्ते तीर्थत्रयी सेतुमसेति
धत्ते । रामग्रंथेस्मिन्नुरागगरावत्तमुत्थाने वैरस्वं ग्रथ्यं पुराणगुणं वंतमारकोना तत्र्यतः शिरसि कृतांजलिरुक्तपो वेशोध्यंत तत्सद
सद्दिहोच्यते मयायतः ॥ ७ ॥ खलानां प्रार्थने वैहखललताखलताकवः । भवतां भूषणो यत्कृतहृदयो मास्तु मानसे ॥ ८ ॥ साधार
णास्तीर्थविधिः प्रपत्यंससम्युच्यते । प्रयागादित्रयविधिः पश्चादिति सत्संग्रहः ॥ ९ ॥ इह खलु संसारचक्रे परिवर्तमानानां चत्वारः
पुरुषार्थाः धर्मार्थकाममोक्षाख्याः सकलस्मृतीतिहासपुराणेषु प्रपंचेन सव्याख्याता यावभारते भीमसेनवचो युधिष्ठिरं प्रति राम.
धर्मं चार्थं च कामं च यथावद्वदतां वर । विभज्य काले कालज्ञः सेवेत इति पंडितः ॥ मोक्षो वा परमं श्रेयः एष राजन्सुखार्थिनामिति ॥ १

तस्य सुखदुःखयोरेव निरूपणीयत्वात् विषयत्वात्तु सम्बंधो गम्यमानेन तस्य सुखं पुरुषार्थस्तत्साधनत्वात्तु गौणः । एवं च सति धर्मार्थयोरपि
पायो दुःखदुःखाभावसाधनत्वादौपचारिकी पुरुषार्थता । एतद्वत्प्रवृत्तिनिवृत्त्यात्मकतया द्विविधस्यापि धर्मस्य पुरुषा
र्थसाधनत्वेनोक्तार्थः । प्रवृत्तिसंज्ञिके धर्मे फलमभ्युदयो मतः । निवृत्तिसंज्ञिके धर्मे फलं निःश्रेयसं स्मृतम् इति । स्कांदेपि । धर्मा
त्सुखं च कामं च यस्माद्दुःसय मात्रुपाशंज स्मात्तद्वं परित्यज्य द्विदा धर्मं समाचरेत् । लोकद्वयेपि यत्सौख्यं तद्धर्मात्प्राप्यते परं
धर्ममेव मतः कुर्यात् सर्वकामार्थसिद्धये । भारते । धर्म एव प्लवो नान्यः स्वर्गं द्रौपदि गच्छताम् इत्यादि । दुःखाभावसाधनतामपि ध
र्मस्य धर्मेण पापमपनुदतीति श्रुतिः दुःखसाधनपापापनोदद्वारा इह । स्कांदे । दीर्घकालेन तपसा सेवितेन तपोधनो धर्मनि
र्धूतपापात्मा सेविस्यंति मनोरथाः । मनुः । धर्मशादिसहायेन तमस्तरति दुस्तरं । धर्मप्रधानं पुरुषं तपसा हतकिल्बिषं
परलोकं नयत्याशु भास्वंतं खशरीरिणम् । प्रायश्चित्तादिधर्मस्य च दुरितक्षयद्वारा दुःखाभावसाधनतानुभवसिद्धा । तथा
कामस्य सिद्धा । उक्तादि विरक्तिरागानंतो प्रस्तुर्येत्रमाद्वाः सहदेवसर्वेषां हिरण्यदाश्मस्त्वंचभं तेवासो रुःसोमव्रतिरंतत्राप्तु
रितिमेत्रवर्णात् । सुघः स्पुरुद्यतिस्मृते प्रतुलादिदानप्रतिपादकवचनात्प्राप्तपमानां भावं भजते । तेन सिद्धा धर्मार्थयोर
पि श्रेयोपचारिकी पुरुषार्थता । कामस्तु सुखरूपत्वान्मुख्य एव पुरुषार्थः सुखरूपता च सारेऽस्मारस्यैकेपर्वणि ॥ यतो
रू

त्रि.से.श्र. २

व्यार्थस्पर्शसंयोगेया प्रीतिरुपजायते। सकामस्मितसंकल्पः शरीरं तस्य दृश्यत इति। तथा च अर्थार्थी पुरुषो राजवद्दंतं धर्म
मिच्छति। अर्थमिच्छति कामार्थी न कामादन्यमिच्छति। न हि कामेन कामोऽन्यसाध्यते। फलमेव तदिति। इंद्रियाणां च पंचानां म
नसो हृदयस्य च। विषये वर्तमानानां या प्रीतिरुपजायते। फलमेव तदिति। इंद्रियाणां च पंचानां मनसो हृदयस्य च। वि
षये वर्तमानानां या प्रीतिरुपजायते। स काम इति मे बुद्धिः कर्मणां फलमुत्तममिति वचनात्। इह मुख्यप्रीतिः प्रसादो हर्ष इत्यादि
कोपपत्तिपादितसुखपर्यायप्रीतिशब्देनाभिधानात्फलांतराभावाभिधानात्फलरूपताभिधानाच्च कामस्य सुखरूपता। अत
एव स्मृत्यधिकरणवाचावर्त्तिके पावद्धर्ममोक्षसंबंधि नदेदप्रभृत्यं यत्तथ्यसुखविषयं तल्लोकव्यवहारः स्वर्वकमिति सुखरा
वेनैव कामं व्याख्यातः। अर्थवादादिकरणोऽपि धर्मार्थकाममोक्षाः धर्मानर्थदुःखसंसारसाध्यसाधनस्य निपत्तिरूपादानपरि
त्यागाय कृताः फलमित्यत्र कामप्रतियोगित्वेन दुःखं वदनेवार्त्तिककारस्य सुखमेव कामपुरुषार्थः संमतः। यत्रभागे नैका
मस्य नेंद्रियप्रीतिलाभो जीवनेन तत्र यावनेति। कास्यापीक्ष्यप्रीत्यारव्ये सुखफलसाधनत्वमंगीकृत्य तन्निराकरणं। पत्रा
न्यत्र दर्शितद्वैविध्यतः कामः कामात्मीतिस्तुत्ते मे निप्रीतिसाधनताभिधानेन द्विषयोपभोगे कामास्य सुखसाधनत्वाभेसा
कामत्वमंगीकृत्य व्याख्येयं। यद्वा तत्रापि कामशब्दः सुखपर एव। इंद्रियप्रीतिशब्द एवं लिंद्रियजन्मतिपरः सुखपर्यायाः प्री रा.म. २

रिंद्रियपदमेत्वाभावात्। तत्सिद्धमेतत्। कामस्य सुखरूपत्वान्मुख्यपुरुषार्थत्वमिति। मोक्षोऽपि मनसे दुःखसुखदुःखाभावान्मा
ररूपइति। तस्यापि मुख्यमेव पुरुषार्थत्वाच्चतुर्णां तु साधारणः पुरुषार्थत्वव्यवहारस्तत्र क्वचित्सुखाय केचिद्विशदवा
प्यस्पृष्टिप्राराभदप्राराभतं सुखायपोः सत्प्रिप्रारा। स्वतद्योववार्तिकः। तदेतेषु चतुर्षु पुरुषार्थेषु मध्ये धर्मो मुख्यः
पुरुषार्थांतरहेतुत्वाद्विधादेतुत्वाच्च। तदुक्तं कौर्मे। धर्मात्संजायते ह्यर्थो धर्मात्कामोऽभिजायते। धर्म एव परं ब्रह्म तस्माद्धर्मं
समाचरेदिति परं ब्रह्म मोक्षः। तथा। ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे। धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते।
तथा। निवृत्तिसंज्ञके धर्मे फलं निःश्रेयसं ततं। भारते। विद्या वित्तं वपुः शौर्यं कुले जन्म निरोगता। संसारोच्छित्तिहेतुश्च धर्मादेव प्र
वर्तते। स्कांदे। धर्मादुत्पद्यते सौख्यमधर्माद्दुःखसंभवः। तस्माद्धर्मं सुखार्थाय कुर्यात्पापं विवर्जयेत्। याज्ञवल्क्यः। क
र्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत्। मनुः। धर्म एव हतो हंति धर्मो रक्षति रक्षितः। तस्माद्धर्मो न हंतव्यो मा नो धर्मो हतो
वधीदित्यादि। नन्वर्थस्यापि धर्मकारणत्वानुभवात्कथं धर्मस्यैव प्राधान्यमिति चेन्न तदुक्तं भारते। सर्वथा धर्ममूलोऽर्थो धर्मस्यार्थ
परिग्रहः। तथा। धर्ममूलं जगद्राजन् नान्यद्धर्माद्विशिष्यते। धर्ममर्थं च कामं च महतश्चौरालं त्रिवर्गविस्तु। भागवते। धनं च धर्मैकफ
लमिति मेवं। कस्यचिद्यागदानादिधर्मस्यार्थेनाजार्थलेशस्य साध्यत्वेऽशस्याप्यनुदयात्। एवं धर्मस्य प्राधान्यात्साध्यत्वेऽपि सर्वस्या

त्रि.से.१ र्थसाध्यत्वात्स्वात्। अर्थमन्तरापि जपतीर्थयात्रोपवासादिभ्यो धर्मोदयात्। धर्मं विना चार्थलेशस्याप्यनुदयात्। एवं धर्मस्य चार्थो
३ स एव मुख्यत्वेनानुष्ठेयः। तदुक्तं मार्कण्डेये। धर्मप्रवर्धनं मध्ये जयमेधं मर्माव्यवरेत्। तथापि पानदानादिरूपस्य बहुसाध्यत्वात् बहुक
लायपत्वाच्चेदानीन्तनैः साङ्गस्य संपादितुमशक्यः स्वल्पतीकसाध्यत्वात् ऋत्विगादिसहायसंपाद्यत्वात् फलवर्णोत्कर्षाच्च
नधिकारित्वाच्च। तत्रापि हरिपातीर्थयात्राधर्मो लिस्तु गमः। सर्वहेतुर्वेलरूपत्वात्। तदुक्तं भारते मात्स्ययोः। ऋषिभिः क्रतवः प्रोक्ता वेदेष्व
पि यथाक्रमं। फलं चैव यथातत्त्वं प्रेत्य चेह च सर्वशः। न ते शक्या दरिद्रेण यज्ञाः प्राप्तुं महीपते। बहूपकरणा यज्ञा नानासंभारविस्तराः।
प्राप्यन्ते पार्थिवैरेते समृद्धैर्वा नरैः क्वचित्। नार्थन्यूनैर्नावगणैरेकात्मभिरसंहतैः। यो दरिद्रैरपि विधिः शक्यः प्राप्तुं नरेश्वर। तुल्यो य
ज्ञफलैः पुण्यैस्तं निबोध महीपते। ऋषीणां परमं गुह्यमिदं भरतसत्तम। तीर्थाभिगमनं पुण्यं यज्ञैरपि विशिष्यते। इति। अवग
णैः सहायरहितैः। एकात्मभिरपत्नीकैः। असंहतैः ऋत्विगादिसंघातशून्यैः। स्वल्पसंकीर्णद्रव्यजनैरप्यधिकारोऽस्तीति अधि
कारिनिरूपणे निरूपयिष्यते। ननु जपोपवासादिधर्मोऽपि निरपेक्षोऽपि यत एवेति कथं तीर्थयात्राया एवातिशयः सङ्गच्छते। तथा
पि तस्य स्वशरीरायासं तु साधर्म्योऽपि निरपेक्षोऽपि यत एवेति कथं तीर्थयात्राया एवातिशयः सङ्गच्छते। तथापि तस्य स्वस्य सा
शरीरायाससमसाध्यत्वाद्दिष्टमपि त्वरोगादियत्नैर्मात्रानुष्ठातुमशक्तेः सकलानधिकारित्वाच्च। तद्धि लहरणास्या तीर्थयात्रैव श्रेय राम ३

सी। परत्रेह च सुखं दोषादिलिङ्गाद्यायमर्थोऽध्यवसेयः॥ ॥ इति श्रीमद्भट्टरामेश्वरसूरिसूनुनारायणभट्टविरचिते त्रिस्थलीसेतौ ती
र्थयात्रानिरूपणं॥ ॥ अथ सामान्यतस्तीर्थप्रशंसा॥ ॥ शरवः। सर्वतीर्थानि पुण्यानि पापघ्नानि सदा नृणां। परस्परापेक्षया
णि कथितानि मनीषिभिः। परस्परेति। प्रत्येकमेव पापघ्नानि तानि सर्वाणि। तथा। सर्वे प्रस्रवणाः पुण्याः सर्वे पुण्याः शिलोच्चयाः। नद्यः स
र्वाः स्वतः पुण्या जाह्नवी तु विशेषतः। गारुडे। पुष्करं द्वारकादिसंल्लग्नतीर्थं प्रजगतो नरः। ब्रह्मलोकादिवह्नालस्य तुष्टिं पुष्टिं ददेद्धि। भार
ते। तथा पुराणि तीर्थानि पुण्यान्यायतनानि च। उपस्पृश्य पुराण्यलसाद्यात्तमवमपरलोकभाक्। तथा। कीर्तनाच्चैव तीर्थस्य स्नानात्
पि तत्रपरात्। पुनन्ति पापं तीर्थे ये ते प्रयान्ति परं सुरतं लोके मेनतीर्थानि प्रकृष्टा। तत्र स्नानं जपो होमः श्राद्धदानादिकं कृतं। एकैकशो मु
निः श्रेष्ठाः पुनात्या सप्तमं कुलं। भारते मात्स्ययोः। ऋषिभिः क्रतवः प्रोक्ता इत्यादि यज्ञैरपि विशिष्यत इत्यन्तमुक्तं। अनुपोष्य त्रि
रात्राणि तीर्थान्यनभिगम्य च। अदत्वा काञ्चनं गाश्च दरिद्रो नाम जायते। अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः। न तत्फलम
वाप्नोति तीर्थाभिगमनेन यदिति। अनुपोष्य त्रिरात्राणि इति त्रिरात्रोपवासादीनां च तीर्थप्रसङ्गे केदारिस्याभावः फलमित्यर्थः। तथा। यानि
रम्याणि तीर्थानि पुण्यानि विषमाणि च। मनसा तानि गच्छेत सर्वतीर्थसमीहया। एतानि वसुभिः साध्यैरादित्यैर्मरुदश्विभिः।
ऋषिभिर्देवकल्पैश्च श्रितानि सुकृतैषिभिः। तथा। इयं राजर्षिसिंही तावत्पुण्यश्रुतिपूर्णमिति मन्वादिभिर्महाराज तीर्थयात्रा महा

फलात्तथा। अज्ञानेनापि यस्येह तीर्थयात्रादिकं भवेत्। सर्वकामसमृद्धस्य स्वर्गलोके महीयते। स्थानं च लभते नित्यं धनधान्य
समाकुलं। एवं स ज्ञानसंपन्नः सदा भवति धर्मवान्। तारिताः पितरस्तेन नरकात्प्रपितामहाः। इति। अज्ञानेनेत्यत्र श्रेदमनुष्ठेयं मेने
नेदं फलमाप्नुत इत्येवाज्ञानाभावेपि कालादेरित्यर्थः। वायुपुराणे। तीर्थान्यनुसरन्धीरः श्रद्दधानः समाहितः। कृतपापो वि
शुद्ध्येत किं पुनः शुद्धकर्मकृत्। तिर्यग्योनिं न गच्छेत्तु कुदेशे नैव जायते। स्वर्गे वसति वै विप्रो मोक्षमार्गं च विंदति इत्युक्तं सकलती
र्थमहिमत्वात्तीर्थानां। अथ तीर्थस्वरूपं। गारुडे। रजस्तमोविरहिते स्वपसापहत किल्बिषैः। यस्यासितमहीरित्तद्विजातीर्थं प्रव
क्षते। भारते। परिग्रहाद्धि साधूनां पृथिव्याश्चैव तेजसा। अतीव पुण्यभागास्ते सलिलस्य च तेजसा। तेजसा प्रभावेण। तद्विविधं तदु
क्तं भारते। लोकेस्मिन्द्विविधं तीर्थं स्वयंदेवविनिर्मितं। स्वयंभूतं प्रभावाच्च निर्मितं देवनिर्मितं। पुनश्चतुर्विधं तदुक्तं ब्रह्मपुराणे। नार
द उवाच। कियंति तानि तीर्थानि किं फलानि सुरेश्वर। सर्वेषामेव तीर्थानां सर्वदा किं विशिष्यते। ब्रह्मोवाच। चतुर्विधानि तीर्थानि
स्वर्गे मर्त्ये रसातले। दैवानि मुनिशार्दूल आसुराण्यार्षकाणि च। मानुषाणि च लोके पुविख्यातानि सुरादिभिः। ब्रह्मविष्णुशिवैर्दे
वैर्निर्मितं दैवमुच्यते। त्रिभ्योप्येकं जायते तत्तस्मात्ततः परं विदुः। यथा पुष्करादीनि विश्योज्ज्वलतादनिष्ठिताभिन यागोदावरीसी
मरथ्यां गंभगन्नाच्चैरिका। तापी पयोष्णी विंध्यस्य दक्षिणे तु प्रकीर्तिता भागीरथी नर्मदा च यमुना च सरस्वती। विशोका च वित राम.

त्ताश्च हिमवत्पार्श्वे तान्याश्रिताः। एता नद्यः पुण्यतमा देवतीर्थान्युदाहृतानि तथा। केनापि न कृतं यत्र देवखातमिति स्मृतमिति। गयको
लासुरगयासुरप्रतिष्ठितान्यासुराणि। वसिष्ठादिऋषिप्रतिष्ठितान्यार्षाणि। मांधात्रंबरीषहरिश्चंद्रादिप्रतिष्ठितानि मानुषा
णि। भागीरथ्यादीनां सत्यपि देवत्वे विरूढादिदेवतामूर्त्तित्वादतिवैशिष्ट्यं। तदुक्तं स्कांदे रेवाखंडे। ब्राह्मी सरस्वती मूर्त्तिर्गंगामूर्त्ति
स्तु वैष्णवी। नर्मदा शांकरी मूर्त्तिरिति स्त्रीनद्यस्त्रिदेवताः। तत्रापि गंगा। गंगेयं सरितां श्रेष्ठा सर्वकामप्रदायिनी। त्रिदेवत्या मुनिः श्रे
ष्ठ तत्र इत्यनिमतः। त्वरितस्यादिवदनानि च यत्प्रतिपादितं त्रिदेवप्रत्वादिगुणगणावत्त्वादतिश्रेष्ठेति। गंगामहिमप्रकरणे सा ची
भविष्यति। पुनर्भौमांतरिक्षदिविलोकस्थभेदात्त्रिविधं। तदुक्तं नैमिषं भौमं पुष्करमंतरिक्षं दिविलोकस्थं। तदुक्तं भारते। पृथि
व्यां नैमिषं पुण्यमंतरिक्षे च पुष्करं। त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते। ब्राह्मे। तौ मानां मानसं तीर्थं यथा वः परिकीर्तितं।
पुष्करं चांतरिक्षस्थं मर्त्यलोकस्य दुर्लभमिति। प्रभासखंडे महादेवः। पृष्टः सुदेवि प्रवक्ष्यामि तीर्थमाहात्म्यमुत्तमं। पृथिव्यां नैमि
षं तीर्थमंतरिक्षे च पुष्करं। केदारं च प्रयागं वेत्यादि। ब्रह्मपुराणे। प्रयागं च कुरुक्षेत्रं नैमिषं पुष्करं तथा। गंगाद्वारं च कुब्जा
म्रं बदरीं सिंधुसागरमित्यादि। तीर्थोद्देशः कृतः। काशीखंडे। प्रयागं तीर्थराजं तु प्रयागाख्ये सुविस्तरमित्यादिना पश्चाधा च वेती
र्थान्युक्तानि। वाराणस्यां महादेवं प्रयाणे तु महेश्वरमित्यादिना शिवपुराणोक्तं सप्तऋषितीर्थान्युद्दिष्टानि तथा। कौर्मे दारशाखा

त्रि·से·प्र· ये तीर्थोद्देशः कृतः। तथा। काशीखंडे॥ स्त्रगुदेवि दिशा लाक्षितीर्थलिंगमुदाहृतं। जलाशयेपि तीर्थत्वं ज्ञातव्यं परिग्रहात्।
५ मन्त्रैर्योब्रह्मविराधकैः शिवविष्णुसुरादिकाः। लिंगं यो वा मितिरव्यातं पूर्वैस्तत्तीर्थमेव तत्। वाराणस्यां मध्यदेवः अपमं तीर्थमुच्य
ते इत्यादि। प्रत्यपि शोणसिंधुहिरण्याकृष्णलोहितघर्घराः। शतद्रुप्रमुखाः सप्त पावना ब्रह्मणः सुता इत्यादि॥ अथ पंचगोश्राती
र्थानि। देवाः तापसूरा विप्राज्ञौ गोर्गुरुः स्त्री तीर्थमुच्यते। निवासहोमस्नानानाचौपापेतो भेद्युवा जितं तत्। काशीखंडे। सामान्यमपि तीर्थानि
मान्युक्तानि महामते। कानि कानि च तानीह त्वेतदारव्यातुमर्हसि। कपिलउवाच। श्रृणु तीर्थानि यद्वेतो मनसा निमग्नानि च। येषु सम्यक् कृतः
स्नातः प्रयाति परमां गतिं। सत्यं तीर्थं क्षमा तीर्थं तीर्थमिंद्रियनिग्रहः। सर्वभूतदया तीर्थं तीर्थमार्जवमेव च। दानं तीर्थं दमस्तीर्थं सं
तोषस्तीर्थमुच्यते। ब्रह्मचर्यं परं तीर्थं तीर्थं च प्रियवादिता। ज्ञानं तीर्थं धृतिस्तीर्थं तपस्तीर्थमुदाहृतं। तीर्थानामपि तत्तीर्थं विशुद्धि
र्मनसः परा। न जलाप्लुतदेहस्य स्नानमित्यभिधीयते। स स्नातो यो दमः स्नातः शुद्धशुद्धमनोमलः। यो लुब्धः पिशुनः क्रूरो दांभिको
विषयात्मकः। सर्वतीर्थेष्वपि स्नातः पापो मलिन एव सः। न शरीरमलत्यागान्नरो भवति निर्मलः। मानसे तु मले त्यक्ते भवत्यंतः
सुनिर्मलः। जायंते च म्रियंते च जलेष्वेव जलौकसः। न च गच्छंति ते स्वर्गमविशुद्धमनोमलाः। विषयेष्वतिसंरागो मानसो मल
उच्यते। तेष्वेव हि विरागोस्य नैर्मल्यं समुदाहृतं। चित्तमंतर्गतं दुष्टं तीर्थस्नानान्न शुद्ध्यति। शतशोपि जलैर्धौतं सुराभांडमिवा रामः ५

शुचिः। दानमिज्या तपः शौचं तीर्थसेवाः श्रुतं तथा। सर्वाण्येतान्यतीर्थानि यदि भावो न निर्मलः। निगृहीतेंद्रियग्रामो यत्रैव वसते नरः।
तस्य तत्र कुरुक्षेत्रं नैमिषं पुष्कराणि च। ध्यानपूते ज्ञानजले रागद्वेषमलापहे। यः स्नाति मानसे तीर्थे स याति परमां गतिं। एतत्ते
कथितं देवी मानसे तीर्थलक्षणं। मात्स्ये। सत्यं तीर्थं दया तीर्थं तीर्थमिंद्रियनिग्रहः। वर्णाश्रमाणां गेहेपि तीर्थं च समुदाहृतं। व्या
सः। आत्मा नदी संयमतोयपूर्णा सत्यहृदा शीलतटा दयोर्मिः। तत्राभिषेकं कुरु पांडुपुत्र न वारिणा शुद्ध्यति चांतरात्मा। सारंगे दा
धर्मेषु ज्यगा पे विमलेषु हेतव्यो यद्गतिर्दृष्टा तथा मानसतीर्थसत्वमालंव्य शास्त्रे तं तत्पात्रत्वादिह नद्दे तु दृष्टीर्थत्वरमुच्य
ते। तथा स्नाति यो मानसे तीर्थे तत्त्वाचं तत्वदर्शिनां समारोपितशौचक्षमानिष्ठो भावसमाहितः। केवलं गुणसंपन्नः शुचिरेव नरः स
दा। सत्यादिषु सत्स्वेव तीर्थफलाधिगमात्तत्स्वशोधकत्वाच्च। सत्यादीनां गौणं तीर्थत्वमिति मंतव्यं। एवं तीर्थान्युक्तानि। काशीखं
डे। एतत्ते कथितं देवि मानसं तीर्थलक्षणं। भौमानामपि तीर्थानां पुण्यत्वे कारणं शृणु। यथा शरीरस्योद्देशाः केचित्पुण्यतमाः स्मृ
ताः। तथा पृथिव्या उद्देशाः केचित्पुण्यतमाः स्मृताः। पुण्यालिसलिला निर्वृतिभारते पाठः। प्रभावादद्भुताद्भूमेः सलिलस्य च तेज
सा। परिग्रहान्मुनीनां च तीर्थानां पुण्यता स्मृता। सति लस्य तेजसा प्रभावेण समध्यादि स्पर्शः। तस्माद्भौमेषु तीर्थेषु मानसे
षु च नित्यशः। उभयेषु च यः स्नाति स याति परमां गतिमिति। भारतेपि सीवकेशा एतत्ते कथितं राजन्निःसंदेहं न भेदतेर्मेदसर्वेषु

त्रि.से.पु.
६

नं।दानधर्मेष्वपि मनस्सम्प्रष्टपि व्याप्तपुराणतीर्थयात्रायां परे। उभयोरेव युक्तः स्नात्वा तत्सिद्धिं शीघ्रमाप्नुयात्। यथा बलं क्रियाहीनं क्रियावल
बलवर्जिता। तथैव साधयन्ते कार्यं समायुक्तावुभौ इति। एवं शरीरशोधनेन तीर्थशोधनेन चान्विता मुक्तिः सिद्धिमवाप्नोति द्विविधं शो
धमुत्तममिति॥ अथ तीर्थयात्राधिकारिणः। तत्र पापः काम्यश्च तीर्थयात्रा मुनीन्द्रैः कृताः। तत्र पुत्रकाम्यनुमोदिताम्। तां ब्रह्मचारी
विधिवत्करोति सुसंयतो गुरुरणं संत्रिपुत्र। इति ब्रह्मपुराणवचनान्नैष्ठिकस्यैव ब्रह्मचारिणोऽधिकारः। इयं चोपकुर्वाणक
स्य वेदाध्ययनाविरोधेनैव द्रष्टव्या। यात्रा च लोके न ब्रह्मचारिणामनुक्रम्य गुरुं चैवाप्युपासीनस्त्वाध्यायांश्च समाहितः इ
तिस्वाध्यायार्थं गुरुमुपासीनेति नियमनात् नैष्ठिकस्यापि गुर्वनुज्ञातस्यैवास्याधिकारः। ब्रह्मचारी गुरुणा संनियुक्तश्च विरोध
म्भवरणात्। गृहस्थस्यापि दृढं सपुत्रं विरज्य त्रयो वनं लब्ध्वा गंगादिषु पानीये नरः स्नात्वा न पश्यति हरिमहेश्वरदेवं नते वेमु
पितामरायमा इति स्मरणात्। ननु नैवं न वचसा गृहस्थस्य तीर्थयात्राविधानं तुरंगाः। तन्मतदाम्बरणात्। नचैयोवनं लब्ध्वादिलि
गान्तस्परत्वं। वचनान्तरविरोधेन ब्रह्मचर्यादिविषयत्वेनापि तदुपपत्तेः। तथा हि ब्रह्मपुराणे। यस्य स्थिपर्धर्मेष्वधिकारितास्ति वंश
हं गृहधर्माश्च सर्वे। एवं गृहस्थाश्रमसंस्थितस्य तीर्थगतिः स्वर्गगतैर्निन्दा। सर्वाणि तीर्थान्यपि चाग्निहोत्रतुल्यानि नैव चेति वयं
वदाम इति। तथा तत्रैव। यज्ञाधिकारेप्यधवा गति र्हते। विप्रकृत तीर्थानियस्मिन्नेतत्। तीर्थेषु लभ्यते फलं हि समस्तोक्तं मुनीन्द्ररमते रामः
६

स्त्रम्यावैः। कौर्मे। यः स्वधर्मान्परित्यज्य तीर्थसेवां करोति हि। न तस्य तीर्थं फलति इह लोके परत्र चेति। उच्यते। उच्यते। यस्येष्टिधर्मेष्वधि
कारिता किं गृहधर्माश्च सर्वे इति विशेषोपादानाद्यः स्वधर्मान्परित्यज्येति। उच्यते। यस्येष्टिधर्मेष्वधिकारिता किं गृहधर्माश्च सर्वे इति
[illegible] तस्य तीर्थफलमिह लोके परत्र चेति। उच्यते। यस्येष्टि [illegible] इति विशेषोपादानाद्यः स्वधर्मान्परित्यज्येति वाक्येऽपि गार्हस्थ्यानाशक
स्य परिहस्यनिरधिकारस्य च गृहस्थस्यापि तीर्थयात्रा पापविरुद्धत्वात्। अत एव भारते। अपि सिद्धः कान्तः प्रोक्ता इमनुपक्रम्य नते श
क्यादरिद्रेणाप्राप्तानि वर्जोदातृत्वानि वाक्यानुक्तानि। यद्वा। स्वामी कस्य सपत्नीकस्यैव गृहस्थस्याधिकारः। इहाग्निर्वा सपत्नीको
गच्छेत्। तीर्थानि संयतः। सर्वपापविनिर्मुक्तोऽपि यथोक्तां गतिमाप्नुयादिति कूर्मपुराणोक्तेः। प्रायश्चित्ती व्रजेत्तीर्थानि संयतः। सर्वपा
पविनिर्मुक्तो यथोक्तां गतिमाप्नुयादिति कूर्मपुराणोक्तेः। प्रायश्चित्ती व्रजेत्तीर्थं पत्नीविरहितोऽपि वा। यत्तेष्वनधिकारी वा पत्न्या
मंत्रसाधकः। सहाग्निर्वा सपत्नीको गच्छेत्तीर्थानि संयत इति स्मरणाच्च। अनएव ब्रह्मपुराणे कलौ वेचयोपाख्याने किंचित्कृत्क
लो नाम वैश्यः कृततीर्थयात्रो मयापि तरस्तारिता इति कृतार्थमात्मानं चेयन्यमन्वानः स्वगृहं प्रस्थितो मार्गे सधर्मा पितरं न पश्यत।
न तेकिंचित्तीर्थफलमस्तीति तैरुक्तेः कुतस्तीर्थफलेनज्ञानेक पथंत्र पितरस्तीर्थाद्ध इति विंतामाध्यिवान्। तमाह धर्मः। श्रोताधुरापत्
नीभार्यायोवान्यत्काप्रयाति हि। तस्य पुण्यफलं सर्वं वृथा भवति नान्यथेत्यादि। वद्ध्वा तमप्यविनापत्नसीर्थस्नानं दानं कृतं ति

हतेनदोषेणवेदव्यासत्वयाश्वंपित्रामहान्त्वयासार्धंविनाम्।ढवोरकर्मकृतंत्वयाश्रमीपितामहोम्होरायेसुंक्तंतुत्वयाविना॥भा
र्यापचतिचेद्वांतंस्वहस्तेनामृतोपमं।तस्माद्देवममाक्षंजंतिपितरोऽस्यमानसाः।तस्माद्भार्यादिनासिद्धिःपुरुषस्यनविद्यतइति
धर्मेणोक्तेकथंमेपितृमोऽत्यनेभवेदितिकृकलेनष्टेष्टेधर्मश्राद्ध(ग)वगेहंमहाभागत्वोविनादुःखभागिनी।संबोधयस्वउराग्ं
तांसुफलांधर्मचारिणीं।श्राद्धदानंगृहेगत्वातंसाहस्तेनवैकुरु।अस्मत्ताउरापानिनीयानिशृजयस्वस्वरोत्रमात्र।तीर्थयात्रा
कृतासिद्धिस्तववैवंभविष्यति।इत्येवमाधुक्तंतैनसपत्नीकस्यैवगृहिणोऽधिकारः।एतेनतिरग्निकगृहिणएवाधिकारोनतु
साग्नेरितिनिरस्तं।विधुरस्यापियज्ञाधिकारेऽप्यथवानिहतइतिब्रह्मपुराणवचनादस्त्यधिकारः।वानप्रस्थस्यापिकृष्णानित्रीण
पाकृत्वाकुर्यात्तीर्थस्यसेवनं।विधामण्टतिभार्याभ्याःउत्रेषुविनिधायचेतिकौर्मोक्तेः।पुत्रेषुविनिधायवासपत्नीकस्यवानाविप्र
स्थनापहेपुत्रेषुदारान्निक्षिप्यतत्रयावानुगतोवनं इतिमनुस्मरणात्।तत्यावात्तुगतइतिपहेतुसमार्यस्यैवयतेरप्यस्त्यधिकारः
स्तमुत्तमिस्तीर्थगतंद्विजेन्द्रैःकार्यंतपातत्फलकान्क्षिभिर्न्या।मातुःपितुःक्षेत्रमनात्तयात्रिसुतस्तकुर्यान्तदेवतुतीर्थयात्रामि
तिकाशीखंडात्।सन्यासमुपकम्यग्रामैकवासिनोनवारेतीर्थेवपंचरात्रंवसंतइतिकात्यायनेनानुज्ञानात्।हृविपस्याप्य
ग्रामैकवासिनोनवारेतीर्थेचपंचरात्रंवसंतइतिकात्यायनाधिकारः।सर्वस्तनाशेप्ययवान्तपस्तसत्राह्मणानयनप्रवक्तत्वेतिप्रस्थ राम॰ ७

पुराणे।ब्राह्मणपुरस्सरस्यवनस्थस्यापितत्रवणात्।भारतेभीष्मबलभद्रपांडवानांतीर्थयात्राप्रतिपादनाच्चतथावैश्यस्या
पिब्रह्मपुराणीयकृकलवैश्योपाख्यानात्।वक्ष्यमाणत्वाच्च।शूद्राणामपि।भारतेपुष्करप्रकरणे।ब्राह्मणाःक्षत्रियोवैश्यः
शूद्रोवाराजसत्तम।नवियोनिंव्रजत्येतेस्नातास्तीर्थेमहात्मनइतिलिंगात्।शूद्रैर्दानतवचसासाधारण्याच्चामनुमनुः।जप
स्तपस्तीर्थयात्राप्रव्रज्यामंत्रसाधनं।देवताराधनंचेतिस्त्रीशूद्रपतनानिषट्इति।तथा।विप्रसेवाशूद्रस्यविशिष्टंधर्मलक्षणं
।यदतोऽन्यद्धिकुरुतेतद्भवत्यस्यनिःफलमिति।तद्दिवसेवाविशेषेणनिरंतरंचतीर्थयात्रादिकंकार्यमित्रेवपुरांत्रएवोक्तंभार
तेऽप्युक्तंद्विजशुश्रूषाविरुद्धंधर्ममाचरन्।नरकेपच्यतेनहदेद[illegible]श्रवणकीर्तनादिति।।स्नानानयापि।निरंतरेतीर्थसेवा
संन्यासोमंत्रसाधनंदेवताराधनंध्यानंतेपंचपापवहंपरमितिस्मृतावनुलोमजोऽप्यतेपांशब्देनपराम्रष्टस्यनिरंतरेती
र्थसेवादिनिषेधति।यदतोऽन्यद्धीत्येतद्याख्यानेइतरस्वतिपेधोब्राह्मणसेवाकृतस्यैश्मुक्तेमेधातिथिना।तस्माच्छूद्रस्या
प्यातिद्विजशुश्रूषाविरोधेनतीर्थयात्राधिकारः।संकरजेष्वपिमूर्धावसिक्तादीनामनुलोमजानामस्त्यधिकारः।तेषामपि
जातित्वेनद्विजधर्माधिकारात्।प्रतिलोमजानामपिनास्ति।शूद्राणांतुसधर्माणःसर्वेपध्वंसजाःस्मृता।इतिस्मरणात्।अप
ध्वंसजानामभिचारजाःस्त्रियाश्चाप्यधिकारः।भारतेपुष्करंप्रकृत्य।जन्मप्रभृतिपत्तापंस्त्रियावापुरुषस्यवा।पुष्करेरानमात्रस्यसर्व

निवर्त्तयतीति लिंगात् । तत्र विधवायां विशेषतः स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः इति स्कांदे विधवाधर्मास्कंदे
क्तेः । तत्रापि न स्वातंत्र्येण किंतु पुत्राद्यनुमते नावाल्ये यौवने वृद्धभावे च स्वपरा पितृपतिपुत्राः । न स्वातंत्र्येण कर्त्तव्यं किंचित्का
र्यं गृहेष्वपीति मनूक्तेः । रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्द्धके । अभावे ज्ञातयस्तेषां स्वातंत्र्यं न क्वचित्स्त्रियाः इति या
ज्ञवल्क्योक्तेः । सधवा या तु भर्त्रा सहैव न पृथक् । नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं । पतिं संसेवते यातु तेन स्वर्गे महीय
ते इति मनूक्तेर्यज्ञादीनामुपलक्षणात्ता स्त्रीणां द्रव्यत्वे निषेधति पूर्वोक्तमनुवचनस्य कृत्वा ये न भर्तृशुश्रूषा त्याग इति
षयत्वाच्च । तीर्थमात्रा घस्त्रि हेतुकामस्य सर्वस्यापि मानुः पितुः हेतुमन्नास्य यासेति पूर्वोक्तवाक्याद्रक्तत्वापापस्य तु तद्गपनो
दनार्थं सर्वस्याप्यधिकारः । नत्वानापायकृतो तीर्थपापप्रशमनं भवेत् । पथ्योक्तफलदं तीर्थं भवेत्कुर्वाणनात्र नाममित्रुक्तेः । प्रा
यश्चित्तीयविबुधस्तत्पापया परोगटी । प्रकुर्यात्तीर्थसंसेवां ये चान्ये नादशाजनाजना इति कौर्म्मोक्तेश्च । प्रायश्चित्तार्थं
तीर्थयात्रायां तु पत्नीरहितस्यापि । प्रायश्चित्ती व्रजेत्तीर्थं पत्नीरहितोऽपि वेति वचनात् प्रायश्चि
त्तस्यापि तेन सह संसर्गनिषेधाच्च ॥ ॥ अथ तीर्थफलतारतम्यकारणानि ॥ ॥ शंखः । तीर्थयात्राप्रसंगेन स्नानं तीर्थे समा
चरेत् । स्नानजं फलमाप्नोति तीर्थयात्राकृतं न तु । प्रसंगेनेति । वाणिज्यराजसेवादिप्रसंगेनेत्यर्थः । अनुषंगेनेति । तीर्थे

फलं तस्य यात्राप्रसंगेन गच्छति । घोरसंसारे सलभते पदं यत्तीर्थेन गच्छतीति । तत्र प्रसंगेनोद्देश्यतीर्थप्रसंगेनेत्युद्देश्यत्वाभावः । परा
र्थेन वेतनं गृहीत्वेत्यर्थः । प्रभासखंडे तु परान्नेनेति पाठः । तत्र परान्नं भुंजानस्तत्त्वार्थः । प्रभासखंडे । यस्यान्नं तस्य का स्वेच्छया
तीर्थयात्रां नयेन्नरः । स्वकीयद्रव्ययानाभ्यां तस्य पुण्यं चतुर्गुणं ॥ विशिष्यं यनेन त्वष्टगुणं । तदुक्तं ब्रह्मवैवर्ते त्रिषष्टिरंशफलं । तेनात्र
त्वर्थी स्नातेन त्वष्टगुणफलमिति ॥ ॥ अथ यानविशेषकृतं फलतारतम्यं ॥ ॥ मात्स्ये कौर्मे मार्कंडेयः । कथयिष्यामि ते
वत्स तीर्थयात्राविधिं क्रमात् । आत्मौषिरोधविधाने नय यावद्दृष्टं यया हृदं यथाश्रुतं प्रयागतीर्थयात्रार्थी यः प्रयाति नरः क्वचि
त् । बलीवर्दसमारूढः शृणु तस्यापि यत्फलं । नरके वसते घोरे गवां क्रोधे हि दारुणे । सलिलं च न गृह्णंति पितरस्तस्य देहि
नः । तथा तत्रैव । ऐश्वर्यलोभमोहाद्वा गच्छेद्यानेन यो नरः । निष्फलं तस्य तत्तीर्थं तस्माद्यानं परित्यजेत् । तथा गोयाने गो
वधः प्रोक्तो हययाने तु निष्फलं । नरयाने तदर्द्धं स्यात्पद्भ्यां तच्चतुर्गुणं । पद्भ्यामिति केवलाभ्यामित्यर्थः । परे तेनोपानद्भ्यां गते फ
लमधिकं । तत्परिधाने तु नदो पापकिल्बिषस्य कमेवा वर्षातपे सदा छत्री दंडी राजपदवी पुष्करारी रथारूढो मोदैसान्यथा
न्तकः स व्रजेदिति विष्णुपुराणे सदापादुकला तीर्थयात्रायामपि शरीरकृपायाः अत्रावश्यकत्वात् त्रिवेधाभावान्नेति तस्र चय
ति । तीर्थानुगमनं पद्भ्यां तपः परमिहोच्यते । तदेव कृत्वा यानेन स्नानमात्रफलं भवेदिति प्रभासखंडे पादगमनमात्रयो

कृत्वा यानस्य च निषिद्धत्वात्। सोपानत्कत्वेपि पादगमनाऽकृतौ रूपानद्देपि यानत्वाभावाच्चेति कश्चित्। तन्न। द्विर्भोजनं त्वतीर्थे
शं हरेत्तीर्थफलस्य च। यानमर्द्धं तु तुर्यांशो छत्रोपानत्पदे मे च दत्त। तस्मादेतैर्विहीनस्तु सर्वं तीर्थफलं लभेदिति जाबालिवचन
विरोधात्। यानमर्द्धफलं हन्तीति दर्द्धं दूव नपादुकेनौरिणं श्रीक्तत्याभ्यामा सर्वं हन्तीं प्रतियदविरोधात्। यानप्रयुक्तफलादो चात्र
पाभ्रत्। विशेषोक्तस्तत्र वद्व्यति। किंच। यत्तु पानत्परिधानमावश्यकं तर्हि तत्त्यागेकर्थं फलाधिक्यं। अत्र तु नत्प्रसवाप
एवमदेत्। न चैवेन राजपुरोहितौ सायुज्यकामौ यजेतामिति वद्दृष्टं दैनलभ्य साहित्यविष रूपा केवलोपानत्परिधानेन च
तुर्यांशस्तु नेतिवाच्यं। वैवम्यात्। न च तत्तु पादेयकर्तृगतत्वाद्विवक्षुः इहत्वेदे स्वयगतत्वाघ स्वपुरोडाशो न्यायतदृति वत्सा
हित्यविवक्षेति तस्या उपानत्परिधानं दुष्टमेव। न तु तथापि विरोधः। पिश्यांग कृतमप्रतं तृतीयांशो सोपानत्कस्य चतुर्थांशं हन्ति।
यानांतर वतस्कृत तोपित्वं। तथा च दत्तफलं कस्य भवतीति। उच्यते। चतुर्गुणमित्यत्र गुणशब्दः केने चतुर्गुणो धर्म इ
ति वत्यादापरपर्यायचतुर्थांशपरः। तथा च पद्भ्यां गच्छतस्तत्फलं चतुर्गुणं। चतुष्प्रकरणं गतमिति त्र्यर्थः। अत्रैव तु पादगमनं प्रशं
सितं। तदुक्तं गोभिलेन तु फलार्थमित्याकुः। गोभिलः। गोभिर्युक्तेन यानेन नहीं यो यात्रां करोति सः। सपाति नरकं घोरं यावदहोरा
त्र संख्यया। एतत्सर्वं यानेन सकलमार्गं तीर्थेनैव। किंचिदूरं पादगमने तु कोशयेन नादिश्राणं पापफलं ताराणम्

न मात्स्ये। मद्दैवेर्गन्धेन विधिना गंतव्यं धर्मनिश्चये। प्रयागेयो विधिः प्रोक्तस्तन्मे ब्रूहि महामुने इति युधिष्ठिरेणाद्दिष्टे कपिलि
ष्यामीत्युपक्रम्य प्रयागतीर्थयात्रार्थी यः प्रार्थी स्यात्सदिष्मा कंठे येनाभिधानात्प्रयागप्रकरणत्वादगमाद्यानं निषेधो यानादिफल
ताभिधानेन प्रयागमात्रविषयमेव। तीर्थांतरे तु किंचित्फलस्य न्यूनतेत्कल्पनेति। वृद्धिं हर्षि यां गोभिलजाबाल्यादिवाक्या
नां सामान्यतीर्थपरत्वात्तदनुसारेण मात्स्यवाक्यानामपि प्रकरणं भित्वा प्रकृतात्प्रकृष्टपरत्वस्यौचित्यात्। अत एव तु त्वत्व
नादृत्य प्रकरणमेव बाधित्वे स्वात्। कश्चित्तु विफलं तस्य तत्तीर्थमिति सामान्योक्तेः श्रुत्या प्रकरणं बाधित्वा प्रयागतीर्थया
त्रायां तस्यापि तीर्थमात्रोपलक्षणार्थमेवमुक्तं वादेनैवेमप्रथमस्य सकलतीर्थपरत्वमात्स्यस्यापि हेतं त्रा धीत्यापायादिश्रुतिस्थिति
र्थं शाब्दरूपायाः श्रुतेः प्रकरणं दुर्गुणात्वसंभवे एकविंशत्या यन्तु वचनं इव दर्शप्रकरणमांसन आपकरणबाधेन श्रौतप्रतिष्ठा
दिफलार्थत्वावधारणमूलश्रुतलिंगादिसूत्रस्य समवायकदोषदविरोधाभावात्। अन्यथापाद्मा मेधीयशब्दादेरपि प्र
करणबाधेन सकलव्रीह्याग्नेयीपरत्वसंभवाद्वोजनार्थव्रीहिशंशोदरणादि। अत्र प्रकृते यावांश्चेत्र पावामी ये पस्यानं प्रसक्त
त्के नमी मांसकेन वारणी यस्मि समलेन्ध्यस्ता। प्रकृतमनुसरामः। अयमष्टमखंडे। कुरुक्षेत्रादितीरयागम्याभिधानितं तु। ता
न्येव ब्राह्मणो यायाद्यानेदोषानूनं पूर्वे इति तद्देशकविषय। असमर्थस्य यानेन तीर्थयात्रा समाचरेत्। तदुक्तफलमात्रेणेति

त्रि·से·प्र· १० शास्त्रार्थमाश्रवणं नितिगोभिलेन तस्य कामनाप्युक्तत्वात्। तथा क्रमेणु रागो। न स्थान च्यम्बरी इत्यादि सद्दितो रथ्यातीर्थयात्रा स
शङ्कानायानेदोषकरत्वं हि। अत्र नौकायानमपाने स्यादिति वचनान्नौकायाने। न दोष इति केचित्। तन्न। सा तस्य शरीर
व्यापारसाध्यबुद्धिपूर्वकदेशांतरप्राप्तिसाधनतया नौकाया अभिमानतत्त्वात् निषेधविषयत्वे न सर्वथा वर्जनीयत्वेन प्रस
क्तेयत्र नावा विना गमनमेव तत्र भवति। शंखोद्धारगंगासागरादौ पायनिमार्गप्रदेशे तथाप्याक्रांतेतत्र द्वातिरेकेण गमन
भवस्तत्र दोषाभावप्रतिपादकत्वेन विषयत्वाभेदश्च एगा गंगातीर्थविषयत्वेपि नावायाने दोषाभावे प्रमाणाभावात्। विषयं वे
यानत्वेन प्रमाणत्वाच्च। कश्चित्तु पशुस्त्वारणामपि गवाश्वव्यतिरिक्तानां मनुष्यादीनां गवाश्वप्रशंसार्थमपशवो वा अश्वेभ्यो अ
श्वप: पशवो गो अश्वाश्च इति वचनेनापशुत्वकथनवदत्रापि यानत्वान्तरपि नावो वाद्यादियानप्रशंसार्थमेवानत्वे कौत्रेन नि
न्दा। तन्न। पूर्वोक्तविषयलाभे संभवति अर्थवादताकल्पनस्याप्रायस्त्वात्। किंचात्र अश्वादियानप्रशंसायां तेन पातव्यमिति
वापचेत्। अश्वाद्यादे: प्रशस्तयानत्वात्तत्रैव व्यानहोतौ दोषो नाविति न कश्चिद्द:। अतोवेतति प्राय: तद्रागतमर्थवादता पू
र्वं नप्राप्तेनाप्यानांतरत: प्रयासाधिक्याभावेन नाविकस्पर्शादिदोषेणाच दोषाधिक्यस्यैवोचितत्वाच्च। नचास्ति पानौ तर
निषेधनैकवाक्यतायितार्थवादताभवेत्। अयाशक्तविषयं कुतो नभवति। नभयति। पूर्वोक्तवचनैस्तस्य प्रतियानांतराणाम राम· १०

यनिषेधादित्यैवेन तस्याविकल्पत्वात्। अत्र च पुन:स्तु वाद्यताप्रसंगाच्च। तस्माद्रमद्युक्त एवास्य विषय इति लभ्यते। सागरेतेनाप्य
रतं गाते यत्त्वंगता देशांतरं प्राप्यति तत्र नं रथ्यनौकादिनु नतप्योरिति उपानमनोचितेन गमने दोष इति महार्णवप्रका
शो। किं: परकृतो। रथ्यनौकयोरपि तत्कृतासत्वात्। जलभवादनि तृत्रियाप्येति दिक्। तस्मान्नौकायाने दोष एव। तथापि या२
क्वचेत्कदिने कर्तौ कायामेव। तस्याधानिषिद्धा नादिति। यथापि समुद्रद्वीपनिषिद्धानि महदृष्टि तेनेगंतव्यं। द्विजस्यास्तु नौया
तु: पोदितस्यापि संयदृढ्तिकलिविदृष्टपरिगणनानांत। अस्य किंचिद्गमनमात्रे पापकाम सतेत: मायश्चित्तासोधना
योगात्तत्र सक्रमदेनेकदि च गमनविषयत्वात्। येषामपि अंगवंगकलिंगादिदेशानो गमनं निषिद्धं तत्रापि तीर्थयात्रो
देशेन गमनेन निषेध:। अंगवंगकलिंगेषु सौराष्ट्रमगधेषु च। तीर्थयात्रां विना गत्वा पुन:संस्कारमर्हति इति स्मृते:। एवं प्रा
देशेष्वपि द्रष्टव्यं॥॥ इति श्रीमद्रामेश्वरसूरिसूनुनारायणभट्टविरचिते त्रिस्थलीसेतौ सामान्यप्रघट्टके पानविचार:॥
अथ फलतारतम्यप्रसंगात्तीर्थयात्राया योजनतारतम्यात्फलतारतम्यं वक्तुं तीर्थप्रशंसा प्रायश्चित्ता॥
न च तावत्तीर्थयात्राया: पापक्षयार्थत्वे मूलभूतानि वचनानि। तत्र तीर्थस्य तु सर्वप्रिं तादि निमीर्थप्रशंसावाक्यानि॥
पौंड्रदेशे रामललामप्युदुरितोपशमाय दा। श्रीकालनारदव्यासश्रीकंदेद्राजनेममेपो: मार्कण्डेयरकुलस्याजसतपिप्रमुरवेताया

द्वादश्यां द्वादशाब्दानि कृच्छ्रसपादाथ भक्तितः तीर्थैरकुर्वन् चिन्त्यादिपुराणोक्तमतेकथंत्वादिमपुराणेकलौ तीर्थयात्राया:
प्राजापत्यादिकृच्छ्रादिप्रायश्चित्तप्रत्याम्नायता वगम्यते । काशीखण्डे चाष्टरसायपकृतां तीर्थयात्राप्रश्ना मनं भवेदिति । त
था । प्रायश्चित्ती व्रजेत्तीर्थे पत्नीविरहितोपि वेति । दिवलः । अभिसंगम्य तीर्थानि पुण्यान्यायतनानि च । प्रमुच्यते नरः
पापात्स्नात्वा तपस्विनः । सर्वाः समुद्रगाः पुण्याः सर्वे पुण्या नगोत्तमाः । सर्वमायतनं पुण्यं सर्वे पुण्या वनाश्रयाः इति । एवं ती
र्थयात्रायाः प्रायश्चित्तार्थतया चतुर्णां स्वार्थसाराधुकः प्रकारो लिख्यते । तत्र प्रायश्चित्तविधिना संकल्पः एवं कं पद्मा
षष्ठियोजनगतस्य षडब्दतादृप्रायोजनगतस्य चाद्यप्रायश्चित्तं भवति । भागीरथ्यां स्नाने षडब्दकृच्छ्रसमा अत्रैके कस्य
षष्टियोजनगतस्य [illegible] यात्राप्रोजनस्य द्वादशाब्दकृच्छ्रद्विः परिकल्पनीया । षष्ठियोजनागतस्य । एवं वक्ष्यतीयांशासि
केकोशागतस्य भागीरथ्यां विष्णुकाञ्च्यां नैके कः कृच्छ्रः सिद्धति मध्ये चेत्यई दिव्यव्यपानालदभावे मार्गीस्यदुर्गमति
चयोजनागतस्येत्येवं कल्प्यं । इयं सप्तमातृकारहोत्रघोजाना भवेगते पुनर्ईर्व नाम्नभूव च ततो न चम्पुष्पा तेषु स
लेषु भागीरथी समम भूतान्तास्तु विष्णुगंगादिसप्तमातृकास्तु गंगासुसमा षष्टियोजनागतस्य षडब्दकृच्छ्रं
मं । प्रयागे वाराणस्यां गंगाद्वारे गंगासागरसंगमे । चतुर्दिक्कृतो । यमुनायां चतुर्विंशतियोजनागतस्य स्नाने द्वादशमे यमु राम·
११

नायां चतुर्विंशत्या सरस्वत्यां चत्वारिंशद्योजनागतस्य चतुरब्दसमं अष्टमासैर्द्वादशभिर्वा चतुर्दिक्कृतो । यमुनासरस्वत्योर्मासत्रयोजनक
द्वौ षडब्दकृच्छ्रद्विः परिकल्प्या क्रोशस्त पर्वताद्यभावे मार्गसुगमदुर्गमतो न्यूनाधिकं कल्प्यः । अत्रापि स्नानादिनं संस्था
कल्प्यः । त्रिभिः सारस्वतं तोयं सप्ताहेन तु यामुनं । सद्यः पुनाति गांगेयं दर्शनादेव नार्मदं इति स्कन्दपुराणवचनात् द्वितीयमु
तुद्री विपाशा वितस्ता इरावती मरुद्वृधा मधुमती पयस्विनी घृतवती इत्यादि देवनदीषु स्नाने पञ्चदशयोजनागतस्य त्रिंशत्कृ
च्छ्रसमं षडब्दभागं वेत्रवती शरयू गोमती देविका कौशिकी निम्नजला सहस्रपञ्चा पुण्या सर्गपुराणप्रवाहा गण्डका
दि देवनदीषु स्नानं पञ्च योजनागतस्य पञ्चदश कृच्छ्रसमं एतास्तु महानदीषु परस्परसंगमे योजनागतस्य कृच्छ्रत्रयं स
मुद्रगामहानदीभिः पूर्वोक्तदेवनदीनां संगमे योजनागतस्य षट्कृच्छ्रफलं । अत्र तु योजनसंख्या कृच्छ्रसंख्या
दिज्ञेया । महानदेषु महानद्यर्धफलं । शोणमहानदे तुंगभद्रफलं । नदेषु नद्यर्धफलं । माहिष्मत्यादौ [illegible]
ज्या३ कृताद्दशगुणं । मथुरा गंगा महानदी सेतुरामेश्वर पद्मनाभ श्रीरंग पुरुषोत्तम कुरुक्षेत्र नैमिष बदरी आश्रम
पुष्कर श्रीशैल महालय कोटि पुष्कर नर्मदा केदार कुब्जाम्रक भास्करक्षेत्र
गोकर्ण मधुरा अयोध्या द्वारवती गया शालग्राम स्नाने गंगास्नान फलं लभते।

त्रि॰से॰प्र॰ चतुर्विंशतियोजनागतस्य नर्मदायां स्नानं चतुर्विंशतिकृच्छ्रसमं कुब्जिकासंगमे द्विगुणं पुष्करतीर्थे चतुर्गुणं। अष्टयोजनाग
११ तस्य तापीस्नानमष्टकृच्छ्रसमं। पयोष्णीमध्ये वान्यत्र संगमे द्विगुणं। षष्टियोजनागतस्य गोदावर्यामष्टकृच्छ्रसमं। त्रिंशद्यो
जनागतस्यैकादशतीर्थेषु प्रतिलोमानुलोमं स्नानं कृच्छ्रसमं। वंजरासंगमे द्विगुणं। सप्तगोदावरे भीमेश्वरे त्रिगुणं। कृष्ण
नपंचाशद्योजनसंख्यायां द्वादशयोजनागतस्य द्वादशकृच्छ्रसमं। अरुणीनद्यां मृष्टयोजनागतस्याष्टकृच्छ्रफलं। पूर्णायां तद्द्वि
गुणं वेण्यां योजनसंख्याककृच्छ्रसंख्या। तथा तुंगभद्रायामपि। पंपासंगमे द्विगुणं हरिहरे त्रिगुणं। भीमरथ्यां योजनसं
ख्या तथा तुंगभद्रायामपि। पंपासंगमे द्विगुणं हरिहरे त्रिगुणं। भीमरथ्यां योजनसंख्यया कृच्छ्रसंख्या। ककुद्मतीसंगमे द
शयोजनागतस्य पंचदश कृच्छ्राः। मलापहारिण्यां योजनसंख्यया कृच्छ्रसंख्या। तथा निवृत्त्यामपि। गोदावर्यां पात्रयोजन
वेद्वेणां मार्कंडेयकृच्छ्रवृद्धिः। सिंहे गुरौ सर्वत्र ज्यायकृपीसमाः। कन्यास्थे गुरौ कृष्णवेण्यां सर्वत्र जाह्नव्यं वृद्धिः। तुंगभद्रायां तुलास्थे
सौके च गंगावृद्धिः। कृष्णवेण्यां मलापहारिणीसंगमे चतुर्गुणं श्रीसप्तरेश्वरे पंचगुणं। मल्लिकार्जुनसमीपे पातालगं
गासंगमे त्रिगुणं। निवृत्तिसंगमे चतुर्गुणं। वृद्धेश्वरे पंचगुणं। मल्लिकार्जुनसमीपे पातालगंगायां त्रिंशद्योजनाग रा॰म॰
तस्य पंचदशसमं। ततः पूर्वं षष्टिकृच्छ्रसमं। लिंगालये द्विगुणं। समुद्रसंगमे चैवं कावेर्यां महानद्यां दशयोजनागतस्य चतु १२
पं॰

र्दशकृच्छ्राः। अनन्तशयनीकीर्तिमालापयस्विनीषु द्वादशयोजने द्वादशकृच्छ्राः। सह्याद्रिपादोद्भूतासु योजनमविच्छिन्नप्रवाहरूपासु
दैर्घ्यानुसारेण योजनागतस्यैकद्विचिकृच्छ्रकल्पनाः। विंध्यश्रीशैलोद्भवासु द्विगुणं। हिमाचलोद्भवासु त्रिगुणं। स्मृतिपुराणादिषु
प्याकर्षचित्रकूटकुल्यायोजनागतस्य त्रिरात्रफलदाः। अल्पनद्यः सकृत्फलदाः। नद्यो द्विकृच्छ्रफलदाः। महानद्यश्चतुष्प
लदाः। एकयोजनगा दिव्ययोजनगामिनाः स्रवंति कुल्याः। ततो द्वादशयोजनगा नाम्ना अल्पनद्यः। ततश्चतुर्विंशतियोजनगा नानद्यः
ततदधिकयोजनगा महानद्यः समुद्रगाश्च। यत्र च महानदीत्वं व्यपदेशः पुराणादिषु ताश्चापि महानद्यः। उपवासपुरःसरं महानदी
स्नानं योजनार्द्धीमाधिक्ये कृच्छ्रसमं। अन्यादिकुलितनामनः पापनद्यः स्वकर्मनाशाद्यावर्त्तिः। समुद्रस्नानं च सर्वदैकापूर्व
देवतासमीपे सरोनदीसंगमेषु च सर्वदा। समुद्रस्नानं पंचदशयोजनागतस्य नावं तत्कृच्छ्रसमं। प्रसिद्धदेवतासमीपे द्विगुणं
तत्रैव स्नात्वा तद्देवतादर्शने त्रिगुणं। त्रिंशद्योजनागतस्य सतु दर्शने विंशत्कृच्छ्रसमं तत्र स्नात्वा रामेश्वरदर्शने द्विगुणं
विंध्यदेशीयानां सेतुरामेश्वरे जाह्नव्याः त्रिगुणं तद्देशीयानां मेव जाह्नवीकेदारयोः तद्देवाद्दक्षिणदेशीयानां
गुणं जाह्नव्यां षड्गुणं। गंगादेशीयानां सेतुरामेश्वरे षड्गुणं। स्कंददर्शने विंशतिकृच्छ्रसमं। त्रिंशद्योजनागतस्य पत्रगंगासे
ज्ञातितत्राप्येवं। सर्वत्र भाष्यमे देवतादिभिर्विवक्षोऽनमार्गस्य दुर्गमत्वे चोक्तयोजनसंख्या। मनोयोजनसंख्याक्लेशेन कृष्णादि

त्रि॰से॰प्र॰ फलानि कल्प्यानि प्रयासाधिक्यात्। श्रीरंगपुरुषोत्तमेव वंकटेश्वरमहालक्ष्मीदर्शनस्थानि लोकगोकर्णद्विंशयोजनागतस्यापि शतकृ
१३ च्छ्रसमं। सर्वत्र वैष्णवमाहेश्वरसौरशाक्तीयपीठेषु दर्शनदशयोजनसंख्यया कृच्छ्रसंख्या। प्रख्याते पुष्टिगुणो। अन्येषु तु योजनसं
ख्यया कृच्छ्रसंख्या ज्ञेया। तत्रापि देवदर्शने देशकालवयःशक्तिनियमविशेषेण विशेषो ज्ञेयः। तत्र यात्रानन्तरं तावा ज्ञेया। एवं च पुराणा
दौ यद्यपादद्वविशेषतउक्तं तत्तद्विषये वा। तीर्थतीरस्थितस्यापि योजनपरिमितात्प्रदेशादागमनमंतरेणापि विधिविवत्स्नात्वा यो
तवासः परिधाय केशश्मश्रुकेशपुनःस्नात्वा एवं द्वादशभिः स्नानैरेकः कृच्छ्रो भवति। यात्रायोः एकभक्तोपःशयनाद्युक्तं सर्पादि
नियमाः सर्वे कार्याः स्याः तीर्थस्नानतर्पणादि। तद्देवतापूजनमित्रैर्न दत्त तीर्थयात्रासर्वत्र ज्ञेया। अत्र च कृच्छ्रस्य जापस्य से
ज्ञेयाः। तवल्कोक्तौ। यथा एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन चैवायं पादकृच्छ्रः प्रकीर्तितः। यथाकथंचित्त्रि
गुणाप्राजापत्योयमुच्यत इति। एवं चतुरहःसाध्यपादकृच्छ्रस्य त्रिरावृत्तौ द्वादशाहोरात्रसाध्यत्वास्य भवति। योजनपरिमाणं चा
नियंपवोदशत्यष्टहस्ता वाष्टी हयस्तुपः। प्रमाणं मंगुलस्योक्तं वितस्तिर्द्वादशांगुलः। हस्तो वितस्तिर्द्वितयं दंडो हस्तचतुष्टयं त
त्सहस्रद्वयं क्रोशो योजनं तच्चतुष्टयमिति। ॥ इति तीर्थप्रकरणम्॥ ॥ अथ यात्रायां कालशुद्धिः॥ ॥ पक्षाष्टमी द्वादशी पूर्वगच्छे
त्रिदिनस्पृशि। शर्मिमास्वतिपदर्शरिक्तावमर्दिने शुचारन्तमालायां। हस्तेंदुमैत्रश्रवणाश्विपुष्यपौष्णश्रविष्ठापुनर्वसुषु। प्रेष्ठानि धि राम॰ १३

शयानि व वप्रयाणे। अश्वक्रांति पंचादि मसमासग चिद्याविशारदानि लसार्थयायानव्ययपि भ्रेश्वरदेवतानि। पात्रास्तनिस्थानि चराशि
भानि स्पष्टतानि नेष्टानि नंदितानि। तथा चार रुक्षा करस्त्वर्यस्तुतावनीजनी द्वागतिपाम सुभद्रः कथितः प्रयाणे। तथा। सोमसौम्यगुरुः
शुक्रपादः सर्वकर्मसु भवंति सिद्धिदाः। तथा व्यतीपातः परिघार्द्ध वैधृतियोग अभविष्टिकरणं च क्रांतिसमलं कुलिकास्त्रवमगंडांतादि
न शुभानि। लक्षं तः नीचस्थेप्यतिचरस्रामाते बालवृद्धास्तगे वा संन्यासे देवयात्रा व्रतनियमविधिः कर्णवेधस्तु दीक्षा। मौंजीबंधो वधू
डापरिमाणपत्न विधिवीस्तदेवतात्तिष्ठा वर्ज्या सद्भिः प्रयत्नात्त्रिदशयतिगुरौ सिंहराशिस्थिते वा। तथा। रविर्हेतं गते जीवे जीवे हेतंगते
तेरवौ। वर्जयेत्सर्वकर्माणि व्रतस्वस्त्ययनानि च। तथा। गुर्वादित्ये गुरौ सिंहे शुक्रे चास्तमुपागते। अग्न्याधानं महादानं व्रतं देवविलो
कनं। तथा। गुर्वादित्ये गुरौ सिंहे शुक्रे चास्तमुपागते। अग्न्याधानं महादानं व्रतं देवविलोकनं। तथा। गुर्वादित्ये गुरौ सिंहे नष्टे शुक्रे मलि
म्लुचे। यात्रायने हरौ सुप्ते सर्वकर्माणि च विलोकनं। तथा। गुर्वादित्ये वापीकूपतडागयागगमनं क्षौरं प्रतिष्ठा व्रतं विद्यामंदिरक
र्णवेधेन महादा[illegible]नं वनं सेवनं॥ तीर्थस्नानविवाहदेवभवनं मंत्रादिदेवे रूणं दूरे रोगो वाजिनी विष्णुः परिहरेत् संगतेभार्गवे। सिंहस्थिते
मघासंस्थे गुरुं यत्नेन वर्जयेत्। अन्यत्र सिंहभागेषु विवाहादिविधीयते। तथा। बाले वा यदि वा वृद्धे शुक्रे वास्तंगते गुरौ मलमास
वैत्रानिवर्जये देवदर्शनं॥ अत्र प्रकरणे देवदर्शनमपूर्वं मिथिलाज्ञेयं। अतस्तु व गार्ग्यः। अपूर्वदेवतादर्शनाद्वृताशुचिसुर्न्नष्टभागे का मलमा

सिंप्यनावृत्ततीर्थयात्रां परित्यजेत्। इति। अनावृत्ततीर्थयात्रां अपूर्वतीर्थयात्रां। तथा। अतीचारमध्येप्यनावृत्ततीर्थयात्रां परित्यजेत्। इति।
अनावृत्ततीर्थयात्रां अपूर्वतीर्थयात्रां। तथा। अतीचारगते जीवे नराशिमै वक्रे तु नः लुप्तसंवत्सरो ज्ञेयः सर्वकर्मसु गर्हितः। अस्यापवादः।
वृषमेषगते कुंभे यद्यतीचारगो गुरुः। तत्र काललोपः स्यादित्याह गा' लवो मुनिरिति। रत्नमालायां। उदयति दिशि यस्यां याति यत्रा व
माद्या विवरति भवचक्रे पे शुदिग्द्वारमेषु। त्रिविधमिह सितस्य प्रोच्यते सन्मुखत्वं मुनिभिरुदितमेवन्नान्यत्रेव भ्रमत्वात्। स्वल्पोपि कार्य
त्रिसुक्रयानेयि यास्यतो सिद्धिमुपैति नूनं। अस्यापवादो वृद्धिशतोनोते पौष्णप्रतिशुक्रपान मन्मुभयेयवत्सभृग्वंगिरोभारद्वाजवसिष्ठका
श्यपकुलोत्पन्नाः तथा वैः कुलोद्भूमिर्दे विषयस्त्वे प्रतिसितं न स्याद्विवाहे न पातौ यानां गमनेन व्येकनारे यामे च सोमं तथेति। केचि
द्गुरुमौढ्यादिदोषाभाव उक्तः। गोदावर्यां गयायां च श्रीशैले यहराद्वये। सुरासुरगुरू रात्रौ च मौढ्यदोषा न विद्यते। वायुपुराणे। कैंग
यायां सर्वकालेषु पिंडं दद्याद्विधानतः। अधिमासे जन्मदिने अस्ते च गुरुशुक्रयोः। न त्यक्तव्यं गयाश्राद्धं सिंहस्थे च बृहस्पतौ। अन्या
द्वस्य यात्रा पूर्वं कृत्वा यात्रापि न निषिद्धेति केचित्। तथा। अधिमासे च जन्मर्क्षे अस्ते च गुरुशुक्रयोः। तीर्थयात्रा न कर्तव्या गयां गोदावरीं वि
ना। अन्येपि। लग्नलग्नांशशुद्ध्यादयो यात्रोपयोगिनो ज्योतिर्ग्रंथतद्विधोज्ञेयाः। विस्तरभयान्नेहोच्यंते। ॥ इति त्रिस्थलीसेतौ तीर्थयात्रा
याः कालशुद्धिः। ॥ अथ तीर्थगमनविधिः। ॥ स्कांदे। तीर्थयात्रां चिकीर्षुः प्राग्विधायोपोषणं गृहे। गणेशं च पितॄन्विप्रान्यथोक्तफलभाग्भवेत्।

अगस्त्येति। तीर्थयात्रां कृत्वा गृहागतेन पुनः श्राद्धं कार्यमित्यर्थः। तथा ब्रह्मपुराणेपि। यः कश्चित्तीर्थयात्रां तु गच्छेत्सुसंयतः स च पूर्वं गृ
हे [illegible] त्वा। कृतोपवासः शुचिरप्रमत्तः संपूजयेद्भक्तिनम्रो गणेशं। देवान्पितॄन्ब्राह्मणांश्चैव साधून्धीमान्विप्रोवित्तशक्त्या प्रयत्नात्। प्रत्यागत
श्चापि पुनः स्तेथै वदेवान्पितॄन्ब्राह्मणान्पूजयेच्च। एवं कुर्वतस्तस्य तीर्थाद्युक्तं फलं तत्स्यान्नात्र संदिग्धमस्ति। श्राद्धं चोपवासोत्तरदिने।
शुभतिथौ शुभवारे शुभनक्षत्रे लग्ने द्विजः। उपोष्य रजनीमेकां प्रातः श्राद्धं विधाय च। गणेशं ब्राह्मणांश्चैव नत्वानुज्ञाप्य स्वस्तिन वा सुधी
रिति स्कांदे शिवशर्मोपाख्याने श्रीर्दर्शनात्। अत्र शुभतिथ्यादेः प्रशस्तिर्वा निष्प्रयः। गणेशब्राह्मणानत्वेत्यत्र वंदनमेव विहितं।
उपाख्याने कारूपतया पापक्रमस्याविधेयत्वात्। पद्माश्राद्धपर्वमाविगणेशपूजातिरिक्तमेव श्राद्धानंतरं गणेशार्चादिनातिमात्र
मेत्रोक्तं। श्राद्धानंतरं कार्पटिकवेषोपि कार्यः। उद्यतश्च गयां गंतुं श्राद्धं कृत्वा विधानतः। विधाय कार्पटीवेषं कृत्वा ग्रामं प्रदक्षिणं
चततो ग्रामांतरं गत्वा श्राद्धशेषस्य भोजनं। ततः प्रतिदिनं गच्छेत्प्रतिग्रहविवर्जित इति वायुपुराणोक्तेः। केचित्तु गयायात्रामेवेष्वपि विशि
ः कार्यः। गयामुपक्रम्यैव विधानात्। नतु तीर्थांतरयात्रायामिः। केचिदुपवाससदिने श्राद्धात्पूर्वं मुंडनमिच्छंति। प्रयागे तीर्थका
त्रायां पितृमातृवियोगतः। कचानां वपनं कुर्याद्व्यानदिकवौमभवेदितिविष्णुवचनात्। इदं च प्रायश्चित्तार्थयात्रामात्रमेव तत्र
तस्य विहितत्वादित्येके। कार्पटिकवेषेण तीर्थगमने तदित्यन्ये। श्राद्धं च तीर्थश्राद्धवद्देवपदे वतंतं व वैदेवें तत् हदरूपरैवतं वाम

त्रि.सा. १५ मेदेन पार्वणं कार्यं। इदं च घृतमात्रद्रव्यकं। गच्छेद्देशान्तरं यस्तु श्राद्धं कुर्यात्स सर्पिषा। यात्रार्थमिति नस्त्रोक्तं प्रवेशे च न संशय इ
ति विष्णुपुराणोक्तेः। द्रव्यांतरसाहित्ये व्रीहिभिर्यजेतेतिवद्विरयेहसाधनत्वबोधकसर्पिषेति तृतीयाबाधापत्तेरिति केचित्। तं
त्रं घृतमात्रस्य स्वतंत्रमहत्त्वाभावेन श्राद्धद्रव्यतासंभवात्तृतीयका त्रीघाते नश्रुतिसंकोचात्। तस्मात्सघृतमन्नं तुरभिमतो
ऽप्यदपि न। आज्ञादुर्येत्तृतीयाया अविधानात्तल्लक्षणप्रसंगात्। तस्मात्तृतीयप्रार्षिप्राधान्ये द्रव्यांतरानिरपेक्षत्वस्यैव तृतीयपायेबोधना
घृतेन मुख्यद्रव्येणेत्यर्थः। तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा। दत्तेन मांसं प्रीयंते विधिवत्पितरो नृणां। होमासे मत्स्यमांसे
न त्रीन्मासान्हारिणेन तु इत्यादिमन्वादिवचनात्तिलैरित्यादिवत्। सत्यपि हिरण्यश्राद्धेकल्पत्वेन प्रत्यभिचाररोपेह त्वेवपथ्याश्रातः स
वनेषु चरंति पुरोडाशेन सामध्यंदिने सवनेऽयंगेस्तृतीयसवनेऽद्रतिवद्वा। अत्र तद्वस्तुतिरत्नावलीमदनपारिजातकारादिभिरेवमेव
व्याख्यातमिति। अत्र तद्ग्रामांतरे श्राद्धशेषेरोवचने नैव पारणं कार्यं। तस्यैव मुख्यद्रव्यत्वात्। इदं श्राद्धमात्रमुद्दिश्यकं मेवेति कश्चि
त्। तन्न। प्रकृतत्वेनोपस्थितेर्लाघवात्। प्रत्येपार्द्धरोविशेषेणानभिधानाच्च। उक्तरीत्या तत्र पारणमेव घृतेनैकार्यं कपिंजलन्यायादि
ति केचित्। उद्देश्यत्वेऽगतत्वेन तत्र यवेपस्यां हि त्रिदशत्वापत्तेश्चेत्यत्र तु एव संख्यायामपि शक्तेरन्यायादानियमः। संन्यो राम. १५
तरप्रयाणानुष्ठानक्रमः। यात्रामुहूर्तात्पूर्वदिने एकभक्तं हविष्यभोजनं ब्रह्मचर्यादिनियमाः कार्याः। पूर्वेद्युस्तु संपतरनिवचनात्। १५

तदुत्तरदिने उपवासः। पक्षे मुंडनं। तदुत्तरदिने स्नानादिस्तुतितासंपादकं नैमित्तिकं विधाय भक्त्या यथाशक्ति गणेशेष्टदेवतेशनपिता
घृतेन मुख्यद्रव्यकं पार्वणश्राद्धं विधाय यथाशक्ति वस्त्रालंकारगोभूहिरण्यादिभिर्ब्राह्मणान्संपूज्य पात्रासंकल्पं विधाय कार्पा
पपरिधानादिरूपकार्पटिवेषं धृत्वा मुहूर्तवेलायां ग्रामान्निर्गत्य निवासग्रामं प्रदक्षिणीकृत्य क्रोशाभ्यंतरस्थग्रामांतरं गत्वा
श्राद्धशेषघृतेन पारणं कुर्यात्। आध्वनि च क्रोशगमनं इत्यादिना श्राद्धोत्तरं क्रोशगमननिषेधात्। ततो दिनांतरे स्नानादि
विधाय निःप्रवाचत गच्छेत्। न मयि ग्रामं प्रदक्षिणीकृत्य गच्छेदिति स्मृतिरत्नावल्यां। अथ च केचिदुपवासोत्तरदिने पूर्वाह्ने मु ६५
हूर्त्तस्यात्रदायदात्तापरावेमुहूर्तस्यात्तदाऽत्र समर्थचेत्तद्दिन एवोपवासश्राद्धादि विधाय सुहूर्ते समये पात्रां विधाय स्थलांतरे
गत्वा तत्र पारणं कुर्यात्। प्रधानादिरोधे नैवोपवासस्येष्टत्वादिनि केचित्। तद्विंत्यं। पूर्वेद्युः पारणे वा मुहूर्ते सति तद्दिने उपवा
सं कृत्वा मुहूर्तसमये ज्योतिःशास्त्रोक्तरीत्या फलवस्त्रादिप्रस्थानं कर्त्तव्यं स्थापयित्वा प्रातः श्राद्धादि विधाय पारणात्पूर्वं गत्वा तत्र
स्थानं गृहीत्वा ग्रामं प्रदक्षिणीकृत्य ग्रामांतरे पारणं पथ्ये न श्राद्धे उपयंत्रो श्राद्धे उपवासोत्तरदिने स्नानकालस्यातोचितत्वात्।
प्रमाणं विना श्राद्धं कृत्वोपवासयोगात्। एतादृशविषयार्थमेव हि ज्योतिःशास्त्रे प्रस्थानप्रकार उक्तः। अत्र च मध्यानुरादिस्तु
वासासमर्थः स उपवासप्रतिनिधिं किंचित्कृत्वा कुर्यात्। प्रतिनिधयश्च। नक्तं हविष्यान्नमनोदनं वा फलं तिलाः क्षीरमथाम्बु चाज्यं।

त्रि.से. एवं च गयायां यदि मातापित्रोः प्रशस्तमतो न्वरमुं रचेति। कार्पटिकवेषधारणं चयात्रां गत्वा ऽऽगमनकाल एव नान्यत्। किंक भोजनादिकाले
१६ पि। कर्मकाले न यतः कायायवाससेति काषायवाससो निषेधात्तन्न बाधकमानाभावात्। वेषविधायकवचसोऽगमनमात्रे वेषवि
धानोपपत्तेः। एवं तीर्थेऽपि न द्वेहेत्वापत्तु सरणे कार्पटिकवेषः न तु स्नानश्राद्धादिकाले पि माना भावादिति केचित्। अन्ये तु उपक्रमा
द्यारम्भ यात्रावसानं यावत् नियमादिनि वृत्तिर्द्वैपस्यां गमनविधानात्तदा वेषधारणं। अन्यथानियमान्तरे कार्पटैः नष्टः। तीर्थप्राप्त्यर्थं तो
पि स्वग्रामसमीपे ग्रामांतरे कृतोपवासस्तदुत्तरदिने गृहाभिष्टदेवतां च संपूज्य घृतेन पार्वणं विधाय ब्राह्मणान्संपूज्य स्वग्रामं प्राप्य
पूर्ववत्प्रदक्षिणीकृत्य देवस्थाने वेषं त्यक्त्वा स्वगृहं प्रविश्य श्राद्धशेषं घृतेन पारणं कुर्यात्॥ प्रत्यागतश्चापि पुनः तत्रैव देशादि
हृद्ब्राह्मणानचेतिवच नस्यैव पाशब्देन सकलप्रस्थानधर्मातिदेशाद्दिनि कश्चित्। तं च। देवादिपूजनेऽधर्मातिदेशेनैव तत्प्राप्ते
पपत्तेः। अत एव स्कांदे। आगत्यामपव्यं च पितृनित्ये वो कंशिष्टाचारोप्येवमेवात्र त्र कश्चित्। यात्रा संकल्पफलोत्सर्गो न कार्यः।
उपतम्येन्द्र यांगं तु फलं स्यात्कद्वतो गया गमि अतु पक्रमोपसंहाराभ्यां तादर्थ्यावगमात्। उद्देशेन हितादर्थ्ये विविच्य न इति न्यायात्।
एवं गच्छतस्तस्य नीर्थाय दुक्तं फलं तत्स्नानात्रसं दिग्धं वचनाच्छान्यथात्र तिपत्सम्यं सेधादिफलोस्पेत्तीर्थे वै पर्थप्रसंगः। य
दपितन्नत्तयात्रायां स्वर्गराजसूयादिफलातिः प्रपरां तदपि प्रधानफलस्यैवांगे प्रवरान्यायेनार्थवादः। न तु स्नानजं फलमात्रि रा.म. १६

ति तीर्थयात्राफलं न तिस्त्र्यादिवचनात् यात्राया फलमपि दृष्टपगन्तीति केचित्। नातीर्थयात्रायात्रागीतीर्थफलं तं त्राप्नोतिकिं तु
स्नानमात्रजमित्यर्थकरणात्। अर्ह तीर्थफलं तस्य यः प्रसंगेन गच्छतीत्यादेरपि तीर्थस्यैव फलवचनात्। तदेव कृत्वापानेन स्ना
नजं तीर्थफलं न स्पप्यः प्रसंगेन गच्छतीत्यादेरपि तीर्थस्यैव फलवचनात्। तदेवं स्नानमात्रफलं भवेदितापानवत्तीर्थस्यैवै
फलं यत्र न फलं नोक्तं। यात्रा धर्मपत्तु यानादपि तीर्थस्यैव सफलता। न पात्रायाः। संपूर्णतीर्थफलप्राप्तिकामः इत्यपि न संक
ल्प्यः यात्रायाः स्तीर्थफलसाधनत्वाविधानात्। तस्मात्तत्फलमुद्वणं आत्ल्याभिभूति वदर्थवादः। प्रायश्चित्तरूपयात्रायां
तु पारार्थ्याभावादङ्गत्वानवगतेः। स्वतंत्रफलं तेन तत्रोपक्रमे संकल्प्य पुनस्तीर्थप्राप्त्यैन संकल्प्य तीर्थस्नानादेर्माप्ति
र्थेऽकस्व च तत्पत्रैवांतर्भावादिति। एतद्विंत्येगं मुगच्छत इति प्रवणाद्युपक्रमोपसंहारयोर्विरुद्धत्वात्तादर्थ्यानवगतेर्गमनस्यैव
फलत्वं प्रतीतेः। तीर्थस्य क्रियानाविष्टस्य फलसाधनत्वासंभवात्क्रियापेक्षायामेवं गंतव्यमितिसमानवाक्योपात्तगमनरूपक्रिया
मेव स्नानादिधात्वर्थावेशकल्पनायोगाद्गमनस्यैवावच्छेदकत्वप्रतीतेः स्तीर्थगमनाद्यस्फलमित्यर्थप्रतीतेर्द्वितीयो
नापि विरुद्धत्वात्। एवं च तादर्थ्याद्भवगतेः तत्र ऽप्यपमाणस्य स्वर्गादिफलसांगफलस्य वरान्यायविषयत्वोच्चातइति
हत्वाहसं। किं वा तीर्थाभिगमनं तु रजसः। पाः काश्चित्तीर्थयात्रासु नीहारिं त्र्यादि सर्वेदानानाभिकारिकाश्च पाल्लोपवपापारव प्राप्त

त्रि.स. भान्यमवगम्येतानत्वंगेस्वतंत्राधिकारनदर्शनंभवति। एवं च तीर्थयात्राफलं नेति स्यादेः क्लिष्टकल्पनाव्याख्यानमप्रामाणिकं
१० चेव। अर्द्धं तीर्थफले तस्यैवादावपि श्रवच्छेदकधात्वर्थाने ह्यंगत्वंतीति समनयाकोपात्रागमनस्यैवापच्छेदकता। किंचाप्र
त्यक्षितार्थयात्रायां प्रधानता नान्यत्रेत्यत्र किं नियामकमन्यत्र कोपचानात्। तस्मात्सर्वत्रयात्राफलवती। न च तीर्थे वैयर्थ्य
प्रसंगः। कर्मणामलमहत्तांफलं च नांचस्वर्गे वरे विभागः स्वं अ सामान्यादिविभागेपि चोदित इति न्यायेनावांतरवैजात्यक
ल्पनात्। तु दशस्वले श्रार्थवादत्वाद्वा। तस्मात्प्रायश्चित्तार्थापि यात्रा फलवती। स्नानश्राद्धादिच। एतावांस्तु विशेषः तत्राप्र
ह्रादेरग्निहोत्रवत एकस्यात्मपत्ते संयोगपृथक्त्वमिति न्यायेन काम्यनैमित्तिकयोभयरूपता। उभयथा वचनसत्वात्। तत्र प्रवृत्ति
यथानिरूपनिमित्तकांत्यादिर्न्नकरोति तदा यात्राफलत्ताभेपि प्रत्यवेतीति विगीयते। यद्विशेषः। अतएव प्रायश्चित्तार्थयात्रायामप्येकं
संचित्तो परप्रच्युव न्यायेभ्या[illegible]भ्यदिति तीर्थकृत्यां तत्र। एवं च प्रासतीर्थोऽवतः तस्मान्नादिरेव यदि देवान्नप्रपतेः। बलान्नेलक्षा
दिनान्यत्र नीयतेवा तदा तु तत्पाय राणपात्र्यादपवा पोनापियात्रानिःफलेति। तदलं तीर्थयात्रानिःफलतित्यागादिरुद्धमभिदधानेर्वि
वादेनात्रान्येत्वाहुः। अन्यस्तपात्रापाः फलत्वं तया। पिपेदपदे च यमेघस्य फलं स्यादवत्तोगया मितितगयायां यात्रायामप्युत्तमपीदमेव
फलं सर्वतीर्थयात्रास्वन्वेति। एकत्र निर्णीतः शास्त्रार्थो परत्रापीति न्यायात्। फलाकांक्षायां च गमनफलत्वेनश्रुतस्यासेवांतरंग राम. १०

त्पाफलत्वैनोदित्स्यात्। विश्वजिन्न्यायात्स्वर्गकल्पनेवहिरंगत्वेनोपस्थितिगौरवादिति तदप्यमंदं। तत्रत्तत्र सामान्यतो विशे
षतश्च तीर्थयात्रायां फलोतरश्रवणात्। सामान्यस्तावत्। भारते दानधर्मेषु गोलोकं प्रकृत्य। मनस्विनस्तीर्थयात्रापरायणास्ते
तत्र मोदंति गवां निवासे इति। तथा प्रभासादीन्यनुक्रम्य। सरस्वतीदृषद्वत्योश्च यमुनायां च ते नुयांति च। तत्रैते दिव्यसंस्थानादिव्य
संस्थानादिव्यमाल्यधराः शिवाः। प्रयांति पुण्यगंधाढ्या इति। वायवीयेपि। तीर्थान्यनुसरन्धीर इत्यादि। विशेषतोपि। कौर्मे।
पुंडरीकं महातीर्थं ब्राह्मणैरुपशोभितं। तदाभिगम्य युक्तात्मा पुंडरीकफलं भवेदिति। एवं सर्वपुराणभारतादिषु प्रतितीर्थमुप
क्रम्य फलप्रतिपादनं दृष्टव्यं। विस्तरभयान्न लिख्यते। एवं च वाक्यात्प्रकरणाद्वाप्य न योगे फलेल द्वैते नैव निराकांक्षत्वात्॥
फलाकांक्षादाक्षतरामेवांतरंग न्यायः क्रतुमात्रमेकत्रेति न्यायः। विप्रवरीतो विप्रानरंगभावः। विशेषमु तस्यैवांतरंगत्वात्स्वर्गकल्पनाभा
वाच्च। नोपस्थितिगौरवमपीत्यलं पुराणवृंदगमावः। विशेषमु तस्यैवांतरंगत्वात्। स्वर्गकल्पनाभावाच्च। नोपस्थितिगौरवमपी
त्यलं पुराणादिदर्शिभिर्विवादेन॥ ॥ इति श्रीभट्टरामेश्वरसूरिसूनुनारायणभट्टविरचिते त्रिस्थलीसेतौ सामान्यप्रघट्टके ती
र्थगमनविधिः॥ ॥ अथ यात्रायां नियमाः॥ ॥ भारते। कामं क्रोधं च लोभं च यो जित्वा तीर्थमाविशेत्। न तेन किंचिदप्राप्यं तीर्था
भिगमनाद्भवेत्। तीर्थान्यविचयोक्रोनविष्किना संचरंति ये सर्वद्वंद्वसहा धीरास्ते नराः स्वर्गगामिनः। दृढव्रतानिर्जितानवपापारीनिसडिक्र

त्रि. से.
१८

दः। शरदतुलस्त्योय स्य हस्तौ च पादौ च मनश्चैव सुसंयतं। विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते। प्रतिग्रहादुपावृत्तः संतुष्टो येन
केनचित्। अहंकारविमुक्तश्च स तीर्थफलमश्नुते। अकल्कको निरारंभो लघ्वाहारो जितेंद्रियः। विमुक्तः सर्वसंगैर्यः स तीर्थ
फलमश्नुते। अक्रोधनश्च राजेंद्र सत्यशीलो दृढव्रतः। आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते। हस्तसंयमः परताडनपरस्व
ग्रहणानिवृत्ता। पादसंयमः पादताडनागम्यदेशगमननिवृत्ता। मनःसंयमः परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनं। वित
थ्याभिनिवेशश्च मानसं त्रिविधं स्मृतमिति त्रिविधनिवृत्तिः। विद्या तीर्थमहिमज्ञानं परं तु विद्यासद्वास्तुज्ञानमिति स्मृतिदर्पणे। त
त्र। प्रकृतानुपयोगात्। तपः उपवासैकभक्तादि। कीर्त्तिः साधुरितनया प्रसिद्धिस्तेनाभिशस्ततापराक्रियते। प्रतिग्रहव्यावृत्तिया
ऽयोपक्रमात्मेनरे। यत्तु पच्चते। तावदस्य हृद्यातीर्थयात्रादनमश्नुतइतितद्यस्मिंस्तीर्थयात्राप्रयोगे प्रतिग्रहः कृतः तत्प्रयोगस्य
विफलता। प्रतिग्रहनिवृत्तिरूपांगाभावात्प्रयोगांतरस्येतत्स्यरमिति कश्चित्तन्न्याचारंभत्यागमपि हुः प्रतिग्रहार्जितधनविषय
मिति तु युक्तं। इयं च प्रतिग्रहनिवृत्तिः प्रतिग्रहमंतरानिर्वहणशरीरंधारणाकर्तृकविषया यतिब्रह्मचर्यादीनां लिंगावस्त्रादि प्र
तिग्रहमंतरानिर्वहणशरीरंधारणाकर्तृकविषया यतिब्रह्मचर्यादीनां भिक्षावस्त्रादिप्रतिग्रहमंतरानिर्वहशरीरंधारणाकर्तृ
कविषया यतिब्रह्मचर्यादीनां भिक्षावस्त्रादिप्रतिग्रहमंतरा। शरीरधारणासंभवात्तद्विषया। तेषां संग्रहस्य विधेयात्प्रतिग्रहदि राम. १८

नापात्राया अनिर्वाहादवश्यकर्त्तव्यत्वात्तस्य। येनकेनचित्संतुष्टः निमित्तमभ्यासादवलोलुपः। अकल्कः निर्दंभः। निरारंभः कृषिवि
पार्थार्जनादिव्यापाररहितः। लघ्वाहारोऽबहुभुक्। जितेंद्रियः एकादशेंद्रियाणां स्वविषयासक्तिशून्यः। अविहितासक्तिः संग
स्तद्रहितः। दृढव्रतः अंगीकृतोपवासादिव्रतकृतिरहितः। निर्वाह्यमेव तीर्थयात्रांगभूतं यात्वामिति भावः। सर्वभूतहितेरतः
आत्मोपमो भूतेषु। तथा। अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः। हेतुनिष्ठश्च पंचैते न तीर्थफलभागिनः। पापात्मा बहुपा
पवान्। तस्य पापक्षयएव यात्राया न तु तीर्थफलं स्वर्गादि। न्तरांपाय कृतां तीर्थयात्रा प्रशमनं भवेत्। यथोक्तफलदं तीर्थं भ
वेच्छुद्धात्मनां नृणामिति काशीखंडोक्तेः। यस्य धर्मध्वजो नित्यं सुराध्वज इवोच्छ्रितः। प्रच्छिन्नानि च पापानि वैडालं नाम तद्व्रतमि
ति मनूक्तो वैडालव्रतिकः पापात्मा। नास्तिकः पाखंडः। अच्छिन्नसंशयः सर्वत्र निश्चयरहितः। फलोपायेतिकर्तव्यतां
र्थं निश्चयशून्यः इत्यन्यो नायं लोकोऽस्ति न परो न सुखं संशयात्मनः इति गीतोक्तेः। हेतुनिष्ठो हैतुकः। कुहेतुभिर्धर्मशास्त्रोपहा
सकः। प्रभासखंडे। येनैकादश संस्थानि नियतानीन्द्रियाणि वै। स तीर्थफलमाप्नोति नरोऽन्यः पापभाग्भवेत्। अत्र ब्रह्मचर्यरूप
इंद्रियनियमः स्त्री तु कालं विना। तीर्थानि गच्छता नित्यमनृतौ ब्रह्मचारिणा इति स्मृतेः। तथा। चित्तमंतर्गतं दुष्टं तीर्थस्नानैर्न शु
ध्यति। शतशोऽपि जलैर्धौतं सुराभांडमिवाशुचिः। अशुचित्वात्। सर्वत्रागीगेनजलेन सम्यङ्निस्नातो योऽव्ययमावद्धः। आज

त्रि·से· १९ स्नानपरोऽपि नित्यं नमुच्यते तेव वपर्ववदामः। गंगातीर्थेषु वसंति मत्स्या देवालये पक्षिसंघाश्च राजन्। भावोज्झितास्तेन फलं लभंते
तितीर्थाच्चदेवायतनाच्चतस्मात्॥ भावेनतो हृत्कमले निधाय तीर्थानि सेवेत समाहितात्मा। अन्यच्चापि मे केनोक्तं द्विजदेवदेवरो
भिषज्ये गुरौ। यादृशी भावना यस्य सिद्धिर्भवति तादृशी। तेन भक्तिभावो मनसि निधाय तीर्थं कुर्यादिति भावः। एवं च दृष्टसंपन्ना
दयो नियमास्तीर्थयात्रां प्रकुर्वंति दंभेन कपटेन च स्नानादिसकलकर्मांगभूतान् स तीर्थफलमश्नुत इति सामान्येनोक्तेः। क्व
चिद्गुरौ। तीर्थयात्रां प्रकुर्वंति दंभेन कपटेन च। तीर्थमात्रा न सिध्यंति तेन राघव वर्णितिः। भारते। आचिते करोतोऽर्द्धं मासिका
कुतिर्दर्शनात्। प्राप्यंते तानि तीर्थानि सद्भिः शिष्टार्थदर्शिभिः। तथा। संप्रस्थितं तीर्थयात्रां ब्राह्मणानवमन्यते। नासौ प्रतिनिव
र्तते तत्रदंते तस्य जीवितं। तथा तीर्थं गच्छंस्त्वरेतं तं ध्यायतिस्स एकत्र मानवः। नाप्नोति नाप्नुयाद्धिं गच्छेद्वभुक्ता न च स्तनकौ। तिष्ठ संध्या
एकत्र वरेदिस्नेनेनरांशौ ऽक्रतमध्यादके नपातनस्यकृतनिसक्रियेण मचलितव्यमिस्तुकोमवति। नास्ता तदिति शक्तः सत्यात्
वगछेदितिसार्थः॥ अनुपमात्रं पुरीषं वाकृत्वाऽकृतशौचः। चंडालोदक्यादिस्पर्शे स्नानाचमनादिनिमित्ते सत्यकृतस्नानाचमना
दिस्था। मतुषड्विंशान्मते। देवयात्राविवाहेषु यज्ञेषु प्रकृतेषु च। उत्सवेषु च। उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टिर्न दुष्यतीति वृहस्प राम·
तिस्था। तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे। नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यतीति। एतच्चाहमनेन स्पृष्टइति प्रसंगा १९

संनास्ति तद्विषयं तन्मात्रवादेरूचनद्वरितार्थ्यादिति मदनपारिजातः। अन्येत्वनिवार्यस्पर्शे देवयात्रायात्रादिनान्न कार्यं विषये दोषा
भावः। भोजनार्थे तु स्नानं व्यतिरेकेणानेवमुच्यते। इत्याहुः। नच सूतकी नाशौचवानित्यर्थः। यत्तु प्रारब्धे सूतकं नास्तीति तत्परि
चारिणि तद्व्रतादि मात्रविषयं। व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे। प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकमिति विष्णुः स्मरणा
त्। अन्यथा पूर्वोद्दिष्टे व्यर्थापत्तेः। अत एव प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः। नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रि
येति। तावन्मात्रविषय एवारंभो विष्णुनोक्तः। ग्रीष्मवाक्ये। अन्येतु यच्चेवेरंतर्येणानुष्ठानबोधितं मासोपवासादि। तद्विषय
मिदं भवतु। नच तीर्थयात्रायां नैरंतर्येणानुष्ठानं बोध्यते। तस्मात्प्रारब्धे सूतकाभावो नैतद्विषयः। अत एव सहस्रभोजनादौ
सूतकं न भवति वेत्याहुः। उभयथापि यात्रामध्ये सूतके सति आशौचकालं तत्रैव परिकल्प्य शुद्धो सतां गच्छेदिति सिद्धं।
यत्तु विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि। नतत्र सूतकं तद्वत्कर्मयज्ञादि कारयेदिति पैठिनसिवचनं तन्मार्गे वैषम्यादि
ना गत्यंतराभावे सति तीर्थयात्रायामाशौचं नास्तीत्येवंपरं। अन्ये पेवदिशा रजस्वलास्त्री तन्नैव चत्वारि दिनान्यति वाह्यपंच
मेऽह्नि शुद्धे तां देवे कर्मणि पित्र्ये च पंचमेऽहनि शुद्ध्यतीति वचनात्याप्यामास्नादेव कर्मत्वात्। एवं वियसेन गच्छतोऽपथेन राती
र्थानरमापनतितत्रानत्र स्नानश्राद्धादयवश्यं कार्या। अर्द्धं तीर्थफलं तस्य यः प्रसंगेन गच्छतीति प्रर्दमेवोक्तत्वात्। तीर्थप्राप्ति

त्रि.से. २० रूपनिमित्ते सति नैमित्तिकस्नानापकरणे प्रत्यवायप्रसंगाच्च । उपवासः कौरेन्नदेश्य तीर्थ एवेति केचित्तारवंतीर्थयात्रायां ध्रुवत्वाति
त्तो यदि दैवात्स्वरावर्त्तेत तद्विशेषो गारुडपुराणे । तीर्थं चलितो यः कोऽपि पुनरायाति वेगतः । अनुज्ञातः शुभैर्विप्रैः पापच्छित्तं स
माचरेत् । संकल्पवद्धनिमित्तप्रायश्चित्तं ब्राह्मणानुज्ञया यात्रासमाप्त्यर्थमित्यर्थः । यदा तु तीर्थं प्रति चलितस्तीर्थमप्राप्यैव मृतस्तत्र
विशेषो गारुडपुराणे । यस्तीर्थसन्मुखोऽभ्येति पापवान्सम्रियेत चेत् । तत इति चकारेऽध्याहार्यः । द्विविधस्याप्यंतरालेमृतस्य स्वर्गलोक
प्राप्तिर्भवतीत्यर्थः । यदा प्राच्यानां गयायात्रायां पौरस्त्यानां च काश्यादियात्रायां मार्गे कर्मनाशानाम नदी पतति । त
दा तज्जलस्पर्शो यथा न भवति तथा केनचिदुपायेन संतरणं कार्यं । कर्मनाशाजलस्पर्शात्करतोयाविलंघनात् । गंडकीबाहुत
रणात्पुनः संस्कारमर्हतीति वचनात् । प्राच्यास्तु करतोयाजलस्पर्शात्करतोयाविलंघनादिति पठंत्वा गंगासंगममार्गेण नौका
या उत्तरमार्गेण वा गंतव्यमित्याहुः । तन्न । कर्मनाशाजलस्पर्शस्यापि तैरनिष्टत्वांगीकारात् जलस्पर्शनिषेधकस्यानुक्तत्वापि
ववचनांतरस्य कल्पनापातात् । करतोयांकुरंगं च त्रिरात्रोपोषितो नरः । अश्वमेधमवाप्नोति विगतस्वप्रयतः स्मृतिरिति दानधर्मे
षु । करतोयांसमासाद्य त्रिरात्रोपोषितो नरः । अश्वमेधमवाप्नोति स्वर्गलोकं च गच्छति । आरण्यकपर्वणि च करतोयास्नानप्र
वृत्तादिरोधाच्च करतोये सदानीरे सरिच्छ्रेष्ठे तिविस्मृते । आज्ञादयसि पापानां पापं हर करोद्भवे इति स्मृतिदर्पणे शाहत्तां कर राम. २०

तोयास्नानमंत्रविरोधाच्च । तस्माद्दत्सदुक्त एव पाठः । एवमन्येपि शिष्टाचारप्राप्ता यात्राधर्मा ज्ञेयाः ॥ ॥ इति यात्रानियमाः ॥ ॥ अथ ती
र्थप्राप्तिदिनकृत्यं ॥ ॥ तत्र यदि यानारूढः सोपानत्को वा गच्छेत्तदा तीर्थप्राप्तिदिने यानान्मार्गः पादचारेणैव गंतुं शक्यतावति
मार्गे यानोपानहादि परित्यज्य पादचारेणैव गत्वा तीर्थं दृष्टिपथागतं साष्टांगं प्रणम्य शिरोवगुंठनदास्युमाल्यकंचुकादि
परित्यज्य तीर्थं गच्छेत् । तदुक्तं । यानानि तु परित्यज्य भाव्यं पादस्पृशैर्नरैः । लुठित्वा लोठनीं तत्र कृत्वा कार्पटिकाकृतिं । लोटनी
लुठित्वेति साष्टांगं प्रणम्य । अष्टांगप्रणामलक्षणं पद्भ्यां कराभ्यां जानुभ्यां शिरसा वोरसा तथा । मनसा वचसा दृष्ट्या प्रणामोष्टांग
उच्यते । कृत्वा कार्पटिकाकृतिमिति गंधमाल्यशस्त्रकंचुकादिपरिहार उक्तः । यद्यापदि यानावाप्तकर्मे कार्पटिकाकृतिर्नेकृता
तदा प्रवेशदिने कार्यमित्यर्थः । तत्तत्तीर्थप्रवेशेषु प्राहुतफलादियुक्तमंजलिमनु तीर्थायनमः इति दद्यात् । यथाशक्तिफलव
स्त्रहिरण्यादिवोपढौकनिकं स्थापयेदित्यपि शिष्टाचारः । तदनंतरं प्रथमं चालभेत्तीर्थं प्रणवेन मलं मृदि ॥ अवगाह्य ततः स्ना
यात्पयावन्मंत्रयोगतः । प्रणवेन तीर्थस्य दृष्टातः पुनि जलमवगाहयेत् । सचैलं स्नायादित्यर्थः । काशीखंडे शिवशर्मोपाख्या
ने । आगस्त्य ह्यमणिकर्णिकाया मुदन्वहो स्मर्गतरंगीगींसः । सचैलमाप्लुत्य जलेमल इति लिंगात् । ततो मंत्रयोगतो मंत्रमनु
च्चार्य यथावृद्धिप्लुतक्रमाणैव स्नायात् । मंत्रस्यास्य प्रभासखंडे । ॐ नमो देवदेवाय शितिकंठाय दंडिने । रुद्राय चापहस्ताय चक्रि

गो देवयसे नमः सरस्वती च सावित्री वेदमाता गरीयसी। संनिधानी भवं तु त्र तीर्थपापप्रणाशनी। सर्वेषामेव तीर्थानां मंत्र एष उदाहृतः। इ
त्युच्चार्य नमस्कृत्य स्नानं कुर्याद्यथाविधिः॥ अत्र इत्युच्चार्य नमस्कृत्येत्युक्तेरयं मंत्रो न स्नानकरणे किं तु प्रार्थनामात्रे। स्नानक
रणत्वे च मंत्रलिंगबाधोपि स्यात्। यद्वायं मंत्रः सागरस्तु तीर्थे वेदे दृष्टः सुरांतक जगत्स्रष्टर्गंगा स्वर्दिन्नमामि त्वां तु रेश्वर। तीर्था
दद्य महाकाय कल्पांत दहनोपम। भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि। इमं मंत्रं समुच्चार्य तीर्थस्नानं समाचरेत्॥ अन्यथा तत्फ
लं स्यात्तीर्थे शोहरति ध्रुवं। अत्र नयोप्यमंत्रयोः प्रार्थनारूपकार्यैकत्वादिकल्पः। इदं च यथाविधिः स्नानं वपनानंतरं कार्यं। पूर्वमा
हृपयने तीर्थमुंडनं तदनंतरं। ततः स्नानादिकं कुर्यात्पश्चाच्छ्राद्धं समाचरेदिति वचनात्। यत्तु गत्वा स्नानं प्रकुर्वीत तत्र वपनं तदनंतरमि
ति वचनं तत्प्रैल स्नानविषयं॥ ॥ अथ तीर्थोपवासः॥ ॥ तत्र स्नानं कुर्याद्यथाविधि त्वेतदनंतरं चतुः उपवासं ततः कुर्यात्तस्मिन्न
हनि सुव्रत। तीर्थोपवासादेवेशि अधिकं नास्ति किंचन। पापानां पापशमनः सतामीप्सितकारकः। उपवासो विनिर्दिष्टो विशेषा
द्देवतायते। तीर्थोपवासं कुर्वीत तत्स्यात्तत्र वपनात्रे। वृषी च तीर्थयात्री च विधवा च विशेषतः। परान्नभोजने देवि यस्यान्नं तस्य तत्फ
लं। काशीखंडे। तीर्थोपवासः कर्तव्यः शिरसो मुंडनं तथा। नारदीये। तीर्थमासाद्य कुर्वीत नरः स्तुचिरूपोषणं। उपवासविसृष्टानां
कर्तव्यं कर्तुमर्हति। अत्र काशीखंडे। यद्दिने तीर्थप्राप्तिः स्यात्तद्दिनः पूर्ववासरे उपवासः प्रकर्तव्यः प्राप्तेह्नि श्राद्धदानमेवेति तीर्थप्रा राम॰ २१

प्तेः पूर्वदिने उपवासो विहितः। ततश्चोपवासं ततः कुर्यात्तस्मिन्नहनि सुव्रत। इति तीर्थप्राप्तिदिने न सहास्य विकल्पः। न च काशीखं
डस्य काशीमात्रविषयता। सकलतीर्थसाधारणविधिमुपक्रम्याभिधानात्। अत्र कश्चित्। चतुर्दशरात्रे वैतरण्यप्रमेभ्यापांसुब्रलरणा
पांतकृत्साग्निहुसंज्ञकप्रथमाहेरकाहाग्निष्टोमो नामातिदेशो नोपकलीन स्तु ब्रलरणाद्वानार्षमायेयी जाह्माद्दितीयादिवद्
र्शास्वहः सुत्यप्रकृत्यनुसारेणार्थत्यवस्तानमक्तमनुग्रहादपबाध्यते यथा तथा प्रस्तुतेपि प्राप्तिदिनोपवासविधायकवच
नाकानुरोधात्पूर्वदिनोपवासविधायकैककाशीखंडबाधान्नल्पबलत्वाभावात्पूर्वदिनोपवासः। आपस्त्य दारमारीस्युष
र्थायदत्तारकपवासवत्। सद्भावः करणस्यैव यथोक्ततीर्थसंभवात्। न तु तीर्थप्राप्तिनिमित्तस्याह। तत्रापि पूर्वदिनोपवा
स आवश्यकमंगं तदा तीर्थप्राप्तिदिनोपवासस्यापि नैमित्तिकत्वेनावश्यकत्वादुपवासद्वयप्रसंगोसकलशिष्टाचारविरोधश्च
न्यथानावश्यकः स्तदानिम्नवक्तृवचनविरोधः। किंच काम्यत्वे एतस्य फलांतरादृष्टांतरकल्पनाप्रसंगः। किंच प्राप्तिपूर्वदिनरूपका
लमाविधानाच्छायावमदृष्टांतरकल्पनाचनास्ति। न च वाक्यत्रिप्राप्तिदिनवत्शिष्टस्यैवोपवासस्य प्राप्तिर्येनोत्सन्निशिष्टगुणवच
दुत्पत्तिशिष्टो गुणो वाजपेयवं त्वनिविशेत। मुंडनं चोपवासं च स्नेवमादिवचनैः सरूपमानविधेयोक्तदिनपूर्वदिनरूपकालद्वयस्य
कर्मोत्तरैस्य त्रिपिष्टत्वेन तुल्यबलत्वादग्निहोत्रीयपाद्यादिवद्विकल्पोपपत्तेः। न च प्राप्तिदिने कर्तव्यमुंडनानंतरं तत्रा उपवास

स्यात्तद्दिनकर्तव्यत्वमेवोक्तत्रिवाक्येऽवगम्यत इति वाच्यं। पाठसाम्यकल्पत्वात्। काशीखंडवाक्यस्य सर्वदिनसाधारण्यश्रुतिविरो
धइवपांसिकन्यायेन पाठस्य क्रमाकल्पत्वात्। एवं च सर्वदिनोपवासवाक्यस्योक्तयुक्तिभिरानर्थक्यप्रसंगाच्च। नर्थकापत्तिरत्ता
नां विपरीतं बलमिति न्यायेन बहुभिरपि तद्दिनोपवासवाक्यैर्बाधनापत्तेः॥ यत्तु दशरात्रे द्विवह्वुत्तरोधाददोषश्चोदकेन
मघपि न प्राप्यते तथापि तइतिरिक्तांगप्राप्यरो न चारितार्थ्यं चोदकस्य। इह तु नित्यवत्क्रतुवाक्यानर्थक्यप्रसंगः स्यादिति वैषम्यं।
किंच काशीखंडे तीर्थोपवासः कर्तव्यः शिरोमुंडनं तथेति सर्वस्मुपवाससमभिव्याहारानंतस्याकेयदर्थीत्वास्मिन्सर्वदिनस्य कालवि
धानादुपक्रमानुरोधेनापि सर्वदिनोपवास एवाभिप्रेतः प्रतीयते। एतेन तीर्थोपवासपदाभ्यवरणात्सर्वदिनवाक्यं तीर्थोपवा
स एवाभिप्रेतः प्रतीयते। एतेन तीर्थोपवासपदाभ्यवरणात्र सर्वदिनवाक्यं तीर्थोपवासपरं। किंतु शरीरशुद्ध्यर्थोपवासविधाय
कमित्यपाकृतं भवति। उपक्रमवाक्ये तीर्थोपवासपदश्रवणादेतस्यापि तत्परतावगतेः। यत्तु मीमांसकंमन्यः कश्चिदेवं वदे
त्। मुंडनोत्तरोपदिष्टोपवासस्य प्राग्दिनापकर्षे मुंडनस्याप्यपकर्षः स्यात्॥ तिष्ठंतं पशुं प्रयजंतीति पशुतंत्रज्ञापकपंप्राजापत्यानां
गापकर्षवदिति। तदपि न। तत्र हि प्रकृतौ निर्ज्ञातक्रमाणामंगानां चोदकेन पशौ प्राप्तानां पश्चात्तनप्रयाजापकर्षे निर्ज्ञातक्र
मानुरोधात्सर्वेषामप्यपकर्षः। इह तत्त्वत्रिवाक्ये स्वरूपमात्रज्ञाने सति क्रमापेक्षायां प्राग्दिनप्राप्तिदिनबोधकवाक्यानां युगपदेव

प्रवृत्तेर्निर्ज्ञातक्रमत्वाभावस्योक्तत्वात्। दर्शे पूर्वेद्युरमावास्यायां वेदिं करोतीति सर्वदिनविहितवेदेः पुरोडाशाभिवासनांतपदार्थाने
नकर्षकत्ववदुपवासस्यापि तद्दिनकर्तव्यतापत्तिरित्यपास्तं। एवं चादौ कृत्वा तु उपवसनं सोमेश्वरसमीपत इति प्रभासखंड
वचः उपवासं ततः कुर्यात्तस्मिंश्चहनीत्यादीनि च प्राप्तिदिनोपवासवचांसि पाक्षिकत्वेन सर्वाण्युपपन्नानीति न काचिदनुप
पत्तिः। यत्तु काशीखंडे शिवशर्मोपाख्याने। ततो मायापुरीं प्राप्य इत्युपक्रम्य तीर्थोपवासं कृत्वासौ विशिजागरणं तथा। प्रातः
स्नात्वा च गंगायां तर्प्यं कृत्वा तर्प्यपलतः। यावत्स पारणां कर्तुमियेष द्विजसत्तमः। तावद्दीनज्वराक्रांतश्चकंपेत्यथमातुर इति प्रा
प्तदिनोपवासवचनं। तथा तत्रैव कलावत्युपाख्याने मालयवतो राज्ञः प्राप्तिदिने जागरादिकं कृत्वाप्यप्रातः समुत्थायेत्तभिधा
यपारणं कृतवान् सतत इति वचनं। ब्रह्मवैवर्ते च कामकलोपाख्याने प्रागत्य मारीकरांसीतु स्नात्वा दत्वाथ नैवद्य। वपनं कारयि
त्वा तु विधिवत्पुष्टापयोव्रता। जलमात्राहारेति वचनं तत्सर्वमुपाख्यानरूपत्वात्तदैवस्तत्वाच्च न सर्वदिनोपवासविधिं बाधते॥
यत्तु प्रागुक्तमुपवासस्यापि तीर्थप्राप्तिनिमित्तकस्य तद्दिनएवकर्तव्यतो [illegible] तान ननु सर्वदिनं। निमित्तस्याजातत्वात्॥
त्वन्यथा सति निमित्ते नैमित्तिकस्यापविरोधादिति। यत्तु मीमांसानतिदर्शिनं निबंधनं लोके भविष्यत्स्नानाद्यपि वृद्धे ग्रहे करो
तिदेव भविष्यत्तोरण्यंतरस्नानादेरेंद्रवाप्यवा यवाग्नताहो निमित्तदर्शीनात्॥ अत एवो के भविष्यत्कृता। अथ यदुक्ते सर्वेषामि

त्रि·से· २३

निमित्ते न भवितव्यमुत्तरेणास्मै मित्रिकेनेति नैतं त्रियोगमः भवति हि भविष्यदपि निमित्तमिति यथेमं लोके देवेच्छुनि मित्तत्वं दृष्टमितिर
भविष्यत्वमविष्यत्वमशेषमिति। एतद्वार्त्तिकन्यायस्य पत्रार्थे नुसंधेयम्। यदि तु भूते नैव निमित्तेन भवितव्यमित्याग्रहस्तथा
पि भविष्यती। स्ववधारितत्वेन भूतत्वान्निमित्तता संभवत्येव। तदप्याकूर्भद्याः। यदेकांतेनावधारितं तं त्रियं त्वमेवेति। तस्मा
त्पूर्वदिनोपवासान्न केवलपापक्षयार्थः किं तु तीर्थप्राप्तिनिमित्तकरवतिन तीर्थोपवासे प्राप्तिदिनं तत्पूर्वदिने वेति कालविक
ल्पसिद्धः तत्रापि पक्षे तीर्थप्राप्त्युद्देशप्रस्थानं कृत्वोपवासः एकादश्यादिवत्। अयं च तीर्थोपवासः फलविशेषार्थ एव न
त्वावश्यकः। तीर्थमभिगम्यत्वोपवासनिमद्युक्तस्त्वहमेवगाहमानस्त्रिरात्रमुषित्वा सर्वपापेभ्यो मुच्यते स्वस्तिमत्वफलक
त्वाभिधानादिति कल्पतरौ। तन्त्र पूर्वोदाहृतनारदीयादिवचनेनावश्यकत्वाविधानात्। देवलवचनं तु न तीर्थोपवासपरं अ
पि तु तिरिक्तकाम्यत्र्यहोपवासत्वात्। काशीखंडे शिवशर्मोपाख्याने। कलावत्युपाख्याने च तीर्थोपवासे प्राप्ते एवपारणाभि
धानादेकाहसाध्यत्वात्। तस्मादावश्यक उपवासः॥॥ अथ तीर्थे मुंडनं॥ ॥देवलः॥ ॥मुंडनं चोपवासश्च सर्वतीर्थेष्वयं विधि
ः। वर्जयित्वा कुरुक्षेत्रं विशालां विरजं गयां। विरजं मुत्कलदेशे। यत्र धर्मराजेन गयासुरनासौ विरजाद्रिः स्थापितः। तदुक्तं वायवी
ये। आक्रांते देशजठरं धर्मेणाविरजाद्रिणा। नाभिकूपसमीपे तु देवी तु विरजास्थिता इति। दक्षिणादेशास्थलोलार्कं तत्र भपि विरजं राम· २२

आदिसंयुक्तराज्ञोतस्पविरजत्वोक्तेः। एवं चैतेविधाने सिध्दिर्विरजेविरजोभवेदित्यादि। क्वचित्तु नैमिषं पुष्करं गयामिति पाठः। मिश्रा
स्तु पुष्करं गयामिति वा। अन्ये तु वर्जयित्वा गयां गंगामिति पठंति। तत्तु युक्तं। बहुनिबंधेष्वदर्शनात्। गंगाशौरविशायकत्वे
मासाबहुवाक्यविरोधाच्च। काशीखंडे। तीर्थोपवासः कर्तव्यः शिरसो मुंडनं तथा। शिरोगतानि पापानि यांति मुंडनतो यतः। त
था। उदकं शोणितं दृष्ट्वा पिंडं दद्यादमेध्यवत्। नोपतिष्ठति तत्सर्वं यदि नामुंडितं शिरः। स्कांदे। मुंडनं चोपवासं चेति देवलवचे
सर्वत्रप्राप्त्याः सर्वाणि तीर्थानि सिंप्रसिद्धं त्रिति बहुव्रीहिरा सर्वतीर्थशब्दस्य प्रयागमात्रपरत्वात्त्वैबोपवासवपने आहुः। तदसं
त्। एकवचने न विग्रहे अप्रपदार्थस्य प्रयागस्यप्रकृतत्वार्थस्यैकत्वात्तत्ता तीर्थदिकार्यबहुत्वाभावाद्बहुवचनानुपपत्तिप्रसंगे स
र्वो सर्वतीर्थेष्विति पदस्यासाधुताप्रसंगात्। एवं च सति यदुच्यते पक्षे कल्पनं विवहितं तं बहुत्वमिति तदर्भस्त्वावेशो दलितो।
बहुवचनस्यैवानुपपत्तौ विवक्षितत्वाविवक्षितत्वचिंतापानिरवकाशत्वात्। ग्रहं संमार्ष्टि। अत्र हि मस्वैकं ग्रहे चैकत्वस्य दर्शमा
नत्वादेववचनांतस्य साधुताया सर्वग्रहग्रहणार्थमेकत्वाविवक्षोच्यते। नैवं प्रकृते स्ति। अथैतद्दोषपरिहाराय सर्वाणि तानि
पीनि संति येषु तिष्विति बहुवचनं तेन विग्रहः क्रियते। तथापि प्रयागलक्षणानां सर्वतीर्थशब्दप्रतिपाद्यानामनेकेषामभावाद्ब
हुवचनानुपपन्नासाधुता तदवस्था। अथ यदेव प्रयागादीनि बहूनि प्रयागानि संति तस्मिन्यत्। तथापि तेषु सर्वतीर्थे समारूपा

वयवार्यभावाद्दहद्वीत्यर्थस्व कृत्ताभावाद्बहुवचनानुपपत्तिः सेयमेव तत्। यदि तु सर्वतीर्थानि देवाश्च वसंत्यत्राविमुक्तके। स
र्वतीर्थमपी गंगे त्र्यादिवचनालोचनेन सर्वतीर्थानामनेकेषां सत्ताद्बहुवचनोपपत्तिमुपपाद्य येहे कल्पयद्दहत्वादिदृष्यासिद्धे
सिद्धिः क्रियेत। तर्हि सर्वतीर्थशब्दानां बहूनां सत्त्वादेकैकत्र सर्वतीर्थवचनादीति संदेह एव स्यात्। ननु सितासितसंभेदाख्यप्र
याग एव तन्निर्णयः मकरस्थे रविर्णीय कस्याप्यभावादिति वक्ष्यमाणत्वात्। अयमप्रयोगो वपनं कुर्यादारणस्यां तत्तुल्यत्वे त्रि
स्थ्यादिनिर्णायकवचनान्तरैः सर्वतीर्थशब्दस्य प्रयागमात्रपरत्वात्तेन व्यादिव प्रयागादीनां बहूनां प्रयागाणां सत्त्वादिव क्वचित्
विशेषानिर्णयात्तानि रूपपदः प्रयागशब्दः स बुद्धिर्नास्तीति एते न निर्णय इति चेत्। अत्रा हि सर्वतीर्थवाक्ये सितसितेति विधेयस्तु धी
करणवदस्य मुपसंहारः स्यान्न तु तत्संभवति। तत्र हि पुरोडाशं चतुर्धा करोतीति सामान्यविधेः पुरोडाशमात्रविषयत्वेनास्पष्ट
त्वादाग्नेयं चतुर्धा करोतीति विशेषविषयनयोपसंहारो युक्तः। इह तु सर्वतीर्थेषु यं विधिरिति सामान्यविधेः सर्वशब्दवहुत्वद
न्वला दशेषार्थविषयतयास्पष्टत्वादुपसंहारासंभवात्। तदुक्तं सामान्यविधिरस्पष्टः संक्रिपेत विशेषणा इति। स त्वादिवे
संहारत्वेव वक्ष्यमाणवाक्ये स्तीर्थान्तरप्युपसंहारसंभवाच्च। नापि यदवाक्यवत्प्रयागवाक्यस्य सर्वतीर्थवाक्यबाधकत्वा।
तत्र हि त्र्यादवनीयवाक्यपदकाकोन विषयविशेषेण बाधेयिहोमं तत्स्वरूपविमयसद्भावात्। तं तद्बाधाभावे वैयर्थ्यप्रसंगस्याभा

वाद्बाध्यत्वमुक्तं। इह तु प्रयागवाक्येन सर्वतीर्थवाक्यबाधेविषयं तत्प्रभावाद्वैयर्थ्ये तैयापाधेत किंच। सामान्यस्य विशेषेणावा
धो भवति। न च सर्वतीर्थवाक्यस्य सामान्यता। प्रयागविषयत्वस्य त्वयांगीकारेणाविशेषविषयत्वात्। किंच। उपसंहारेणावा
च्यमाने सर्वतीर्थवाक्यस्य सामान्यरूपताप्रसंगात्प्रयागमात्रपरत्वे सर्वतीर्थशब्दस्याप्यनानंकथनं विरुध्यते। यत्तु प्रया
गेवपनं कुर्यादिन्यपंचापूर्वविधिः। प्रभासखण्डे। प्राप्तेषुत्वात्तु वपनं सोमेश्वरसमीपतः इति प्रभासे वपनं विधाय मुण्डनं चो
पवासं चेति वाक्यस्य तीर्थान्तरेषु मुंडनविधायकस्य सत्त्वात्। दैवलस्मृतो वा नारभ्य विधानात्। नापि नियमविधिः। सर्वतीर्थे
षु वाक्यं चेति वाक्यस्य तीर्थान्तरेषु मुंडनविधायकस्य सत्त्वात्। नापि परिसंख्या। तदा हि प्रयागे वपनमेव नान्यदिति वाच्यं न च्या किं प्र
याके नैव प्राप्तो अप्राप्तांशाभावेन तत्स्वरणाभावात्। नापि परिसंख्या। तदा हि प्रयागे वपनमेव नान्यदिति वा वचनं न चा किं प्र
सागरवपनमितिवा। आद्यः स्नानादिनिषेधसंगत्वात्। न द्वितीयः। प्राप्तबाधादिदोषत्रयापत्तेः। एतोऽस्य तु स्वादो यं न विधिरिति
केचिद्दूषितः। तद्विकल्पविधीपिकामाञ्जं। अपूर्वविधिसंभवात्। न च दैवलादिवचनेनैव प्राप्ते रपूर्वभावः। प्रयोगभेदेन कल्पे
भेदेव सेमानार्थानामपि विधित्वाहृतेः। अन्यथाऽनेकपारवाक्यानामग्निहोत्रीदि विधीनामनेकस्मृतिस्थानां च संध्यावंदना
दिविधीनामनुवादकतापत्तेः। प्रयागवाक्यप्राप्तत्वात्तस्य वानुवादकत्वान वाक्यप्राप्तत्वादस्यवेति विनिगमनाविरह
स्य किं देवमस्यानुवादत्वेव समाणानि तीर्थान्तरमुंडनवाक्यान्यपि अनुवादकानि समानन्यायतमाभवेयुः। न च बहूनामनुवा

दकता व्याख्याता। अनर्थकम्यानुरागः। अस्तु तत्प्रतितीर्थं प्रातिःस्विकमुंडनोपवासविधायकवाक्यप्रामाण्यं प्रातिस्विकमुंडनोप
वासविधायकवाक्यप्रामाण्यस्य मुदाप्यानुवादकता सर्वतीर्थवाक्ये स्यापद्यते। अलं सप्रपंचविवादेन। प्रकृतमनुसरामः।
अस्य च वचनस्याग्निपुराणवायुपुराणयोर्गंगामाहात्म्ये दुराणे च प्रभासप्रकरणपाठोके वाक्यप्रयागपरता माभूः। किंच।
सर्वाणि तीर्थानि संन्यन्तेति बहुव्रीहौ। दशकोटिसहस्राणि तीर्थानां वै महामते। सांनिध्यं पुष्करे तेषां त्रिसंध्यं कुरुनं
दन इत्यारण्यकपर्ववाक्यानुसारस्य। सर्वतीर्थानि देवाश्च वसंत्यत्रादिमुक्तके इति ब्रह्मवैवर्तवचनाच्च। काश्यामपि
सर्वतीर्थत्वात् तन्नापि प्रसंगः। एवं तत्र तीर्थेषु प्रशंसार्थानि सर्वतीर्थसद्भावप्रतिपादकानि गयाकाशीसंनिहितानि तानि तु विस्तरभया
न्नोच्यंते। तथा प्रयागस्थापितीर्थैः सर्वतीर्थापितं मलं। महापापिनां महापापं चंद्रहरे त्यापं च न सद्बलात्। इत्यादीनि च पंचनद्यप्रका
रणादिषु बहूनि निविरुद्धो न कार्यं तीर्थानां तत्रैव सत्वे। अथ योगमनपेक्ष्य रूढः सर्वतीर्थशब्द उच्यते। तत्र। तत्र प्रमाणाभा
वात्। एवं कुरुक्षेत्रे पसर्वतीर्थाभिषेचनं। माघवन्नी वक्तुं नेपायं तत्स्नादेवनस्य तीति मत्स्यप्रयागप्रकरणं पठितं वच
नं तत्र प्रमाणमिति चेन्न। तत्र। मत्स्यपुराणे हि अग्नितीर्थमिति ख्यातमग्निस्तु पञ्चमम्य बहूनि तीर्थान्युक्त्वा। अन्ये च बहवः स्नी
र्थाः सर्वपापहराः शुभाः। तेषु स्नात्वा दिवं यांति ये मृतास्तेऽपुनर्भवाः। एवं कुरुक्षेत्रे यस सर्वतीर्थाभिषेचनं। को वा जीवकृतेन्तय

नं तत्स्नादेवनं स्नातीर्थं तेसिधानात्प्रकृतसर्वतीर्थपरः सर्वशब्दो वगम्यते। तत्कथमेतद्बलात् सर्वतीर्थशब्दः प्रयागपरः।
किंच। सर्वाणि तीर्थानि च संति तत्र यत्राच्युतो दारकयात्रसेन इति सर्वाणि तीर्थान्यपि चाग्निहोत्रतुल्यानि नैवेति च पंचदा
न इति सर्वतीर्थेषु यत्पुण्यं सर्वतीर्थेषु यत्फलमिति सर्वतीर्थमयी गंगेत्यादौ सर्वतीर्थशब्दोऽनेकतीर्थपरो दृष्टस्तेन
नु प्रयागपरः। प्रयागसर्वतीर्थेभ्यः प्रवदंत्यधिकं विभो इति भारतवाक्ये चाविरुद्धं तत्प्रयागस्य सर्वतीर्थत्वात्। अपिच।
अग्निपुराणे माहात्म्यं सर्वतीर्थानां वदेऽपहृत्यमुक्तिदमुपक्रम्य गंगाकाशीप्रयागादि बहूनि तीर्थानि बहुभिरध्यायैरभि
धायांते मुंडनोपवासस्य सर्वतीर्थस्यापं विधिरित्युक्तं। तेन नानातीर्थविषयता न तु प्रयागमात्रपरतेति। किंच। तत्रैकती
र्थपरः सर्वतीर्थशब्दः पुराणेषु दृष्टस्तत्रैकवचनांत एव प्रयुज्यते। यथा स्कांदे रेवाखंडे मातृतीर्थकरणे। सस्याद्रेः प
रमं तीर्थं मातृतीर्थमिति स्मृतं। मातृतीर्थपरं ह्येतत् सर्वतीर्थं मुनीश्वराः। तत्र सर्वाणि तीर्थानि च वसमेत्य एकेति स
र्वतीर्थस्य वस्त्राना। सर्वतीर्थे नराणां स्नानं। सर्वतीर्थस्य वस्त्राना। सर्वतीर्थे नराणां स्नानं। सर्वाणि तीर्थान्येकतीर्थे न भूतानि
भविष्यतीत्यादौ। न चात्रैकवचनांतं प्रयुज्यते। अपि चातिपुण्येषु तीर्थेषु मुंडनविधायकवाक्यं सिपुराणे अपलभ्यं तर
वा तत्र काशीखंडे प्रथमं तीर्थराजस्थित्यादिना ग्रंथेन बहूनि तीर्थान्युक्त्वा मध्ये च तीर्थमायाप्रकारमभिधाय। तीर्थे

त्रि. सा. पवासः कर्तव्यः शिरसो मुंडनं तथा। शिरोगतानि पापानि यांति मुंडनतो यत इति सामान्येन सकलतीर्थविषये मुंडनमुक्तं। तत्र
२६ स्नानं प्रकुर्वीत विगाह्य विधिमेव सं॥ आदौ कृत्वा तु वपनं सोमेश्वरसमीपतः। ओंकारे मनसा ध्याय केशांस्तत्र परित्यजेत्। तत्र
स्नात्वा रवित्वा केशाभ्युस्नानेन समाचरेत्। यत्किंचित्कुरुते पापं पुरुषो वृजिनकर्मभिः तत्तत्पर्वतस्तु तेसर्वं केशेषु तिष्ठति।
तस्मात्सर्वप्रयत्नेन केशांस्तत्र परित्यजेत्। अश्वमेधसहस्राणां सहस्रं यः समाचरेत्। नासौ तत्फलमाप्नोति वपनाद्यत्फलं लभ्यते।
दुरकर्म न शास्तस्या योषितो नुवराननेः समर्थकारणात्तेनैव विधिं तासां स्मृत एष मे। सर्वान्केशान्समुद्धृत्य छेदयेदंगुलद्वयमि
त्येतावता भासीयं मुंडनं विधायांते प्रसंगात्सर्वतीर्थेषु मुंडनोपवासो विहितो। मुंडने चोपवासे च सर्वतीर्थेष्वयं विधिरिति।
व्रह्मवैवर्तेपि कामकलोपाख्याने काम्यं मुंडनोपवासान्यार्थदर्शनं। आगत्य मत्तीकर्णिकांतु स्नात्वा दत्वा धनं बहु वपनं कार
यित्वा तु विधिना मुद्राय यो व्रतेत। पयोव्रतं जलमात्राहारे स्यर्षेः। अन्यत्रापि स्नानादिके विषपादे तीर्थे मुंडनमाचरेत्। तीर्थोप
वासनियमं कृत्वा श्राद्धं समाचरेत्। तथा। उदकं शोणितं तद्द्यात् पिंडं दद्यात्पिंडं दद्यादमेध्यवत्। नोपतिष्ठति तत्सर्वं यो विना मुंडि
तं शिरः। तथा। मुंडनं चोपवासं च गोमत्यामतिदृढो गुरो। कन्यागते तु कृष्णायां न तु तन्नीरवासिनां। तथा गंगादिविषयेपि। यावंति न
खरोमाणि वा पुनाषे रितानि वै। पतिते जाह्नवीतोये नराणां पापकारिणां। तावद्वर्षसहस्राणि ब्रह्मलोके महीयते। तथा। गंगां राम. २६

प्राप्य सरिच्छ्रेष्ठां वपनं यो न कारयेत्। स कोटिकुलसंयुक्तमाकल्पं रौरवं व्रजेत्। गंगायां भास्करक्षेत्रे इत्यपि पाठः। तथा। गंगायां
भास्करक्षेत्रे मातापित्रोर्गुरोर्मृते। आधाने सोमपाने च वपनं सप्तसु स्मृतं। तथा। यावंति नखलोमानि गंगातोये पतंति
हि। तावद्वर्षसहस्राणि स्वर्गलोके महीयते। तथा। गंगां प्राप्य सरिच्छ्रेष्ठां कंपंते पापसंचयाः। केशानाश्रित्य तिष्ठंति तस्मात्तां
स्तु वापयेत्। गंगां संप्राप्य यो धीमान्मुंडनं यो न कारयेत्। क्रियास्तस्याक्रियाः सर्वाः स्त्रीषु द्रोही भवेन्नरः। एवं तत्तत्तीर्थेषु मुंड
नविधौ प्राप्यमाणेपि प्रयागादन्यत्र मुंडनाश्रवणात्तन्महत्वाह सं। यदपि गंगामुंडनविधायकवाक्यजातं कल्पतरुकारा
लेखनेन निर्मूलत्वमुक्तं। तदप्युक्तं। अस्थिक्षेपादिवाक्यानां सर्वपुराणेषु बहुतवर्णितं उपपुच्छदृश्यमानानां तदलिखितानां नि
र्मूलताप्रसंगात्। कल्पतरुकारादर्शनं निर्मूलतायां मानं न तु तदलेखनमिति चेत्। तद्दर्शनेपि किं प्रमाणं। न तावत्तदलेख
नमेव। पूर्वदोषापत्तेः। इतरेतराश्रयप्रसंगाच्च। न चान्यदनिर्वचनात्। संभवति वा तद्दर्शने कथं निर्मूलता। न हि कल्पतरुका
रः सर्वज्ञः परंतु स्वकाले। यदप्युक्तं गंगायां भास्करक्षेत्रे इति वचो वर्णयित्वा गयायां गंगो विशालमिति निषेधात्र सामा
न्यतो गंगापरं किंतु प्रयागावच्छिन्नगंगापरं निषेधवचनं तु तदनवच्छिन्नगंगापरमिति। तदपि निषेधवाक्ये तादृशपाठस्य
र्वमेव वा पुस्तकेष्वनिरुक्तं। किंचानेकेषां वचनानां सामान्यरूपाणां विशेषपरतायां विशिष्टवाक्यानुरोधादिति तेषां वाक्ये स

त्रि·स· वैदिकशिखानामधेयीयाज्ञवल्क्यनामभिक्षुकानामाचारेण बाध्यते। अवैदिकानां तु कालत्यागीरस्तात्तात् दृष्टं भद्दचरैरोः
१० अतः शास्त्राभिक्षुकानामार्यावर्तनिवासिनां। याममतिः सेवकर्मीगंगश ब्दार्थत्व प्रमाममतेति। किंच। सर्वतीर्थशब्दस्य प्रया
गपरतायां बहुवचनानुपपत्तिश्च न च पट्टहोद्दिश्य प्रयागमात्रपरतायां यद्देशं प्राप्ति इति यदविवक्षा बहुधात्व साधनाप्र
संगेन विवक्षा। विवक्षात्रितापादि रवकाशत्वस्य पूर्वमेवोदितत्वात्। किंच बहुवचनाविवक्षा नास्मत्पक्षविरोधिनी किंतु
नुकूला। नचैवं तत्प्रतिकूलात्तत्पक्षे। यस्य पुरोडाशो क्षायतः। यस्य सर्वाणि हवींषि नश्येयुर्वा प्रयाजशेषेण हवींष्यभिधार
यतीत्यादिवदुद्देश्यगतसंख्याः विवक्षायामेव प्रतितीर्थं मुंडनं सिध्यति। विवक्षायां तु समुदायस्यैवास्यात्र तत्पक्षेकावष्टित्वं स
स्कार्योद्देश्यविशेषणत्वाभावात्प्रत्येकत्वं वदविवक्षा। निमित्तरूपोद्देश्यविशेषणत्वाभावात्। नह विरुभयत्वं वदितिद्रव
राणाह। तत्र न हि तत्र संस्कार्यनिमित्तत्वेन्यायशरीरं तद्गते। उद्देश्यविशेषणत्वेनेवाभयत्राविवक्षासिद्धेः। उभयार्थ्यधिकर
णस्यपोनरुक्त्यं तु निमित्तस्वरूपं तद्गतमेवोभयत्वं तत्तु निमित्तविशेषणमित्यधिकाशंकायां निराकियत्वामाणत्वारि
हर्तव्यं ननु संस्कार्यनिमित्तरूपविषयभेदेनम्भन्यायस्य पुरोडाशो क्षायतः यस्य सर्वाणि हवींषि नश्येयुरिति निमि राम·
त्तोदाहरणं प्रयाजशेषेण हवींष्यभिघारयतीति वा संस्कार्यहविर्बहुवचनोदाहरणं वार्तिककारीयमसंगतं स्यात्। अत्र तत्र २१

वाक्यभयार्थ्यधिकरणेपार्थसारथिमिश्राः। ग्रहाधिकरणन्यायेनोद्देश्यविशेषणमविवक्षितमिति स्थितमेव न तु निमित्तस्व
रूपमविवक्षितं इह तु यथा नार्तिमात्रं हविर्मात्रं वा निमित्तं मिलितं तत्तु निमित्तमेव न तु निमित्तमेवमुभयशब्दान्नानात्वमपि
मिलितं निमित्तमस्तीति। भट्टसोमेश्वरा अपि उद्देश्यविशेषणादिलक्षणायां वाक्यभेदापत्तिलक्षणस्य न्यायस्यादिवक्षासाध
कस्य तुल्यत्वेपि पयोभयपदानर्थक्यपरिहाराय भंयत्वस्योद्देश्यांतर्भूतत्वेन विवक्षाशंकाधिकारे तेहोदाहरणत्वमित्याचाक्षुः। अ
पिच। अत्र अपि निमित्तत्वे संस्कार्यत्वे वा उद्देश्यत्वादेव प्रयाजशेषं हविष्यु लक्षणा रयोदिति यदविवक्षाकथं न भवेत्। वस्तुतस्तु सर्व
तीर्थोद्दिष्टिति निमित्तरूपतीर्थविशेषणत्वादेव बहुत्वस्योभयत्ववदेवाविवक्षा संभवत्येव। किंच। बहुवचनाविवक्षाकमेधारण
अपरे तु न प्रतितीर्थं मुंडनपक्षेपि न विरुद्धा किंत्वनुकूलेव। अन्यथा सर्वतीर्थसमुदाय एव मुंडनं स्यान्न प्रतितीर्थमित्युक्तं। अ
तो यस्य पुरोडाशो यस्य सर्वाणि हवींषि प्रयाजशेषेण हवींषीत्यादिवदुद्देश्यविशेषणत्वेन बहुत्वाविवक्षा या आवश्यक
त्वात्तुल्ययोगक्षेमत्वाच्च प्रयागमात्रमुंडनवादिनं प्रति अविवक्षाया अप्रवृत्तिकपनं विवक्षापादकतयोरपक्षे रूप्ति
करत्वेनात्यंतानुकूलं। तस्माद्दसदुक्तप्रकारेण निरवकाशतानुकूलता प्यामेव प्रत्येकत्वाधिकरणन्यायेन सोह्य रा
पदं सकलस्वपक्षविवादेन। किंचाव बहुव्रीहौ पददयार्थस्याप्राधान्यप्रसंगादन्यपदार्थलक्षणाप्रसंगाच्च निपाद स्वपतिश

त्रि·स्था· २८ द्वंद्वषष्ठीसमासाद्यपेक्ष्या बहुव्रीहितः कर्मधारयस्य बलवत्त्वात्॥ पदार्थद्वयाभावान्वालक्षणाभावाच्च। एतेन राजपुरोहितौ सा
मुत्र कामो यजेतानामित्यत्र तु कृत्विपस्यापौरोहित्यनिषेधादेवैकाधिकरण्यसिद्धकृत्रियवाचिराजशब्दवाच्ययोः पुरोहितत्वा
संभवात्कर्मधारयबाधेन द्वंद्वोंगीकृतः। इह तु कर्मधारयेण न किंचिद्बाधकमस्ति। अथ कर्मधारयेपि वाप्यानेकतीर्थरूप
त्वात्प्रयागस्यैव सर्वतीर्थशब्दार्थ इत्युच्यते। तदपि न। तदा हि बहुत्वं विवक्षितमविवक्षितं वा। नाद्यः। उद्देश्यविशेषणत्वेनावि
वक्षायाप्रसंभवात्। नान्त्यः। विवक्षाव्यतिरेकेणानेकतीर्थसमूहरूपप्रयागालाभात्प्रतितीर्थमुंडनप्रसंगाच्च। तस्मान्न बहु
व्रीहिः कर्मधारयो वा युज्यते। अथ बहुव्रीहेरेकप्रयागार्थत्वेपि अदितिः पाशान्प्रमुमोक्त्वेतानित्यत्रैव तीर्थबहुत्वाभिप्रा
येणाक्षौदसंप्रत्यनार्थे वाऽऽचार्यास्त्विन्द्रादिवत् बहुवचनमुच्येत। तदप्ययुक्तं। आंजस्येन गतौ संभवे त्वां अनन्यगतिकत्वं
दसत्वादिगतेः। एवं कृत्वा। अपि च। न चायीयोमीयप्रकरणपठितस्य बहुवचनयुक्तस्य मंत्रस्य प्रकरणएव कां दसत्वे
न बहुवचनं वा यवस्थितिवदेकविषयमेवांगीकृत्य निवेशउत बहुपाशकेषु पशुगणेष्वेकार्थ इति संदिह्य प्रकरणगतैक
पाशे बहुवचनस्यासामर्थ्यादुत्कर्षः सर्वपदहृपित्वा प्रकृतार्थस्य पाशस्य विभक्त्यर्थस्य कर्मकारकस्य च प्रकृतौ सत्वा राम· २८
दप्रधानभूतबहुवचनमात्रानुरोधात्प्रधानभूतस्य प्रातिपदिकस्य कारकस्य वा बाधितिपाद्यायाः मंत्रस्योत्कर्षासंभवात्किंतु

शमात्रार्थं बहुवचनं द्विपत्नीकप्रयोग इव पत्नीसंनह्येत्येकवचनमवयवाभिप्रायं वेति युक्तं नावमिकन्यायेन वक्तुं। अत्र त
क्व बहुत्वबाधकत्वप्रात्प्रयागपरत्वासंभवात्किमनुरोधेनेकादशत्वमवयवाभिप्रायत्वं वेति। अपि च। सर्वतीर्थवाक्यस्य प्र
यागमात्रपरत्वानंतावत्पुरि संख्याव्यतिरेकेणालभ्यते। तत्र च कीदृशी परिसंख्या। किं प्रयागएव मुंडनमिति वा प्रयागे मुं
डनमेवेति नकावदंत्यस्नानादि निवृत्तिप्रसंगात्। न प्रथमः। पित्रादिमृतौ मुंडनाभावप्रसंगात्। अथ तीर्थाधिकरणकं मुं
डनं प्रयागएव नान्यत्रेति चेत्। काश्यादितीर्थाधिकरणकपित्रादिमृतौ तदभावप्रसंगात्। अथ तीर्थनिमित्तकमुंडनं प्रया
गएवेति चेत्। तथा सति तन्निमित्तिकमुंडनस्य परागतः प्राप्त्यभावात्। शास्त्रतः प्राप्तिः सामान्यतस्तीर्थमात्रेंगीकृता स्यादिति
तीर्थांतरे मुंडनविधानमेव नास्तीति वदतो भवतः स्वोक्तिविरोधः। विकल्पद्वयेपि प्राप्तबाधादिदोषत्रयापत्तिश्च। किंच मुंडन
विधेरस्य प्रयागमात्रविषयत्वे आग्निवायुपुराणयोर्गयाप्रकरणे पाठो नोपपद्येत। किंवा मुंडनविधौ सर्वपदस्वारस्यादपि
सर्वेषु तीर्थेषु मुंडनं। न च सर्वपदस्य संकोचे तिप्रसंगः। प्रभावादद्भुताद्भूमेः सलिलस्य च तेजसा। परिग्रहान्मुनीनां च तीर्था
नां पुण्यता स्मृतेति भारतस्थभीष्मवाक्येन सातिशयफलस्य स्थलस्य फलस्य च तीर्थत्वाभिधानात् घटकश्चित्स्वदेशान्निर्ग
तस्तस्नायगादावपि मुंडनो यथा प्रसंगादिति वाच्यं। पुराणोपुनीतोर्थोद्देशपरिगणितप्रसिद्धमहातीर्थपरत्वात्सर्वतीर्थशब्द

त्रि.सा. स्यापेक्षत्वतीर्थेषु मुंडनं विशेषवाक्यैर्विहितं तत्सरलत्वाच्चा सर्वत्र माधिकारिकमिति न्यायात् । न च प्रयागातिरिक्तेषु मुंडनविध्य
२९ भाव एवेति वाच्यं । प्रभासकाश्यादौ तद्विधायकवाक्यानां पूर्वमेवोक्तत्वात् । यदपि गंगायां भास्करक्षेत्र इति वाक्ये भास्क
रक्षेत्रे प्रयागमप्युपेत्य सामानाधिकरण्यंगीकारेण प्रयागवृद्धिं व्याख्यां गंगायामिति कस्यचिद्व्याख्यानं । तदप्ययुक्तं । प्रयाग
स्य प्रजापतिक्षेत्रत्वस्य वक्ष्यमाणत्वात् भास्करक्षेत्रत्वाभावात् । तत्र यः सवितुः क्षेत्रे प्राणान्स्त्यजति मानवः । ससूर्यलोकमा
प्नोति यदेवप्रक्षोदन्ते दीव्यति कोणादित्यादिमाहात्म्यात् तदादेरेव भास्करक्षेत्रत्वावगमात् । किंचाविशेषणविशेष्यभावेन व्याख्या
नेषद्वापते : सप्तस्विति संख्यानुपपत्तिश्च । गयायामित्यस्य व्यर्थतापत्तिसंगश्च । किंचावपनविधेः प्रयागमात्रपरत्वे तीर्थान्तरे प्राप्तेरेवा
दूर्जयित्वेति विशेषनिषेधोऽनुपपन्नः स्यात् । अपकृष्यते । यथा मौंजीबन्धं गर्भवतीति विशेषविधिनैव माघादिनिवृत्तौ सिद्धायां पुनरप
ज्ञिया वै माषा इति वाक्यं प्रति । निषिद्धत्वेनापि माषानयात्वात्र संज्ञायज्ञियत्वादित्येवंपरं तथा गयादिवपननिषेधोऽपि अत्रात्मं ता
प्राशस्त्यपर इति । तत्र कश्चिदाह । मुंडविधिविशेषत्वात्तत्र शेषार्थस्यायज्ञिया इत्यस्य प्रतिनिषिद्धत्वेनापि माषा नोपादेया इत्ये
व समर्थितानसंभवतानिरायादिविधियुक्ततावेवनात्पर्यतातेनोनाकृतिर्वै जर्तिलास्वमनवीक्षुकाम्येत्यादिवत्रहि निंदानिंद्यं रा.म.
निंदितुं प्रवर्त्तते अपितु विधेयं स्तोतुमिति न्यायेन मुंडताया वपनात्सर्वत्रानुमायाराजमसंज्ञतापत्तिपत्तेः । किंचाप्रपशवो वा अन्ये । २९

अपशवो वा एषः । अयज्ञिया वै माषा इत्यत्र नञः पर्युदासे शब्दलक्षितं प्राशस्त्यं निषिध्यत इति अप्राशस्त्यपरता भवति । तदुक्तं । ग
वाश्वादिगतानां सर्वमुपादाय प्रशस्ततां । तदभावोन्यपश्वादेनत्र मासेन कथ्यत इति । वर्जयित्वेत्यत्र तु नञोऽभावमात्रप्राशस्त्य
परत्वं स्यादुक्तं तत्रतु कर्त्तव्य मत्स्यो वा हनवर्जितमिति पदात् तीर्थश्राद्धेषु वर्जयेदिति वचः । किंचा वैदिके प्रतिनिषेधुपादानस्य वच
नं विना ऽभावान्माषाणां प्रतिनिषिद्धत्वेनानुपादानं वचनाभावादेव भविष्यतीति किमयज्ञिया माषा इति प्रतिषेधेनात्र माषप्र
तिषिद्धस्य प्रतिविधानंतरमश्रंतदोषज्ञापनार्थं भवति । तदुक्तं । पश्चादावपि वर्जिते पलमुखे मांसाशने पंचदशपत्संगे च वर्त्तु
ईप्सानि किंचित्तदोषाधिकत्वायतदिति । प्रस्तुते च निषेधांतरस्याभावात् अप्यादि वपननिषेधस्य नासंज्ञाप्राशस्त्यपरतेति । तदत्ति
वहिर्मुंडं । प्रायश्चित्तीयपादस्य बाधिकरणे प्रतिषिद्धं चाविशेषेणाहितक्रतुनिरिति सूत्रे अयज्ञिया वै माषा इत्यस्य प्रतिषेध
परतामंगीकृत्य प्रतिषिद्धं च न प्रतिषिद्धमिति वदता सूत्रकृता भाष्यकृता च प्रतिनिषिद्धप्रतिषेधपरतांगीकारात् । तथा च कु
तो मुंडविधिविशेषता कुतस्तरां अनाकृतिर्वै नर्तिला इति वत्तोऽतात्पर्यं कुतस्तमानपशव इत्यादिस्वारस्यभंसक्तो न च भाव
तद्वेषस्य प्रतिपादनं । तदपि वैदिके प्रतिनिषिद्धोपादानं वचनं विना नास्तीति । तदप्यसम् । मांसकान्यतिशोभते तत्रैव तत्तुर्या
धिकरणे प्रतिनिषेधोऽयमसिद्धताया उक्तत्वात् तुत्रापि वाचनिकत्वाभावात् । यदि सोमेन विंदेत प्रतीकानभिषुणुयादित्यादेरपि
१

त्रि.स्था. ३०

नियमार्थः क्षौरविधिरिति न तस्य तत्र एव नियममात्रार्थत्वस्यैवोक्तत्वात्। तदपि प्रतिषिद्धस्य प्रतिषेधोऽत्र दोषज्ञापनार्थ इति तदपि
सर्वतीर्थविधेः परिसंख्यार्थतयाऽन्यत्र वपननिषेधात् पुनर्गयादौ निषेधोऽयं तद्दोषार्थ इत्येवं प्राशस्त्यवादिनेत्यापन्ना
सुपरिहरमेव। तस्मादयज्ञियाद्भूतत्वं वर्जयित्वा गयाभिन्नतस्यैवं दूषणं यत्तद्दिमुण्डादिमेये देशे विहितेषु त्वद्व्या
लाभे तत्प्रदेशे प्रतिनिषेधमिति न्यायान्तु क्रमाद्देश्येन माधारणमुण्डाभावे प्रतिनिषिद्धता प्राप्तौ तद्विधेयार्थ अयतियताकथनं न
युज्यते ऽऽइह तु गयादौ मुण्डन क्षौरे कानङ्गीकाराद्विधेयायोगात्किमर्थमत्यन्तप्राशस्त्यकीर्तनं। किंच। अप्राशस्त्यकथने किं
अनाकृतिर्वर्जनीला इति विधेयपर्यस्तत्त्वार्थमिव विधेयप्रयागवपनत्वं स्वार्थ्या किं वा। अयज्ञियो वै माषा इति वद्भुपादि वपनानि
षेधार्थं। नाद्यः। भवतो गयादौ न वपनस्याप्यकाभावान्निषेधायोगात्। अवसन्नतापत्तेश्च। नापरः। अनाकृतिरितिवदत्र नञभावा
दप्राशस्त्यद्वारा स्तुत्यप्रतीतेः। वाक्याद्विपादत्वापत्त्यं वर्जयेद्यातिभोजनमिति वद्दर्व्याद्दन वर्जयतिनानिषेध्येऽव
प्रतीतेः। अप्राशस्त्यपरत्वे लक्षणाप्रसंगाच्च। अथ प्रयाग एव वपनविधिनाऽन्यत्र तन्निवृत्तावपि दोषाधिक्यज्ञापनार्थो
गयादिनिषेधस्यात्। अथवा सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितमित्यत्र यदि संख्यांवादिनां परिसंख्यादिवरणार्थत्वमि राम ३०
पनांतराभोजनं कुर्यादग्निहोत्रसमो विधिरित्यस्य गयादि निषेधः स्यादिनद्विवर - - - - - - - - - - -

रार्थता स्यान्नामेवं। उभयथापि परिसंख्यातापत्तेः तस्याप्यपूर्वमेव दूषणात्। परिसंख्याविवरणपरत्वं तागयादिपरिगम
नानर्थकात्व। नान्यतीर्थे इत्येतावन्मात्रस्य वक्तव्यत्वात्। नांतरिक्षे न दिवीत्यादिचेतव्य इति वन्नित्यानुवादः। किं न स्यादिति
चेत्। नैवं स्यात्। तत्र हि अंतरिक्षे दिवि वपनस्यासंभवादेव नित्यानुवादः। इह तु प्रयागादन्यत्र वपनस्य संभवान्नित्यानुवादता
नामांतरे रानर्थक्यापातश्चेत्सलं बहुनाकं ठदोषेण। यद्यपि वाक्यस्वरसाद्व गयादिव्यतिरिक्तेषु सर्वेषु तीर्थेषु मुंड
नोपवासौ इत्युपमर्थो भाति तथापि कुमन्तु कृ कुक्षि सिरस्त्वबुद्धीनां श्रमो मा भूदिति मन्यानयं द्वयग्रन्थाः सः कृतः।
तिर्द्धु कुरुक्षेत्रादिव्यतिरिक्तेषु सर्वेषु प्रसिद्धमहातीर्थेषु मुंडनोपवासाविति। ॥ इदं वक्तुं दशमासानंतरं पुनस्तीर्थप्राप्तौ कर्त
व्यं। संवत्सरे द्विमासे वा नेपुनस्तीर्थं व्रजेद्यदि। मुंडनं चोपवासं च ततो यत्नेन कारयेदिति स्मरणात्। दशमासोत्तरप्राप्ता
वपनं कार्यं। अंतरा तु फलेच्छया भवति न तु नियम इति यत्नेनेत्यस्यार्थः। प्रयोगे तु विशेषं वक्ष्यामः। अत्रेदं चिंत्यं। मुंडने किं
पनं करिष्य इति संकल्पः कारयिष्य इति वा। तत्र केचिदाहुः। प्रयोगे वपनं कार्यमित्यादि विधिभिस्तीर्थप्राप्तिनिमि
त्तकवपनस्य विहितत्वप्रतीतेर्वपनस्य निमित्तरहितेनेनापि नेनव सर्वं क्रियमाणत्वाच्चैवनिर्विध्यायोगात्। गंगाप्राप्य स

त्रि॰ सा॰ ३१ रिक्थेशांवपनंयोनकारयेदित्यादिवाक्यस्वरसाद्याकारयेदित्यर्थेकुर्यादितिशिष्टावोलोपेनलिङ्शब्दापनस्यैवविधानाद्धिहितैसे
वदफलात्तयाफलवतएवकर्त्रन्वितासधयोक्त — — फलकामोवपनंकारयिष्यइतिसंकल्पः।नचवपनंकुर्या
दितिविधानाद्विधिशब्दएवंप्रयोज्यइतिन्यायात्करिष्यइतिसंकल्पइतिवाच्यं।तस्याद्दृष्टार्थशब्दस्वरूपतात्पर्यकमं
त्रदेवतादिरूपशब्दविषयत्वात्।इहतदर्थमात्रेतात्पर्यंप्रयाजादिविधिवत्।अन्तरवाविधिशब्दस्यमंत्रत्वेभावःस्या
त्रेनचोदनेतिसूत्रेजैमिनिनामंत्रत्वइत्युक्तेः।एवंवचनत्वयातात्पर्यकेविधौसंनिधसमस्तयज्ञेहिशब्दप्रयोगेकिमिमवा
वकंप्रयोक्ष्यामहइतिन्यायेनवपनंकारयिष्यइतिवासंकल्पोवापनंकरिष्यइतिवा।नत्तुवपनंकरिष्यइतिवाच्यमिति।एत
न्नयुक्तं।वपनंयोनकारयेत्तस्मात्तात्परिवापयेत्तयागेवपनंकुर्यादित्यादिरूपेणविधीनामुभयरूपत्वेपियानिका
र्येतस्मात्तात्परिवापयेमिवपापानिव्रजंस्तत्तस्मात्तिवाकेशानाश्रित्यतिष्ठंतितस्मात्केशान्वपामहइतिमंत्र
लिंगाद्वापनंकरिष्यइत्येवंसंकल्पस्यो — चितत्वात्।नचबाधादल्पायाप्रतीतिः।केशवियोगसंविधानएववपन राम॰
शब्दप्रयोगाद्बाधाभावात्।केशश्मश्रुवपनेनरवानिनिकृंतेतेत्यादिवत्।अन्तस्त्वयथापदाहवपनीयेनुहोतीति।। ३१

वचनादाहवनीयाधिकरणकद्रव्यप्रक्षेपस्यहोमत्वात्तस्यचाध्वर्युकर्तृकत्वाद्यजमानकर्तृकत्वाभावेपिकाम्यहोमेष्वाध्वर्यु
कर्तृकत्वपक्षेग्निहोत्रहोमेचास्तुकेहोमंकरिष्यइत्येवसंकल्पः।यथावासमारब्धामावयनस्याध्वर्युकर्तृकत्वेपिप्रजाकामो
नाभिदद्यविन्वीतेत्यादिवपनादेरमुककामम्भवयनंकरिष्यइतिसंकल्पस्तथात्रापिएवंचाग्निंचिन्वानेभ्यःअग्निर्मेदे
विग्रहकयनेह्वानांयुज्यते।एवंदृष्टोऽपिपाणिरूपनिमित्तवत्स्वपिसंविधानरूपोवपनशब्दार्थोवर्ततएव।यानितुवपनेमो
नकारयेदित्यादीनिलिङःगर्भिणीवचनानितानिपर्यवसितार्थमादायापियुज्यन्ते।यत्तुअर्थमात्रतात्पर्यकत्वादिविश
ब्देतात्पर्यांभावइति।भवत्वेवंतथापिविधिप्रतिसंधानपूर्वकानुष्ठानेबुद्धिस्थत्वात्प्रायश्चित्तसंकल्पेविधिशब्दएवन्याय्यः
अतएवगुणफलोपबंधवत्संकल्पादिव्यवहारोपिनामधेयप्रयोजनमवादिमीमांसामांसलैः।योप्यसत्याघत्तर
त्यादिस्तोयसत्याव्ययमविषयः।उक्तयुक्त्याप्रत्यापकत्वापपत्तेरवाचकत्वाभावात्तत्पाम्यहमितिमंत्रलिंगस्यैवनियाम
कत्वेनासमदायवत्वाभावाच्च।यदा।वपनशब्दोनानार्थः।तत्रकदाचित्केशवियोगसंविधाना
त्मकंप्रयोजककर्त्रापारमाहकदाचित्तुप्रयोज्यव्यापारं।यथावपनंकृतंवपनंकारितमित्युभयथापिप्रयोगात्।तत्रप्रकर
णादिलब्धान्तरसमभिव्याहारःतात्पर्यग्राहकः।यदाकुर्यादितिसमभिव्याहारस्तदाप्रयोजकव्यापारतात्पर्यदानुकारयेदिति

यकानिनतु तक्र्मस्यापि गौरवाद्दा कमेदप्रसंगाच्च। तस्मात्मास्तपूर्वकमेव वपनं। तथा च

त्रि.स्था. ३२ त्वसमभिव्याहारस्तत्राप्रयोज्यव्यापारपरत्वेति। एवं च सति मंत्रलिंगबलात्प्रयोजकव्यापारकेस्सेव प्रकाश्यत्वाद्वपनं कारयित्वा स्नात्वे
व संकल्प इत्युक्तं बहुज्ञैः॥ इदं च वपनं केशश्मश्रुक्रमेण कार्यं॥ गालवस्तानं प्रकुर्वीत वपनं तदनंतरं। ... तरो वपेत्केशान् श्मश्र
श्रूणि ततस्तानि कृंतयेत् इति ब्रह्मपुराणवचनात्। केशश्मश्रुलोमनखान्युदकांते स्थानिवापयेदित्यपरार्कलिखि
न वचमेप्रमीतपाठक्रमानुसारात्। सकेशश्मश्रु वापयीतादिकन्नोदर्शनाच्चेति केचित्। अन्ये तु। एतानि वचांसि के
शादिवपनमात्रविधायकानि न तु केशप्रथमवपनविधायकानि। केशश्मश्र्वादिवपनप्रयोगं साधयंते। देवा वै यज्ञे कुर्वत। तदसु
रा अकुर्वत। ते ऽसुरा ऊर्ध्वे इष्टे अपोना पश्यन्। केशानेवाग्रे वपंत। अथ श्मश्रूणि। अथोपपक्षौ। ततस्ते वा अवाञ्च। पराभ
वन्नायस्यैवं वपंति। अवाङेति। अथो परैव भवति। अथ देवा ऊर्ध्वे इष्टे अपोपश्यन्। त उपपक्षावग्रे वपंत। अथ श्मश्रूणि। अ
थ केशान्। ततस्ते भवन्। सुवर्गं लोकमायन्। यस्यैवं वपंति। भवत्यात्मना। अथो सुवर्गं लोकमेति। अपि तन्मनुर्वर्तते मिथु
नमपश्यत्। स श्मश्रूण्यग्रे वपत। अथोपपक्षौ। अथ केशान्। ततो वै स प्रजाया पशुभिः प्राजायत। यस्यैवं वपंति। प्र प्रजया प
शुभिर्मिथुनैर्जायते इति। एवं च श्मश्रुक्रमो राक्षो वपने कुशांग्लेच्छ वेदकृता लोकविद्विष्टतापि न भवतीत्ययं बहुसंम रा.म. ३१
तः पक्षः। तत्राप्युदकांते स्थितायेदक्षिणाश्मश्रुवपनपाठो। पित्रादिमृतौ तु दक्षिणासंस्थताय तामश्मश्रुलोमनखान्युदकांते स्थानिता

पयेत्। दक्षिणां कर्णमारभ्य धर्मार्थं पश्चसंवपेत्। शिखावर्जं नवसंस्कारे शिखाद्यंतं हि सेयत्। धर्मार्थेत्तीर्थादिवपनेदक्षिणा
कर्णाद्यारभ्य स्वयं वपेत्। पापसंव संस्कारे शिखा वं नशिरो पत्। धर्मार्थे तीर्थादिवपने दक्षिणाकर्णाद्यदकं स्वयं वपेत्। पा
प संवयति मिन्नके शिखामादी इत्या धर्मार्थं तो वपेत्रोदकां स्थ। नव संस्कारे चूडाकरणे दक्षिणाकर्णाच्छिरसं तेशिखा
मास्ववापकर्णांते वपेदिन्त्युत्तरपघार्थः। इदं वपनं पश्चादिभिः शिखामरक्षितैव कार्यं। यतिः मदश्चविश्वासशिखं वप
नेचरेदिति वचनात्। तत्रपतिभिः कक्षोपस्थशिखावर्जं क्रतु संधिषु वापयेदिति क्रतुसंधिष्वेवेतिपरिसंख्यानादतत्संधि
व्यतिरिक्तकाले तीर्थप्राप्तावपि न कार्यं। पतिशिखानामाचारोप्यसमेव। आहिताग्निभिस्तु पर्वव्यतिरिक्तकालेपि तीर्थे निमि
त्तकं मुंडनं कार्यं। एतस्येति कृतपापित्यादिमरणनिमित्तकमुंडनवत्पर्वनियमाभावात्। आचारादश्नीत्वसित्वके
पितीर्थे मुंडनं कार्यं। विना तीर्थं विना यज्ञं मातापित्रोर्मृतिं विना। यो वापयति लोमानि स पुत्रः पितृघातक इति वचना
त्। अत्र तु नयदपदशाक्षीव विकविषयता। अन्यथा सपित्रघातक इत्येवावसन्तात्। मुंडनवचनानां च गर्भवासितकसा
धारणत्वात्। न चापि तीर्थांतरे आपयान्नापामेव। प्रयागेतु प्रतियान्नमिस्याद्धः। तीर्थे च मुंडनं निषिद्धकालेपि कार्यं। निषि
द्धिश्च। दशकद्गार्ग्यः। रव्यारसौरिवारेषु राशौ पाते च नाड्ह्निशोदाह प्रतिपदिक्षामश्च। क्षौरे पुद नियेत्। आरोमान्सो

कि.सा. रिः शातिः पाणोप्यत्रीपातः । रिक्तासु तुर्थी नवमी चतुर्दश्यः ॥ भद्राः द्वितीया सप्तमी द्वादश्यः । गार्ग्यः । षष्ठ्यपात्पूर्णिमा पातश्चतु
३२ र्दश्यष्टमी तथा । अमासुसंक्रांतिदिने पापं विष्टौ चेलभंगे क्षौरे । व्यासः । न कुर्वीत तु न कुर्वीत यस्मिन् जातो भवेन्नरः । नक्षत्रे च
दग्धे कार्यं नैवा वैयेत भारतः । दारसंग्रहे तु सर्वं पुष्ट्यतां तु वर्जयेत् । तथा । कुंभकर्कटके चैव कन्यायां कार्मुके रवौ । रोम
खंडनं कर्तव्यस्य पितृत्याज्यप्रतियमः । तथा । दिवा ह्लोमोगी तु जातु वर्षार्धमेव न दर्शके । खंडनं स्यात्तत्यो चना यायां तेष्वतेके
शवापनमित्यादि । अत्र सर्वस्यापवादस्तीर्थप्राप्तौ । क्षौरे शेषमित्रिकं कार्यं निषेधसत्त्वेपि कृवं । पित्रादिमृतिदीक्षा
सु प्रायश्चित्ते च तीर्थके इति स्मृतेः । चपविप्राज्ञयापपरे मरणे वर्षमाहरो । उद्वाहे दिलवारे इतिथिपुष्टेरामिष्टदमि
ष्टदमिति नारदवचने मितिमित्र चरिगणां नस्यापलक्षणता स्वा । अत्र केशानां यावती संख्या छिन्नानां जाह्न
वीजले । तावद्वर्षसहस्राणि स्वर्गलोके महीयत इति वचनात् सर्वालोपविष्टत्वयाकामये घ्यास्वयमेव के
शानं गंगादिषु पतंतीति कश्चित् । अन्ये तु न पुकेशदुर्भिक्षस्तारिष्ये क्षेपणमत्र लोमान्यसुनक्षिपेदितिमप
रार्धवचनान्न जले क्षेपः किंतु नीरे गर्ते कर्तव्याकेभ्यान्यस्तादीति द्विये दिगप्याहुः । अन्ये तु यांवतिनरवलो रा.म.
३२

त्यानिवा पुनाप्रेरितानिवै । पततिजाह्नवीतोये नराणां पुण्यकर्मणामिति वचनात् हेशांतीरेत्रदेवपेद्यानो वा पुत्रुत्राः केशगधाः
तीर्थे पतंति नतु । सपेकाचित्र निषत्तिः कार्येत्याहुः । अत्र यथादेशाचारं व्यवस्था । स्त्रीणां सधवानां वालानोप मुंडनेवि
शेषविचारः प्रयागप्रकरणे करिष्यते ॥ ॥ इति त्रिस्थलीसेतौ मुंडनविचारः ॥ ॥ अथ तीर्थस्नानं ॥ ॥ महाभारते तीर्थनाह्न
तात्माचनामुचिर्न चनस्कारः । स्नाति तीर्थे पुष्करे च्यवन च वकमतिर्नरः । तथा । काचतुलीकृतात्मा च गादिधोन च पाप कृ
तः । स्नाति तीर्थे पुष्करे च्यवन च वक्रमतिर्नरः । तत्यान्यत्राप्युक्तं । नदीसरिद्देवरवाते गंगत्र स्तवरोपुत्र । सरस्वत्यान्तिमे पु
शक्तितीर्थविशेषतः । स्नानमिति शेषः । कौर्मे । हृषिव्यांस दर्शतीर्थेषु स्नात्वा पुण्येषु च द्विजाः । मुच्यते पातकैः सर्वैः समस्तैरपि
प्ररूपः । तथा । तीर्थानि प्रकृत्य । तत्र स्नानं जपो होमः श्राद्धदानादिकं कृतं । एकैकशो मुनिः श्रेष्ठाः पुनात्यासप्तमं कुलं । इदं
च यत्रस्थल विशेषे विपरीतप्रवाहादि तत्र न कार्यं । तदुक्तं । प्रात्यादक्रोदके स्नानं वर्जयन्मृषां द्विजातिभिः । तस्यां रजकतीर्थेत्
दश हस्तेन वर्जयेत् । तथा । अग्राः स्नानं गतापोनपाः प्रथमवेगजा ॥ प्रक्षेपितान्यकेनापितत्तातीर्थादिनिर्गताः । एकस्य
गंगापा मध्येवादः । प्रतिस्रोतोरजोयोगोरथ्याजलनिवेशनं । गंगायांनप्रदुष्यंति सासा स्रियमंद्रवः स्त्र यो निषेधोंतरमपि ।
गालम्नीतीति तीसीनिवकरणात् हरीतकी । कोविदारकपित्थार्कपदर्येरंडशिरीषवः । शोलुम्वरतदिरश्वेपांस्नानकायास्तुव

त्रि.से. ३४ र्जयेदित्यादि बदरीबिभीतकीनिंबा पाठः। यच्च रात्रिसंध्यादिषु स्नाननिषेधः सोप्याकस्मिकतीर्थप्राप्तौ न प्रवर्तते नैमित्ति
कत्वात्। अत एव गंगातत्पयः। रात्रौ स्नानं न कुर्वीत होमं दानं च रात्रिषु नैमित्तिकं च कुर्वीत स्नानं दानं च रात्रिषु। वृद्धयाज्ञवल्क्योपि
पि। ग्रहणोद्वाहसंक्रांतियात्रार्तिप्रसवेषु च। स्नानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते। एतच्च रात्रौ तीर्थस्नानेप्याद्यांत प्रह
रद्वयविषयं। महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयं। प्रदोषपश्चिमौ यामौ दिनवत्स्नानमाचरेदिति पराशरोक्तेरिति केचित्।
अयं च निषेधाभावः आकस्मिकतीर्थप्राप्तिविषयः। बुद्धिपूर्वकं तु तीर्थप्राप्तौ रात्रौ दिने कार्यं चान्यथा। प्रासंगिकप्राप्तौ
मलमासेपि कार्यं। तीर्थस्नानं गयाश्राद्धं व्रीहितिलादिभिः कृष्णचक्रं काम्यकार्यं मलमासेपीति यमेनाभिधानात्। अत्र ती
र्थस्नानं प्रवृत्तिप्रसंगान्तमिति मदनपारिजाते द्वितीयाप्यस्त्र। अत्र सर्वस्य निषेधात्। आकस्मिकतीर्थप्राप्तिनिमित्तकमिति
तु वृद्धाः। आशौचेप्याकस्मिकतीर्थस्नानं कार्यं। तदुक्तं पैठीनसिना। विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि। न तत्र सूतकं
तद्वत्कर्म यज्ञादिकारयेत्। सूतकम्तत्कस्यापि फलं गृहणं। तीर्थकर्म स्नानतर्पणश्राद्धादि। परार्थस्नाने विशेषः। मार्कं
डेयपुराणे। मातरं पितरं जायां भ्रातरं सुहृदं गुरुं। यमुद्दिश्य निमज्जेत अष्टमांशं लभेत सः। स्तद इति सर्वरोत्नुद शमांश
लभेत स इति पाठः। स्मृत्यर्थसारे तु पितामहभ्रातृपातामहमातुलश्वशुरार्थं द्रोणकाचार्यगुरुपंथ्यापांयितेषा पम्यं राम. ३४

मातृष्वसृपितृष्वस्रर्थं च स्नात्वाष्टमांशं लभते। मातापित्रर्थं कुर्वंस्तु तुर्यांशं परस्य परार्थं द्वं पत्नी दं पत्नी अर्द्धं लभेत। विशेषो नार
माहेंपैठीनसिः। प्रतिकृतिं कुशमयीं तीर्थवारिणि मज्जयेत्। मज्जयेद्यमुद्दिश्य सोष्टभागं फलं लभेत्। तत्र मंत्रः। कुशोसि कुशपुत्रो
सि ब्रह्मणा निर्मितः पुरा। त्वयि स्नाते स च स्नातो यस्येदं ग्रंथिबंधनम्। अत्र प्रतिकृतिः कुशप्रतिमैव कार्या इति केचित्। अन्ये तु ग्रंथिबं
धनमिति मंत्रलिंगात् तत्रान्या ग्रंथिबंधनमात्रे प्रतिकृतिरित्याहुः। इदं परार्थस्नानं प्रतिकृतिस्नापनं च जीवतामजीवतां चोद्देशेन का
र्थसामान्येन विधानादिति कश्चित्। स्नानजं फलमाप्नोतीति तीर्थयात्राकृतेन तु। अनुषंगेण वा रीत्या राजसेवादिप्रसंगेन। विशेषो नरस्मा
हा। जाबालिः। प्रवाहाभिमुखो ध्यायन्नापः प्रवहेति वै। स्थावरेषु च सर्वेषु आदित्याभिमुखस्तथा। अन्यत्रेति कास्नानादिं ग्रंथांतरतो ज्ञेयं
॥ इति तीर्थसेतौ सामान्यपद्धते तीर्थस्नानविधिः॥ अथ तर्पणं॥ तत्रादौ स्वशाखानुसारेण स्नानांगं कृत्वा पश्चात्तीर्थे च देव
र्षितर्पणं कृत्वा। पितृणामपि कार्यं। तदुक्तं स्कांदे। आदौ स्वशाखानुसारेण स्नानांगं कृत्वा पश्चात्तीर्थे च देवर्षितर्पणं कृत्वा। पितृणा
मपि कार्यं। तदुक्तं स्कांदे। अकालेप्यथवा काले तीर्थं प्राप्य द्वं तर्पणं। अविलंबेन कर्तव्यं नैव विघ्नं समाचरेदिति। पितृतर्पणं तु
देवीपुराणेप्युक्तं। तीर्थ इति प्रक्रम्य प्राप्तोरे च कर्तव्यं पितृणां चैव तर्पणमिति। तथान्यत्रान्यतीर्थे नरः स्नात्वा न कुर्यात्पितृत
र्पणं। पिबंति देहनिःस्रावं पितरस्तु जलार्थिनः। तथा। गिरिषु ख्याततीर्थेषु नदीषु च विशेषतः। साकांक्षाः पितरो नित्यं तिष्ठंतिस

त्रि·से· ३५ लिलार्थिनः॥ अत्र वस्तमाराणां सर्वान्पितॄन्संतर्प्य रकंतिलांजलिं सर्वे स्योदपात्रान्नत्रपि स्तुपुराणे मे त्रा॥ देवासुरास्तथा नागास्तथा यक्षा गंधर्व
राक्षसाः। पिशाचा गुह्यकाः सिद्धाः कूष्मांडास्तरवः खगाः। जलेचरा भूमिलया वाय्वाधाराश्च जंतवः। तृप्तिमेतेन यांत्वाशु
मद्दत्तेनांबुनाखिलाः। नरकेषु समस्तेषु यातनासु च ये स्थिताः। तेषामाप्यायनायैतद्दीयते सलिलं मया। ये बांधवाबांधवा
ये न्यजन्मनि बांधवाः। ते तृप्तिमखिलां यांतु ये चास्मत्तोयकांक्षिणः॥ यत्र क्वचनसंस्थानां क्षुत्तृष्णोपहतात्मनां। इदमक्षय्यमे
वास्तु मया दत्तं तिलोदकं। कापर्दीयेपि। आब्रह्मस्तंबपर्यंतं देवर्षिपितृमानवाः। तृप्यंतु पितरः सर्वे मातृमातामहादयः। अ
तीतकुलकोटीनां सप्तद्वीपनिवासिनां। आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकं। एतत्कल्पे च पैलदेवा। कामोदकप्रदानं ते मये
न कथितं नृपा। यद्दत्वा प्रीणितेनम नुष्यः सकलं जगत्। जगदाप्यायनोद्भूतं पुण्यमाप्नोति चानघ। दत्वा कामोदकं सम्यगेते
भ्यः श्रद्धान्वित इति। अत्र पक्षे श्राद्धे हिरण्ये चाप्यनुव्रज्य तिलोदकमिति सोमेन तदाह्वनात्तीर्थे हेमश्राद्धपक्षे। श्राद्धीयब्राह्मणा
विसर्जनानंतरं तीर्थविधिस्तेन तर्पणामावं इति केचित्। तदयुक्तं। बहुभिर्वाक्यैस्तीर्थस्नानानंतरमेव तद्विधानात्। सुमंतु
वचनं तु येषां शास्त्रिणां श्राद्धांगभूतं तर्पणामस्तीति तेषां हिरण्यश्राद्धे तत्पश्चाद्विधानं। अत एव प्रयोगपारिजाते श्राद्धांगतर्पणा
मेव प्रकृते प्रसमहितं। तस्मात्तीर्थे तर्पणं स्नानांगमेव कार्यमिति सिद्धं। तर्पणे गोत्रादिविशेषोन्यत्रोक्तः। पितॄन्तर्पयित्वानुत राम· ३५

दीस्तरति यो नरः। तस्मात्स्नानकामास्ते भवंति मद्दुःखिता इति। अन्वतर्पणे तर्पणक्रमः। आदौ पिता ततो माता सापत्नजननी तथा।
मातामहाः सपत्नीका आत्मपत्न्यस्ततः परं। सुतभ्रातृपितृव्याश्च मातुलाश्च सपत्निकाः। दुहिता च स्वसा प्रोक्ता दौहित्रो
भागिनेयकः। पितृष्वसा मातृष्वसा श्वशुरो गुरुरिक्थदौ। रिक्थबंधनं। एते स्युः पितरस्तीर्थे तर्पणे च महालये। पितेति पित्रादि
त्रयमित्यर्थः। एवं मातेत्यत्रापि। अत्र मातापि। तातो वा विततं यस्य सपत्नजननी मातामहादित्रयं सस्त्रीतनयादि तात तन्नी स्वभ्रात
रस्त्रियः। ताताग्रजा तस्मभगिन्यश्च धवपुत्रा पापितास्सगुरुः शिष्याप्ताः। पितरो महालयविधौ तीर्थे तथा तर्पणे इति। वितयशा
स्य तातो वा नवापत्ते के संबंधः। सस्त्री तिमातामहादित्रयस्य विशेषणं। अन्ये तु मातामहादीनां स्यक्तर्पणमिच्छंति। आद्यव
ता। स्त्री तनयादीनि तर्पविप्रेये कृपा। तातजननीस्वभ्रातर इति। ता नभ्रातरः पितृव्याः। मातृभ्रातरो मातुलाः। स्वभ्रातरः सपत्न
कातृ भ्रातरः। तस्त्रियः पितृव्यमातुलस्वभ्रातृस्त्रियः। सस्त्रियः इति गापाठः। तदानानभ्रावा द्रपः सपत्नीका इत्यर्थः। ताते ति पि
तृष्वसृमातृष्वसृस्वसारः। धवभर्तृसुताः। तन्नश्च पितृष्वसेयभागिनेयस्वभर्तृकाये साप माये इ ये सेवं प्रकारकं। प्रयोगपा
कामनुसंधेयं। ताप्यपिताश्च गुरुः। अन्यत्स्पष्टं। अत्र भ्रातृपितृव्यादीनां सर्वोकक्रमे रासद्विकल्पः॥ एवं पूर्वोक्तसकल
तर्पणाशक्तौ संक्षेपतर्पणमाह। आब्रह्मस्तंबपर्यंतं जगत्तृप्यत्विति कृत्वा जलं जलांजलित्रयं दद्यात्कुर्वन्संक्षेपतर्पणमिति

वचनात्। नन्वेतेष्वाब्रह्मस्तंबपर्यंतं जगत्स्थावरजंगमं मया दत्तेन तोयेन तृप्तिं यांतु परां गतिमिमं चेत्। यद्वा। आब्रह्मस्तंबपर्यंतं
देवर्षिपितृमानवाः। तृप्यंतु पितरः सर्वे मातृमातामहादयः। अतीतकुलकोटीनां सप्तद्वीपनिवासिनां। आब्रह्मभुवनाल्लोका
दिदमस्तु तिलोदकमिति मंत्रेण सतिलकु[illegible]शान्चीन् जलांजलीन् दद्यादिति। अत्र प्रत्यंजलि मंत्रावृत्तिः नन्तु मं
त्रस्य तर्पणकर्मकरणत्वात् सर्वांजलिदानस्यैकैककर्मत्वान्मंत्रेणैकमीदि संप्रिपातः स्यादिति न्यायेनावरोहादिवत् स
लंबध्यासमिति वदंतीति चेद्। दिरसि बर्हिषि नेति त्रिर्वेदिं प्रोक्षतीति वत् सकृदेव मंत्रपाठः स्यात्। मैवं। प्रत्यंजलित्वम्यदत्र
त्रं लं दीयते। ननु अन्य त्रयमंत्रः प्रयुक्तस्य दर्भैरेव सस्यात्र सर्वार्थ इति विशेषग्रहणात् सर्वसंस्काराः सिद्धे लिङ्गे निर्वपणालव
त्वादिवत् द्रव्यांतरत्वेन प्रत्यंजलि मंत्रावृत्तिः। अवघाते प्राकृणायोस्तु तत्र एव व्रीहयः पुनरवहन्यंते सेचवेदिः पुनः प्रोक्ष्यत इ
ति द्रव्यैकत्वात्स्कांतरलाभान्न मंत्रावृत्तिः। तस्मात् प्रत्यर्घ्यदानवत्प्रत्यंजलि मंत्रावृत्तिः। केचित्तु इति तु वृंद्रिनिश तप्र
पये न समानकालताव गतापक्वा सुवासा इति वक्रिपमाणमतु वादितयाकरणत्वाभावा सकृदेवमंत्रपठनं तलित्र यं
दद्यादित्याकुः। पश्च तर्पणेति लिखितेषु धः। गार्ग्यः। भो भो मेत्र यो दर्भानं दाभस्तु मध्यासु वा पिंडदानं मदास्ता नंत्र कुर्यादि
लं तर्पयामीति। मरीचिः। संक्रांत्यां रविवारे च गृहे जन्मदिने तथा। भृत्यपुत्रकलत्रार्थी न कुर्यात्तिलतर्पणं। पक्षयोरुभयोरामास्त

तम्यां पातिसंध्ययोः। तिथापुत्रकलत्रार्थी तिलान् स्नात्सु वर्जयेत्। स्मृत्यर्थसारे। विवाहे चोपनयने चौले सति यथाक्रमं। वर्षमर्द्ध
तदर्द्धं च नैव कैतिल तर्पणं। वृद्धौ सप्तांच तन्मासि नेमस्यात्तिल तर्पणमिति। अयं तीर्थ तर्पणेन प्रवर्तते। तीर्थे तिथि विशेषे
च गयायां प्रेतपक्षके। निषिद्धेपि दिने कुर्यात्तर्पणं तिलमिश्रितमिति वचनात्। तिथि तीर्थ विशेषेष्वपि कार्यं प्रेतेषु सर्वदेति स्मृत्य
र्थसारे दानवचनाद्य। तर्पणं अन्यत् सर्वसामान्यविधानं ग्रंथांतरे तेभ्यः सेषां विधेयं यापितीर्थे तर्पणं कार्यं। तर्पणं प्रत्यहं कार्यं भ
र्तुः कुशतिलोदकैः। तत्पितृष्वापिनामगोत्रादिश्रद्धकमिति स्कांदे दिधवाधर्मेषु प्रत्यहमप्यभिधानात्। तीर्थे नैमित्तिकतर्पणं तु
तरां तदधिकारात्। इदं च पुत्रपौत्राभावविषयं। मदनपारिजाते प्येवमेव सन्यासिना तु तर्पणं न कार्यं न कुर्यात्तत्र तत्कं सिद्धं त्याहुरि
डा दक्क्रियामितिस्मृतेः॥ ॥ इति भट्टरामेश्वरसूरिसूनुनारायणभट्टविरचिते त्रिस्थलीसेतौ सामान्यप्रघट्टके तीर्थतर्पणं॥ ॥
अथ तीर्थस्नाननिषेधप्रसंगान्नदीनां रजोदोषः। देवलः। तुलामकरयोर्मध्ये सर्वा नद्यो रजस्वलाः। तासु स्नानं न कुर्वीत देवर्षिपि
तृतर्पणं। अत्रिः। सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः। तासु स्नानादीनि कर्माणि तासु कुर्वीत मानवः। इदं च महानदीव्यतिरि
क्तविषयं। सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः। तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः इति [illegible]। महानदीषु वि
शेषं तरं भविष्योत्तरे। आदौ कर्कटके देवि महानद्यो रजस्वलाः। त्रिदिनं तु चतुर्थेऽह्नि शुद्धाः स्युर्जाह्नवी यथा। इति। महानद्यश्च ब्रह्मपु

त्रि. स. ३७

रीगोदावरीभीमरथीतुंगभद्राचवेणिका। तापी पयोष्णी विंध्यस्य दक्षिणे तु प्रकीर्तिता इति। भागीरथी नर्मदा च यमुना च सरस्व
ती। विशोका च वितस्ता च विंध्यस्योत्तरतः स्थिताः। द्वादशैता महानद्यो देवर्षिक्षेत्रसंभवा इति। अल्पनदीषु तु ब्रह्मगर्भोक्तरूपाव
धिरजस्वलात्वमुक्तं मात्स्ये। यावन्नोदेति भगवान् दक्षिणाशाविभूषणः। तावद्रजो वहन्त्येताः करतोयाः प्रकीर्तिता इति। करतोयाः
स्वल्पतोयाः। धन्वासि विशेषः कात्यायनेनोक्तः। श्रावणे प्रथमे [illegible] जाता सरस्वती। कुरुक्षेत्रे तु सा सरस्वती [illegible]
[illegible] वगच्छति शीघ्रेकु सरितो भुवि। तास्तु शारभिनस्सापादस्पर्शौ दशवासरे। गंगादिविषये तु देवलः। गंगा च यमुना चैव प्ल
क्षजाता सरस्वती। कुरुक्षेत्रे तु सा सरस्वती साक्षात्कृताता। रजसा नाभिभूयन्ते ये चान्ये नदसंज्ञिताः। शोणसिंधुहिरण्याख्याः कोक
लोहितघर्घराः। शतद्रुश्च नदाः सप्त पावनाः परिकीर्तिताः। स्मृतिसंग्रहे। तपनस्य सुता गंगा गोमती च सरस्वती। रजसा नाभिभू
यन्ते ये च नदसंज्ञिताः। तपनस्तु नाम यमुना। निगमः। गंगा धर्मद्रवः पुराणा यमुना च सरस्वती। अंतर्गतरजोदोषाः सर्वावस्थासु
चामलाः। स्वसुता यमुना। निगमः। गंगा धर्मद्रवः पुराणा यमुना च सरस्वती। अंतर्गतरजोदोषाः। अत एवं च प्रथमकर्कटे देवी
त्र्यहं गंगा रजस्वला इत्यादि गंगादीनां रजोवचांसि। अंतर्गतरजोदोषपराणि। तथा च कर्कटादौ रजोदुष्टा गोमती वासरत्रयं चंद्रभा
गा सती सिंधुः शरद्धर्मे नर्मदा तथा। अन्येषां च नदीनां रजोदोषो न तत्तीरवासिनो। अत एव निषेधो न तु तत्तीरवासिनामित्युक्तं रजोदु त्रि. स. ३७

ष्टमपि जले गंगादिजलसंयुतं स्वयमदुष्टं न च गंगादिजलं स्वपतितदुष्टं। मत्स्यपुराणे। तुरुष्कं भस्मासमायोगाद्दुष्टमप्यंबु पावनामि
ति। भारते। अदिष्टमपि प्राप्य गंगां याति पवित्रतामिति। अन्योऽपि विशेषः स्मृतिसंग्रहे। धनुःसहस्राण्यष्टौ तु गतिर्यासां न विद्य
ते। न ता नदीशब्दवहा गर्तास्ताः परिकीर्तिताः। कालेन भस्म शुद्धं स्यात् त्रिरात्रं तु न वोदकं। अकाले तु दशाहं स्यात् [illegible] वा तापार
हरिविज्ञप्तिः। अन्योऽपि विशेषो मत्स्ये। महदं तु समं पापि पिदितिषु तु राजन्यानवं तु मिश्रितं तेन दुष्टमिति स्मरणं योगयाज्ञवल्क्यः।
रजोदुष्टे भस्मसिक्तानां वत्सेनपादि शुद्धिनैः। कर्दमितं रजस्के यासंयोपाति अन्तर्गतां। कर्दमितं तु शितं तथा। अन्तर्गोमेदिपीवे
त्रासरीरसकलिका। भूमेर्निर्योदकं चैव दशरात्रेण शुध्यति। तत्र स्नाने न कृपापदकं न चोदकं। केचित् कर्म सुरजोदोषाभा
वः। तथाह व्याघ्रपादः। अभावे कूपवापीनाममनपायपयोभृतां। रजोदुष्टेऽपि पयसि ग्राममोगो न दुष्यतीति। कासिष्टः। उपाक
र्मणि चोत्सर्गे प्रेतस्नाने तथैव च। चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यत इत्यादि। ॥ त्रिस्थलीसेतौ नदीरजोदोषः॥ अथ तीर्थश्रा
द्धं॥ ॥ पाद्मे सृष्टिखंडे तीर्थयात्रागतो विप्रो [illegible] पापविविक्तो फलितेषु श्राद्धं देयं विजानता। पाद्मे मात्स्ये च। तीर्थेषु
पुष्करं नामैतत्यादिना तीर्थान्यनुक्रम्याक्रम्य एषु तीर्थेषु यच्छ्राद्धं तत्कोटिगुणमिष्यते। यस्मात् तस्मात् प्रयत्नेन तीर्थे श्राद्धं समाचरे
त्। [illegible] कोर्थे। देशानां तु विशेषेण राम वेत्तु रपमनंतकं। यथा पापमहं पंच्याद्धं प्रयागे मरकंटके। [illegible] ते चेव गंगा

त्रि.से. मोक्षविशेषतः। वाराणस्यां विशेषेण यत्र देवः स्वयं हरः। गंगाद्वारे प्रभासे च बिल्वके नीलपर्वते। कुरुक्षेत्रे च कुब्जाम्रे भृगुतुंगे हिमा-
३८ लये। केदारे फल्गुतीर्थे च नैमिषारण्य एव च। सरस्वत्यां विशेषेण पुष्करे तु विशेषतः। नर्मदायां कुशावर्ते श्रीशैले भद्रकर्णके।
वेत्रवत्यां विशेषेण गोदावर्यां विशेषतः। एवमादिषु चान्येषु तीर्थेषु पुलिनेषु च। नदीनां चैव तीरेषु तुष्यंति पितरः सदा।
विष्णुः। पुष्करेष्वक्षयं श्राद्धं जपहोमतपांसि च। पुष्करे स्नानमात्रतः सर्वपापात्प्रमुच्यते। इत्यभिधाय एवमन्येषु तीर्थेषु सरिद्व-
रासु संगमेषु पुलिनेषु निकुंजेषु प्रस्रवणेषु वनेषूपवनेषु चेत्यादि। प्रभवोनफलद्विदेशाः। सरिद्वरास्तु संगमस्थितिप्रस्ता-
भिधा तादिवलः। श्राद्धस्य प्रशस्तो देशो गया गंगा सरस्वती। कुरुक्षेत्रं प्रयागं च नैमिषं पुष्करं शिवा नदी त[illegible] श्राद्धस्य सन्निक-
टे पुण्यतीर्थेषु शैलेषु पुलिनेषु चापि विविक्तेषु च तुष्यंति दत्तेनेह पितामहाः। शंखः। वाराणस्यां कुरुक्षेत्रे भृगुतुंगे हिमालये। नर्मदा-
वाकुदातीरे सर्वमानंत्यमश्नुते। गंगाद्वारे प्रयागे च नैमिषे पुष्करे तथा। संनिहत्यां गयायां च सर्वमक्षय्यतां व्रजेत्। अत्र केचि-
न्मन्यन्ते सार्थ्यग्राह्ययविधायकवचनबलादेव सर्वत्र श्राद्धप्राप्तौ सत्यामपि विशेषकीर्तनं गुणफलसंबंधविधानार्थं। दध्नेंद्रि-
यकामस्येत्यादिवत्। न तु विशिष्टश्राद्धांतरविधिः गौरवापत्तेः। सोमेन यजेतेत्यादिवद्गतिकत्वाभावात्। तीर्थान्यनुक्र- राम.
म्य वायुपुराणे। एवमादिषु तीर्थेषु श्राद्धं ये निर्वपंति हि। पूता भवंति ते स्नात्वा दत्त्वा पश्राद्धपत्यापि विधिवद्दत्त्वेति। तर्पणाद्विष्णुक्रमोक्तेः ३८

णाति तिलोदकं दत्त्वेति सत्तिरलांजल्यां। विष्णुधर्मोत्तरे। दक्षिणाप्रवणे देशे तीर्थादौ वा गृहेऽपि वा। भूसंस्कारादिसंयुक्ते श्राद्धं कु-
र्वीत प्रयत्नतः। यत्नतो यमः। परकीयप्रदेशेषु पितृणां निर्वपेत्तु यः। तद्भूमिपितृभिः श्राद्धकर्म विहन्यते। तथा ब्रह्मपुराणे। परकी-
यगृहे यस्तु स्वान्पितॄंस्तर्पयेत्सुतः। तद्भूमिनस्तत्स्य हरंति पितरो बलात्। अत्र भागं तत्तेभ्यो दद्यान्मूल्यं च श्रीवतां। स्वीयइत्युते-
भ्यस्तु भूमिस्वामिपितृभ्य उद्धृत्य देयं। जीवतां स्वामिनां मूल्यं देयमिति। न च परकीयप्रदेशाः परगृहादयो निषिद्धाः न तु तीर्था-
दयस्तेषामस्वामिकत्वात्। तदुक्तं कौर्मे। अटव्यः सर्वतः पुण्या नदी तीर्थान्यपि च। सर्वाण्यस्वामिकान्याहुर्न हि तेषु परिग्रहः।
तथा। वनानि गिरयो नद्यस्तीर्थान्यायतनानि च। देवखातानि गर्ताश्च न स्वामी तेषु विद्यते। गर्त्ताश्च कृत्रिमाः केच विशेषात्स्वल्पे-
त्यादयः। इदं च श्राद्धं स्नानतर्पणानंतरमविलंबेनैव कार्यं। तदुक्तं देवीपुराणे। श्राद्धं तत्र च कर्तव्यमर्घ्यावाहनवर्जितं। श्वध्वां-
क्षकाकानां नैव दृष्टिहतं च यत्। श्राद्धं तत्तीर्थिकं प्रोक्तं पितृणां तृप्तिकारकं। काले वाप्यथवाकाले तीर्थे श्राद्धं तथा नरैः।
प्राप्तैरेव च कर्तव्यं पितृणां चैव तर्पणं। पिंडदानं च तच्छस्तं पितृणां चातिवल्लभं। विलंबो नैव कर्तव्यो न च विघ्नं समाचरेदिति। प्रा-
प्तिरेवेति। आवश्यकस्नानतर्पणानंतरं। तावतो विलंबस्य स्नानतर्पणादिविध्यनुज्ञातत्वात्। तीर्थश्राद्धे तिथिकालवर्ज-
नमपि नास्तीत्याह शंखः। तीर्थे द्रव्योपपत्तौ च न कालमवधारयेत्। पात्रं च ब्राह्मणं प्राप्य सद्यः श्राद्धं समाचरेत्। तथा। भारते श्रा-

दिपर्वदिवसेष्वशेषेषु ऽनुने। भुक्तो वाप्यथवाऽभुक्तो रात्रावहनि वै द्विजः। न कालनियमो यत्र गंगां प्राप्य सरिद्वराम् इति। चित्र
पथामाहात्म्ये। भुक्तो वाप्यथवाऽभुक्तो रात्रौ वा यदि वा दिवा। पर्वकाले पवाऽकाले शुचिर्वाप्यथवाऽशुचिः। संदेहस्य पे न तत्र न
दीचित्रपथाप्रिये। प्रमाणं दर्शनं स्नानकालस्तत्र कारणं। अशुचिरशौचेनापि अत एव पैठीनसिः। विवाहदुर्गयज्ञे
षु यात्रायां तीर्थकर्मणि। न तत्र सूतकं तद्वत्कर्म यज्ञादि कारयेत्। काशीखंडे। अकालेप्यथवा काले तीर्थश्राद्धं च तर्पणं। अवि
लंबेन कर्तव्यं नैव विघ्नं समाचरेत्। काले ऽपराह्णादौ भोजनादिरहितेऽपि। अकाले रात्र्यादौ कृतभोजनादिनापि। प्राप्ततीर्थल
ङ्घ्ये वाधिकारिविशेषणात् अहरहरादिवत् तर्पणवत् श्राद्धं कार्यमित्याशयः। काल इति तु हेयं तत्पयोक्तं। तत्र च समुद्रो वामना
सत्व इति वहाराद्वेनेयः। कश्चित्तु अकालो अमावास्यादिश्राद्धव्यतिरिक्तोऽपि न तु रात्र्यादौ निषेधात्। अतस्तीर्थद्रव्योपप
त्तौ न कालमवधारयेदिति देवलवचनात्। न कालमवधारयेत् अमावास्यामपराह्णं वा न प्रतीक्षेतेति हेतुरत आदिवर्जं श्रौदे
तुक्तं मलपातिनेत्याहातंत्र। सर्ववारतिथीनां श्राद्धे निषेधाभावान्नैमित्तिकेऽस्मिन् श्राद्धे निमित्तानंतरमावृत्तिनिप्राप्तत्वादेव वि
धानवैयर्थ्यात्। अयोधेतन सर्ववारतिथिषु श्राद्धस्यानावश्यकत्वाच्च अस्मिन्काले प्रतिपदादौ श्राद्धमनावश्यकं तदापि तीर्थप्रा
प्तौ सत्यां श्राद्धमवश्यं कार्यमित्यावश्यकत्वार्थमकालमित्युक्तमिति। तदपि नैमित्तिकविधित एव नित्येऽस्त्यावश्यकत्वव्याप्ते

र्दर्शहत्येहेत्यादिवत्। तस्मात्कालेऽत्र सार्थक्याय निषिद्धरात्र्यादिप्रतिप्रसवार्थमेवोक्तं। अनंतरमेव कांक्षरे ते न न कालमवधा
रयेदिति सामान्यत एवोक्तं। चित्रपथामाहात्म्ये च रात्रौ वा यदि वा दिवेति स्फुटमेवाह। विष्णुरपि। ततः सायाह्नरतंत्र हि गृहसेऽदिं प्र
लुप्येत। यहो परागसंक्रांतितीर्थश्राद्धादिकं विनेति। तस्माद्रात्रिकृततीर्थप्राप्तौ संध्यां भुक्त्वा वा रात्रावागामिदोवा श्राद्धादिकार्य
मिति सिद्धं। यदा तु प्राप्तिदिने दैवो मानुषो वापि विघ्नः स्यात् तदा दिनांतरे श्राद्धं कार्यं। न तु प्राप्तौरेव कार्यमिति प्राप्त्यनंतरकाले कर्तव्यो
क्तेः। दिनांतरे चेतदमावास्यापात्तनकादिविघ्ने सति श्राद्धलोपः विलोपश्च स्यात्। कृत्यादो हेतुः सूतकाद्यनंतरमप्युक्त
त्वं युक्तं। तदुक्तं त्रैक्ष्यदुष्टेन केनचित्सूतकादिना। सूतकानंतरं कुर्यात्पुनस्तद्धरे वेवेत्यादिवचनात्। इदं तु वचनाभावात् लोप एव
युक्तः। एवं रात्रौ संध्यायां वा तीर्थप्राप्तौ लोपेऽत्र रात्रिसंध्ययोः श्राद्धनिषेधात् दुरंतरदिने च प्राप्त्यनंतरकालाभावात्। सत्यमेवं
भवेद्यद्यमावास्यादिवत्कालविधानं स्यात्। इदं तु तीर्थप्राप्तिनिमित्तमात्रमुच्यते। तथा च निमित्ते सति जातेष्टिवत्कालांतरे
प्यनुष्ठानमविरुद्धं। तथाहि वेदस्नानरं शकत्या से निर्वपेत्पुत्रे जात इति विहिता जातेष्टिर्जातकर्मणः पूर्वं क्रियमाणा जात
कर्मणश्च कालेऽपनिषेधादिष्टिर्जातकर्मादि व्यवधानेऽप्युत्तरदिवसापत्तेरुपजीव्यविरोधापत्तेश्चानंतरकाल एव न कापीति
तु जातकर्माणद्धवर्मिति चतुर्थ्यंतिस्रं तिसंज्ञातकर्मानंतरं सत्यं केनाप्युक्तं तत्र न च पादिताने तर्कस्य च बाधितत्वान्निमित्तस्य चा

त्रि·स्था· तत्वादस्य तलोपायो गास्तु द्धानुरोधेनस्तत्कालं नैरपर्व एव तुष्ठेपेति तद्रूत्तराधिकरणे स्मादित्तोत्तरदद्वापि कालां नरा तुष्ठानमवि-
४० द्धं। इयांस्तु विरोध तत्राव समेको मध्ये प्रति बंधः इह तत्कादाचित्क इति मदनुमति बंधादकृतस्माद्गुरव बहिर्पातितदातीर्थेन
पदेशाभावान्नेत्रिविन्नकस्माद्दं तुप्यनरवाम तद्वतु वेष्टतत्वादि फलाधिकरभावान्नेनेष्टिः। यदि स्वतुष्ठाः कृतन्मादुरगवे
तदावत्तदेयात्तुरूपापरापराधात्। स्त्र बुद्धिपूर्वं तु प्रति बंधेन प्रसवे नीले तावाविशेषः। शक्ति संध्ययोरपि तीर्थकालोत्पर्वोक्तेवा
कावशात्रिषेधं वा चित्वात्तदैवस्माद्यमित्तुक्रमे वा स्नानं तु डनो पवासादावप्यमेव सर्वो निर्णयः। नैमित्तिकत्वेन साम्यात्। तथा प्र
भास्खंडे नवार्नन्दन रूपं न काल तत्र कारणं। मेरे बृहस्पते तीर्थं तदा पर्वसहस्रकं। ततस्मातीर्थे प्याद्दे तिथिवारनक्षत्रादि
प्रमुक्तो निषेधो न प्रवर्तत इति स्वामि व्याप्यतत्रिषेधस्य। गार्ग्यः। नंदायां भार्गवदिने त्रयोदश्यां त्रिजन्मनि। एषु श्राद्धं न कुर्वीत गृ-
ही पुत्रधनक्षयात्। त्रिजन्मनि जन्मादि नक्षत्रातारासु। बृहद्गार्ग्यः। प्राजापत्ये च पौष्णे च पित्र्ये भार्गवे तथा। यस्तु श्राद्धं प्रकु-
र्वीत तस्य पुत्रो विनश्यति। प्राजापत्यं रोहिणी। पौष्णं रेवती। पित्र्यं मघा। भार्गवे। नन्दायां चैव प्रकुर्वीत यदि स्याज्ज्ञातिभेद्वत्रः। नैवो-
पदवोः कार्यं न कामे च भार्गवे। दारुणे तु वसूर्वेषु प्रत्यरे च विवर्जयेत्। आग्नेयं कृत्तिका। एकरूपा न्याङ्गी सैषा न्येषामपल-
निाजन्महीत्यं च मेवत दैशं च धावि शंव प्रस्वारेणतानि वचनानि मघा पित्र्ये तस्माद्गुप्तिषेधपरतयाहेद्रिश्च तिमिरं गौरुनानि राम·
४०

नयापि केचिच्छ्राद्धमात्र निषेधपरतांगीकारः दर्शादावच्छिन्नयापिंडदानेपि निषेधः। मात्स्ये। भीमे चैव दर्शे चान्द्रे भरणुमघासु चा-
पिंडदानं मत्सरान् न तु कुर्यात्तिलतर्पणं। रामकौतुके। नंदायां च काम भरण्याः मघात्रिपित्रकालमां गजे वै घ तिथौ नैव पिंडदानं सदा
ने स्मृतिः नंदायां त्रिपक्षयेकादश्यां श्राद्धे स्पष्टः सप्तमी। कामस्तु पोदशी। रव्यारो रविभौमवारो। भृगुः शुक्रवारः। आग्निपित्र्यका-
लभानि कृत्तिका मघा भरण्यः। गजो वै धृति घ्यायोगो। पाते व्यतीपातः। कालि... विवाहः तत्र तु डा सु वर्ष मध्ये नदर्श तदर्श कं।
पिंडदानं स्मानेन कुर्यात्तिलतर्पणं। वृद्धिमात्रे तथान्यत्र पिंडदानं निराकृया। कृतागर्भादिभिर्मुख्ये मासमेकं तु कामिंरां मनुः। शौ-
श्राद्धं न कुर्वीत नरो हंसी की त्रिंत्राहिस्रा। सध्ये पौरुषपोष्णे वसन्ते पि चैवाधिशेरदिने। वायुपुराणे। विमुहूर्तं तु सापाद्धत्कं श्राद्धं
विवर्जयेत्। उपसंध्ये न कुर्वीत पिन्तरगं कथंचन। सकालस्मासु रः प्रोक्तस्त वृश्राद्धं विवर्जयेदित्यादि। मलमासेपिनीर्थश्रा-
द्धं कार्यं। नित्यं नैमित्तिकं चैव श्राद्धं कुर्यान्मलिम्लुचे इति माधवाली वचनात्। नित्यं नैमित्तिके कुर्यात्प्रयतः सन्मलिम्लुचे। ती-
र्थश्राद्धं गजच्छायां प्रेतश्राद्धं तथैव चेति बृहस्पति वचनाच्च। इदं च कृत भोजनादेः संध्यायारात्रौ मलमासे श्राशौचे नाम्नु देश-
स्नानश्राद्धादि विधानमाकस्मिकतीर्थप्राप्ति विषयं तत्तु दिवसे विषयं तीर्थकालनिरूपणनिमित्त स्वयं पुरुषप्रयत्न साध्य तया
यद्दर्शादिवेलहरणात्। ततः श्राद्धनिषिद्धकालेरवं बुद्धि तस्तीर्थप्राप्तिं कुर्यात्। आकस्मिकप्राप्तौ तु निषिद्धकालेपि यदरणप्रश्न

त्रि॰स्था॰ ४१ न्मादावित्रस्तान श्राद्धादि कुर्यादिति। तत्पर्यायदं चामहेमश्राद्धविषयं। तादवेतैर्वचनैर्वचनचारितार्थ्यात्। अन्नश्राद्धं तु राद्धि सं
ध्ययोर्भुक्तवतश्च तीर्थश्राद्धोद्वितीय दिने। आशौचे तु तीर्थश्राद्धो आशौचापगमे तीर्थसंवंधस्य तदानीमपि सत्त्वेन पदरा
दिवैलक्षण्यात्। मलमासेतु तीर्थश्राद्धोविलंबविधानात्तदाश्राद्धं हेमात्रामुद्र मासेपि पुनः कार्यं तीर्थप्राप्तेस्तदापि सत्त्वात्। का
लस्तु आफलाधिकाचयोगादिकं मासिकं श्राद्धं चापरपक्षिकं। मत्स्यादिकं नैर्थिकं च कुर्यात्। मासद्वयेपि चेति स्मृति
द्विकालिखितवचनाच्च। अत्रापरपक्षिकं प्रतिमासं दर्शकृत्यश्राद्धं त्रतुमहालयश्राद्धं तस्य तद्वापि विधानात्। नचेदं वचनं
यत्र तीर्थश्राद्धविषयं। एतव्यतिरेके रौरवनरकश्राद्धसिद्धे तौर्थिकयहरणानर्थकापसंगादितिदिक्। आद्यं प्रवालणोविशेषो देवी
पुराणे। तीर्थं प्राप्य हरणां नैवपरीहेतन कदाचन। अन्यत्रापि तीर्थं ममतु प्रत्तं भोज्यं तेन मनुरब्रवीत्। पाद्मे। ब्राह्मणान्न परीक्षेत तीर्थे
कालेत्र चिंतयेत्। स्कांदे। नपरीक्षो द्विजस्तीर्थे स्वत्रार्थी भोज्यरवच्च। एतत्स्वश्राद्धहंद्वा स्वरणाभावेप्यनु सार्थं। तत्रापि गुरोनिंद्य
रीहेत्न पातित्याद्यत्र दोषयुक्तेषु परिहर्त्तव्य एवेति स्मृतिरत्नावलौ राग्यकाव्यत्वात्॥ ॥अथ तीर्थश्राद्धे निषिद्धानि॥ ॥दे
वी पुराणे॥ ॥आद्यं तत्र कर्त्तव्यं देवविवर्जितं। ऋचित्तु नावाहनं न दिग्बंधो न दोषो दृष्टिसंभवः। सकारुण्यपचकर्त्तव्यं तीर्थे
श्राद्धं वि च हरेत्। भविष्ये। देवाः पितरो यस्माद्गंगायां तु सदास्थिता। आवाहनं विसर्जनं तेषां न विद्यते। मत्स्ये। आवाहनं राम॰ ४१

न तीर्थे स्यात्राह्ध्यदानं तथा भवेत्। आहूताः पितरस्तीर्थे कृतार्थाः संनिवेयतः। अग्नौकरणमपि तीर्थश्राद्धे नेति स्मृतिरत्नाव
ल्यां। देवलः। नचात्रदीपेन गंधाद्वीन्वाद्विजाः प्रतिषेधयेत्। तद्रूपाः पितरस्तत्र समायांतीति दैवकं। अर्घ्यं चावाहनादि निषेधस्ती
र्थश्राद्धनिमित्तकमेव श्राद्धेन तु तीर्थाधिकरणकश्राद्धमात्रे। तथैव निमित्तसप्तम्यां तन्निमित्तकश्राद्धे एवं तन्निषेधात्।
श्राद्धेरेवेतुपसंहारश्रोतन्निमित्तत्वकान्तनाच्च। न तु निमित्तसप्तम्याः श्रदानरससमभिव्याहाराधीनत्वाहाकागस्त्याम्
निमित्तत्वस्याधिकरणसप्तम्येवेयमत्र कारकविभक्तित्वेन श्रुतित्वेन च बलवत्त्वात्। न। कारकविभक्तित्वासंभवेन वाक्यस्यैव
निर्णायकत्वसंभवात्। तथाहि। न तावदियमधिकरणसप्तमी अंगाद्यरेणादेवास्यं तामि निवतससेषपसि स्थानपतौति
यदाशेषितया तीर्थस्याधिकरणत्वं दोषयमीतियुक्तं। श्राद्धे तु तीर्थस्य संस्कारापत्तिः शाखाज्ञानात्। नापि तत्तया मुकुमारि
तिष्ठं गितया तीर्थस्याविधेयत्वेनेति कर्तव्यतानाकांक्षत्वात्। फलकरणत्वाभावाच्च। नापि शेषत्वया आगम्यभावेतु विप्रस
श्राणावेवोपपादये तत्। यदा हवनीये जुहोतीति वत्तीर्थस्याधिकरणतां। श्राद्धं प्रति तीर्थस्यां गत्वा गदे किमयाराणस्यदर्शश्रा
द्धादेर्वैगुण्यप्रसंगात्। तीर्थश्राद्धप्रति तीर्थमधिकरणतयांगमिति चेत्। न। तीर्थश्राद्धयोः संबंधस्याद्याप्यनिर्णीतत्वात्।
तीर्थश्राद्धशब्दार्थस्यैव निर्णीयमानत्वात्। तीर्थपदाल्लक्षिप्रसंगाच्च। अत्राभिमंत्रे तु हेतौ निमित्तकारकविभक्तित्वासंभवानि

त्रसतम्भवेयं तत्त्वेत्ति। तत्तीर्थस्य स्वदानत्वकादाचित्कत्वाभावाविनिमित्तयोगात्मात्तत्वेन तत्स्वनिमित्ततत्तात्त्वाद्येकोनिमित्त
त्तास्त्रानेरेव तुकर्तृमित्यादिवचनालोचनया लभ्यते। ननु तत्र्यापितीर्थमित्तकं पक्षाद्गत्वाद्याद्विवर्जयेदित्तुदेस्य स्माद्वि
शेषणाभूततीर्थारव्यनिमित्तविवक्षापापानुभयपात्त्वाधिकरणेन्कारीस्माद्वाक्यभेदः। न तम्भस्माद्मात्रेस्माकाहनादिनिषेधः
स्यादिति चेत्। भैवं। उद्देश्यविशेषणादिवद्धापादिवाक्यभेदो न विशिष्टोद्देश्यतांपामेवा वरुणः प्रवानिवानुवाहमेत्रे
णोक्तसाहित्यविशिष्टप्रेषानुवचनोद्देश्यतायां। तत्र च विशिष्टरूपेणाप्राकरणिकत्वसाम्रचप्रमाणोपस्थापिततयानुद्दि
श्यपरिहत्तिरेव विनिगमहेतुः। प्रेषानुवचनेऽभ्यात्मकमेत्रस्य पाठेन। तत्तोन वाक्यभेदः प्रपंचितमेतदुपदेवेनेतिप्रप
ञ्चितो। तत्[illegible]स्मात्तीर्थप्राप्तिनिमित्तिकस्माद्भुरवाप्त्यादिनिषेधो ननु तदधिकरणकस्माद्भमात्रेऽरूपाहारादावपि तथाऽऽप
पतद्धितयेस्माद्विष्णुवद्धितयेन तथा। संक्रांतिषु वकर्त्रेऽव्यपिंडनिर्वपणाहत इति संक्रात्यादिनिमित्तकरव पिंडनिषेधो
न तु वार्षिकादौ तद्धत्। तद्रूक्तं। तत्त्रान्यनिमित्तकेपि तत्पञ्जोपिंडप्रदानं भवेदिति। एवमप्यावाहनस्य संनिधिफलक
त्वात्तीर्थेऽपि तत्तरूपसंदासंन्निधानात्तत्तत्पं हतेऽध्यवेयोऽन्छेदेनोद्भवनादिव न्द्वारवाधात्तीर्थाधिकरणकस्माद्धमात्रे र
व वैयर्थ्यप्रात्यावाहनवाधः स्यादिति चेत्। मैवं। तेन त्वयं किं पनदिव तत्संनिधिप्रतिपादनस्य हेतुत्वं वा दृष्टात्। संनिधाने

पितोपचारत्वेनावाहनसंभवाद्दुद्वोधनमत्। तीर्थनिमित्तकेतु निषेधाद्वाक्यः। तथा। न देवतापाः शारीरः संनिधिर्देवताधि
करणे शरीरनिराकरणात्। नाभियोद्भः। शब्दमात्रस्य देवतात्वांगीकारादवेत्त तेन तदसंभवात्। किमर्थं तर्हि आवाप्ता
वाहनं। अदृष्टार्थमिमेवहिं। अत एवनोवाहनमंत्रोऽपि तथाहुः। अत्र कश्चित्। न देवताधिकरणे सविधानेनिरस्तं किं तु
प्राधान्यं। संनिधानं तु कर्मारंभेमंत्राणां देवतावेदितव्याः। सम्यस्य मन्त्रसिदेवतां हविर्ज्ञपत इत्यादिभिरुद्देश्यतयाकल्तेबुद्धि
संनिध्यवगमात्त्रिवेहु मपाकमेव। किंचाग्रहर्वशब्दस्ववेत्वात नन्न प्राधान्यनिरासः। इह चाह चाहं संनिहितस्तव पापाणप्र
तिमादिषु इति श्रीरामोक्तेः शालग्रामशिलायां तु नित्यसंनिहितो हरिरित्याद्यकेश्च संनिधानं सर्वसंमतं। पितृणामप्यावा
हनादुदहित्वाणतः। आसनात्सोधकरणीं कामुपस्थेत्र सत्येन त्रे इत्यादिभिः संनिध्यवगतेः। अयथानोद्भूरेत्र्यमं पात्रेपितृणां
यद्विपातितं। आवहात्तत्रति छंतिपितरंशेनकोब्रवीत्। एवं वक्ष्यमे चितान्द्विप्राप्तिरः संविद्धं तिथे। यजमानंचत्रोराविंपसेषु
निपन्नात्तनेइत्यादिभिश्च तदवगतेः। किंचान वमेदवनापाविय यहादिपंचचकनिराकृतिनव्यसविनेपाकृता। किं तु तद्दि
द्धयेपुराणात्मामलत्पाहि। प्राधान्येदेवतायानिर्वापादिमंत्राणामग्न्यादिस्वरूपप्रभृत्यागसंसोदेस्यादिदेवताभावान्मत्रा
प्राञ्चहृणाभावः प्रसज्येत। तथाच न मातादर्द्धितेन पितेत्याघहृदर्शनानुपपत्तिः। अत्र एवप्राधान्येतुमंत्राणांतत्प्रकरणसत्त्वान्त्रमंत्रप्रका

त्रि॰ सा॰ ४३ शितदेवताः क्रतुरपूर्वसाधयन्तीति देवतानां नरवत्साविकता ग्रहः सिध्यति। तन्न यथा प्रकृते देवताप्रकाशिमारवादिकृतावपी
तिप्रकृतिवद्भावसिद्धिः। तथा। शिरस्त्रां मंडूकादीनां पञ्च मूलादीनामोषधीवनस्पतीनां ह्रिंकारादीनां चाग्न्याचरितानामचेत
नानां फलदातृत्वासंभवादिष्टार्थमेव प्रधानं देवतानुत्तरगुणभूता। न तु श्राद्धे तत्कर्मवादीवन्त्रहस्त्रोपिविमुच्यतोऽस्विषः प्र
तिपदीमादिवचनैः श्राद्धकर्मणाख्यफलार्थत्वेश्वन्दर्शदेवतात्वं तेषामपि श्रापिवादाद्ब्रह्मदेवतादितिन्याय विषयत्वेपानवद
नपितृकस्येव श्राद्धकारो दोषमुतैः। श्राद्धपिचरर्यमिति वाच्यं। तादर्थ्यबोधकविभक्त्यभावेन श्राद्धादृष्टकेतारूपत्वात्। तादृ
शस्यापितु संयोगपृथक्त्वेन फलसाधनत्वोपपत्तेरिति चेत्। मैवं। यागस्य देवतार्थत्वप्रमाणाभावात्। श्राद्धस्य तु तदर्थत्वे बहु
प्रमाणसत्वात्। तथा हि। अथैतं प्राचीनावीतिनः पितरः सव्यं जान्वाच्याचैषां सीदत्स्वानुवी[illegible]न्ता सिमासिष्वो शन्तुमि
ति श्रुतिः। आज्यादिनानुदक्षिणातपिन्दत्तविषेश्च नवे[illegible] अत्र पितरो मादयध्वं। अत्र सावेनत इत्यादिमन्त्रलिंगं च। अथोक्तुने ने
देवस्वाः पितृत्वाद्द्विज[illegible]तर्पणोः। नरकस्थास्य तृप्यन्ति पिंडैर्दत्तैस्त्रिसिंधुवीतिवृहस्पतिः। विष्णुपुराणे। श्राद्धेन पितरः
तृप्तिं प्राप्नुवन्ति वर्षिकां। ब्राह्मे। पितृभ्यश्च तदा श्राद्धं दत्तमक्षय्यमुच्यते। पाद्मवल्काः। तेतृप्तास्तर्पयन्ते नारदं तत्र काङ्क्षा
यन्नमन्त्रादिवचनैः। कर्मपादिप्रकरणस्थैरन्वाधायिपुराणादिवचनैः पितृतृप्तिरेव श्राद्धफलमुच्यते। श्राद्धः प्रयोजनं विधेयं। तेन रा॰न॰ ४३

तात्पर्यपर्यन्तेन मितत्वाद्दोफलदातृतापि तेषां गम्यते। यदापि पेयेत्यादिमंत्रलिंगात्सोमपाश्चापि पित्रर्थता। तिरस्त्वा येन पिंडेन त्वा
दिना प्रेतस्याद्यानामपि पित्रर्थता शरीरसिद्धिद्वारा। अतएव चविष्टस्यापि सिद्धिः उद्देशत्वगोचरा। नरकस्थादिवत्वात्। अ
योगयोः समासाद्य पितॄणां निष्कृतिः क्रतौ इत्यादिवचनैः श्राद्धफलमपि कृतं। अतः श्रुत्यादिशात्श्राद्धस्यापि च पित्राग तेनीत्रा
राद्धदृष्टत्वं। नचैते नैष्ठिवादाः पारार्थ्यशास्त्रदृष्टविरोधाद्यभावात्। अतः श्राद्धे देवताप्रधानभूता कर्म तु तद्गुणभूतं। यागे तु दे
व एतत्सिद्धिः। तदिदं मीमांसा नातिशीलनमूलकं। तथा हि। यत्रावत्कर्तृबुद्धिसंहितत्वाद्देवतायाः संनिधानविधासंभवइति
तत्राकेनचाकर्तृबुद्धिसंनिधिर्विषयतात्यो नियिध्यते। आवाहनप्रयुक्तोहि संनिधिर्निषिध्यते न त्वावाहनप्रयुक्तः बुद्धि
स्थीकृतस्यैवावाहना बुद्धिसंनिधेरावाहनेनारम्भाभावात्। यावाहनप्रयुक्तेव बुद्धिसंनिधावावाहनबाधवत्पुरुकमपि स्तुयागे
तन्निषेधवनिवर्तीत्याश्रद्धेवबुद्धिसंनिध्यभावप्रसंगः। यत्रावाहनप्रयुक्तः संनिधिस्तद्विषयत्वादिनिराकरणं रस्तएवगमनागम
नादिदेवताश्रयिता। कर्तृबुद्धिसंनिधिर्न निषिध्यते। इत्थं स्तुत्वा श्रद्धे संनिधिरूच्यते। यच्च पितृसंनिधानप्रतिपादकोपन्यासः
आज्ञान्दित्यादिः। सतु त्वं एव। आयान्तीदृश्य पिमिरीलिते भिः। आयपमायाहि वीतये। यावताया हि दीनोऐभिरग्ने सरथं याहि। इ
वेपिमा पश्यो हाः। इंद्र आगच्छ हरिव आगच्छ। सुतः सुतामा गच्छमघवंत्रित्यादिषु मीमांसा गदेवतायामपि संनिधिवचनात्। तु

त्रि॰सा॰ ला पुरुषादिषु वस्वादीसादिवद्रुद्रादेवतासंनिधिप्रतिपादनं। भारतादौ च संवर्त्तादिषु तेषु देवतासंनिधिः प्रतिपादित एव। तदपि
४४ वसेदिवसहादित्रिकरणां देवताया इह सिद्धेषु गुणत्वार्थमित्यादि। तदपि पितृषु संदेहनुत्थे। अद्देवताप्राधान्ये पक्षे मातामहलो
मेत्वाधिकवचनानां पितृपदवत्सैत्तिरीयशाखास्थमंत्रस्य मुख्यत्वापि तत्र यद्याद्देवपित्रादिस्वत्वप्रभुक्तौ संस्थो मातामहादिस्थाने
तदभावान्नं तत्काम्यात्वदहाभावप्रसंगात्। न चाव मंत्रोहेन यथान्यायमपि तत्र हृदयस्थानानुपत्तिः। न चायमेवोहविधिर्नतु दर्शनमिति
वाच्यं। मातामहस्याद्यविधात्वह विधौ च वाक्यभेदप्रसंगात्। इदं च सर्वमनुपदमेव स्पष्टयिष्यामः। यापि तिरस्कारमित्यादिषु क्रिया
पितृमेव शास्त्रिकस्वकर्मणां नरकस्थानां तिर्यग्योनिगतानां कृमिकीटादिरूपाणां तृप्त्यादिरूपाणां मुक्तानां वा पित्रादीनां
नाके नापि सचेतनेन प्राप्त्यान्यफलदानं तथा रंगीकृतमशक्यत्वात्। योपि यागस्य देवतार्थत्वेप्रमाणाभावमुक्त्वाद्यस्य पित्र
र्थत्वे प्रमाणाभावात्। सोपि तुल्यः। तत्र यथा तावत् येनं पितरः इति क्रतिरूपं स्तात्स्वाःप्रवेगमोपां प्रजापतिं वैभूतान्युपासीदन्प्रजा
वैभूतानि तु नो धेहि यथा जीवामेति। मोदेवाय ज्ञोपवीति भूत्वा दक्षिणं जान्वाच्य उपासीदंस्तान्प्रब्रवीत् यज्ञो वो न मम ते वद
स्तर्पो वो ज्योतिरितात् दन्नेतरं यैनं पितर इत्यादि। तेन तस्याः श्रुतेः प्रवेगमाकार्यं त्रयागस्य देवतार्थतापवेनत्रभागान्
द्वस्य देवतार्थत्वमितिं तो कृतादित्योदिवद्वदेशोऽष्टथिव्याः। इशानमस्यनतः स्वर्दृशं। अहं मुवेवसुनः पर्वस्परितीशित्वा। तत्र रा॰म॰ ४४
कोशपानं विना देविकश्नारतामेवेतत्। तथाच्यद्दीदिंद्रप्रस्थितेमाहवीर्यीति। एकपात्रतिथापि वदितिः

ऐवेनमिंद्रः प्रजयापशुभिस्तर्पयति। स एवेदं भूतिं गमयति। अहं दाम गृणते पूर्व्यं वस्वहं ब्रह्मकृणवं मह्यं वर्धनं। अहं द्रुदाः पूषेत्यादिफलदात
ता। तत्र एवेनमिंद्र इत्यादितत्तिः प्रतीयते। पुराणेतिहासेषु तु इदंशावचसा गणैव नास्ति। एवं सति यद्येते षां सत्वादिरूप
तया गतिस्तर्हि पितृप्रीत्यादिप्रतिपादकेषु विधिषु कृपापरिहायदीयतां दृष्टिः। तत्रापि वाऽशाब्दप्रवृत्ताद्यनकमप्रधानं
स्या तु गत्वे देवत्वं स्तिरिति न्यायविषयतायां न कश्चिद्विशेषोऽदिव्यदृष्टावि निष्ठाप्रापः पितृशब्दः। यदपि उद्गेरतामगोत्रा
णीत्यादिपि वादि तत्फलप्रतिपादकोपाहरणां तत्राप्यद्रुद्रस्य देवतार्थत्वाभावेन किंचिद्विरुध्यते। न हि यत्र तत्र ननकादयः एव
यदि देवताः किंतु वस्वादयः। पित्रादिशब्दस्तु केवलं तेषु तेषु वसमाकानवत्वाच्चैते कांभवतिः। एवं च यद्वेन वस्वादयैतरव
तुमाद्वेष्टरूपाक्षतमः। तद्रूपाकं च यद्वेक्ते जनकादितृप्तिं नरको द्वारं वा करोतीति किमनुपपन्नं। तदुक्तं याज्ञवल्क्येन। वसु
रुद्रादितिसुताः पितरः श्राद्धदेवताः। प्रीणयंति मनुष्याणां पितॄन् श्राद्धेन तर्पिताः इति। अत्र च श्राद्धकर्मगतं प्रीणकत्वं तत्स्थाधन
स्ते तेषु वस्वादिरूपश्चयितेत्। तत्र एवेनमिंद्रः प्रजया पशुभिस्तर्पयतीति वचनात् तस्य तर्पयंत्येनमित्यादावप्येवमेवोपचारः। तत्रश्रा
द्धेन तत्तत्प्रभूतिफलं जनकादिगतं कथं जायते कर्त्तरि समवायित्वात्फलस्येति वाच्यं। यतोऽधापुत्रगतमृतत्वादिवत्तस्य रोगनाकर्तृये
न फलबोधनाः। एतद्व्यापकरोति पुराणमभिधास्यतः इति नेह प्रपंच्यते। किंच। पितॄणां सन्निधानं गीतं हस्टेट संमवयर द्रा

त्रि.सा. कल्पना द्वावाहनस्य संनिधिरेव फलमनुपेयं। तथा च तीर्थादिकरणकस्माद् इमो के आवाहनवादः स्यात्। दिनं से त्रिरिति त्वेनेक
४५ लस्या म्नातरवला था त्व उदकेन तु लालसं स्टेट प्राजापत्यमित्यत्र तंडुलेषु विलक्षीभावः स्यान्न तः सिद्धाव घातवाधवत्। न च
नियमादृष्टार्थमावाहनं तत्र भविष्यतीति वाच्यं दृष्टार्थीके दृष्टद्वारे वा दृष्टजनकत्वात् फलस्य इव दृष्टलोपे तस्यापि लोपा
त्। नियमादृष्टस्यानुनिष्पादितया वाविनवद् प्रयोजकत्वाद् तस्मादपि तर्पणं संनिधिसंभवः। यदि च पितृसंगी- किंच ते ग्रहादि
वंचकमनुपेत्य तदाविरोधः कर्मणीति चेन्नानेक प्रतिपत्ते ईशनादिति व्यासो क्रेन तुल्यकरणी प्रायमिकन्याये नांगीक्रियते
द्वता स्तु पितॄणांगीक्रियतां वा ज्ञेमिति मुलिमतेन पितृघ पितृ ईरतीय मुच्चिंत्यत्नति द्वयेन तीर्थविधि तक रव म्यादेवचन्या
वाहनवाधो न तु तीर्थविधिकरणकस्मादमात्र इति॥ ॥यत्तु किंमर्थं तत्र्यन्वाप्यावाहनं। अदृष्टार्थमित्यवे ही स्तु क्राः हरवना
वाहनमंत्रो होमीस्तुकं। न तु विंतं। आवाहनस्यादृष्टार्थत्वेपि मंत्रस्यानुष्ठेयार्थस्मारणेन दृष्टार्थवाहनमंत्रो होमीस्तु कं। न
तु विंतं। आवाहनस्यादृष्टार्थत्वेपि मंत्रस्यानुष्ठेयार्थस्मारणेन दृष्टार्थत्वात् तावतैव चोहापत्तेः। नहि किं पापा अदृष्टार्थत्वा
त् त्याधने यं त्रेदूहाभावः। एवं च मन्त्रपाठसाधनीभूते स्वाहानिगदे ऊहाभावप्रसंगात्। अपि चापितृव्यविषये अत्र देवाग्ना राम.
नुवः पितरः सोम्यास इत्यावाहनमंत्रस्य पितृशब्दस्य प्रकृतिवन्मातामहादिस्थानेपि समवेतार्थत्वाद्दर्शितरामा वादेवन्नैः ४५

प्रोक्षा। तथाहि देवात्वयं पितृशब्दः प्रयुज्यते। कविज्ञनकत्वगुणाश्रिता पिता यस्य तत्रतः स्यान्नाचेत्त्वापितिः। तथाहि देवता
यं पितृशब्दः प्रयुज्यते। कविज्ञनकत्वगुणाधि[illegible] सं साधारणेन गणदेवतावाची। मरुदादिशब्दवदग्नि
ष्वात्तादिशब्दवद्वा। प्रेते पितृत्वमापन्ने सपिंडीकरणादूर्ध्वमिति विमस्य तेः। ततः प्रभृति वै प्रेतः पितृसामान्यमाप्नुयादिति हारीतो
क्तेश्च। एवं चैकोद्दिष्टे अभिलापनगत्स्यपरिशिष्टोदितः पितृपादप्रतिषेधोप्युपपन्नः। अत एव मातामहपितामहादिष्वपि पि
तृशब्दः साधारणो दृश्यते। पञ्चाः पितृभ्यस्तदनुभन्नाम्नाद मुपक्रमेदिति। पितृणो नेषु प्रेतपावं प्रसे चेति हितिचामातादिसा
रणोपि। तत्पयं तु पितरः सर्वे मातामहामहाद्य इति॥ यत्तु पितृपदस्य साधारणवाचकत्वाभावे हेदेवे अकृतपः पित्र्यो। पित्र्ये कर्म
णि विद्वद्भिर्ग्राह्यः कुतपः कालिकी। पितृभ्यो रजतं देयं। पितृपात्रं तदुत्तानमित्यादिपितृशब्दमात्रयविहितं मातामहादिश्रा
द्धे न प्रवर्तेतेति तद्धरणं। तत्र उपदेशतोऽप्राप्तावप्यतिदेशतः प्राप्तिसंभवात्। तस्माद्दक्तदुक्रमेणैव साधारणः पितृशब्द
तथा च पितृभावोपाधि नाम मातामहादावप्यविकृतस्यैव पितृपदस्य समवेतार्थत्वात् प्रयोगोपपत्तावूहप्रसक्तिरेव नास्ति
आवाहनादृष्टार्थतया किं निवारणीयं। किं तु प्रयाति वा एतद्दोषः करं यदेन दहतितस्माद् द्वेत्रौ सेदितिस व्यूहनिषेधादपि ता
त्राहप्रसक्तिः एतेनैव निरस्तं। यत्तु अग्निदाहा यथार्थमूहप्रोदितेन प्रकृतावमर्वं स्याहि हेतो वचनादिति कातीयवचनादित्यादि

त्रि·स्था·
४६

मत माता मह्यादिष्वादेवि तत्त्वहविषेत्यत्रैव। अत्रापं तु नः पितरः तिलोसीति मंत्रे स्वधया पितॄन्। ऊर्जं वहंतीरिति मंत्रेत पितृपितृ
मत्रपितरो मादयध्वं नमो वः पितरो रसाय अमीमदंत पितरः एत वः पितरो वासः इत्यादि मंत्रे पुपितृशब्दस्थाने मातामहादिश
ब्दोहः कार्यः समवेतार्थत्वादेवेति। पितृभावात्तु प्रातिपदिकांशे तस्य पितृशब्दस्य मातामहादावप्यविकृतप्रयोगोपपत्तेः। कुतस्त
त्प्रतिषेधाख्यः कालीपवन्नतत्रोहप्रकरणपदितं किं त्वाकांक्षाधीनं तत्त्वविधादिप्रकाशकत्वमेवानुमित्र विषयत्वेनानुपपत्तेः। ते
चैवं तिलोसीत्यादिमंत्रस्य पितृप्रातिपदिकस्य साधारणत्वाद् हाभावेपि बहुवचनस्यैकस्मिन्मातामहादावसमवेतार्थत्वादे
कवदूहः स्यादिति वाच्यं। प्रकृतौ बहुवचनस्यासमवेतार्थत्वे विकृतावप्यधिकृतस्यैव प्रयोगोपपत्तेः। अदितिः पाशानिति वत्। प्रकृ
तिस्त्रपितृपर वमंत्र वद्याप वस्त्रेति वद्यपयाकथंचिद्बहुवचनोपपत्तिः। एतेन बहुवचनोक्तपितृशब्दस्य नते देवता प्रकाशकत्वेन
प्रकृतौ समवेतार्थत्वेपि प्रतिपुरुषं बहुवचनेमेन हः पितरो वास इति न स्यन्दयकृत्यकिति वचनबलादेव। विकृतौ तु पावहद्
नं वा वनिक मितिन्यापाद्द्वचनाभावादिकवचनांतत्नयोः इति निरस्तं। वचनस्य बहुवचनविधौ तात्पर्यकत्वेन पितृशब्दप्रयोगम
धानेप्यविशेषात् तत्सर्वं प्रसंगेहाभावापत्तौ पितृशब्दोक्तिविरोधात्। किंच एवं तर्हि वचनादेव बहुवचनस्य प्रकृतावसमवे
तार्थत्वादिकृताव पि वचनाभावे प्यतिदेशात्। पाशान्याये नादिकृतप्रयोगस्य भेदेदितिनोहः स्यात्। किंचारवहं इत्यत्र मंत्रमा राम·
४६

विषयत्वाद्द्वयसमवेतांतरे कार्यातिः तस्मात्साध्वबहुवचनकं मंत्रमनूह्य बहुवचनेध्यकृशब्दार्थमतामहत्रिविधत्वे। यदा सर्वमनू
ह्यावासोहात मेवविधत्वनतिन वा वनिकं बहुवचनं। न त्वेवमपि पार्वणीन नकथा इतिलावापादिकार्यमेवप्रकृतिरस्तु। पितामह
प्रपितामहसंबंधिकार्येतु विकृतौ भविष्यतः। अथ केच पितृशब्दः समर्थः तद्वचनमात्रेत्वत्तर्थो। अन्तउतरयोः कार्ययोः पितृशब्दस्था
ने पितामहप्रपितामहशब्दावूहितव्यौ बहुवचनं तु पयाक्षिप्तमेव। तथा तु मात्रादौ सुतरामूहो भविष्यति। एवं चापि शब्दोऽने
कार्थो पितृकल्पनीयो भविष्यतीति चेत्। न समानप्रकरणेऽर्थान्नेद्द्वदानन्याये नप्रकृतिविकृतिभावात्। तथा चनिवृत्तसमवेता
र्थत्वाय सर्वेषांत्रपुक्तिभिरनेकार्थता प्यनन्यगतिकतया स्वीकियत इति। यदि चतत्रैकत्र एकोहोभ्युपगम्यते तर्हि मुखं तोपिन
र इत्यादि वपा नांवचनमपार्थकं स्यात्तस्मिन्न्नेत त्व। पितृशब्दः प्रकृतावविकृतावपि समवेतार्थत्वान्नोहं यति। बहुवचनं तु
प्रकृतावसमवेतार्थत्वादिति। यत्तु विद्युवचनं। मातामहानामप्येवं श्राद्धं कुर्यादिचक्षणः। मंत्रोहेन यथान्यायं शेषाणां मंत्र
वर्जितमिति। तदपि नसर्वांकमंत्राणामूहार्थं यथान्यायमित्युक्तेः। अपं चोहेन्यायः। सुरलार्थत्वादितिविशेषणोः प्रकृतौ प्रयुक्तो मं
त्रो विकृतौ कार्यद्वारातिदिष्टोऽर्थांतरेऽसमवेतार्थपदवत्तया प्रयुज्यमानः प्रकृतिवदूह्योर्थान स्यादतः समवेतार्थपदवत्तया
प्रयोज्य इति। तदाहुर्मंडनकाराः। मुख्यहृदार्थतासमवेतार्थं तादिभिः प्रयुक्ताः प्रकृतौ मंत्रा यतः कार्यातिदेशतः। विकारेष्वपि

त्रि॰स॰ पिंडो ह्यः कार्या पंच्ने युपं वधा। अर्थांतरेयु स्वर्गार्थिंद्वारे रोगा हं वंत्रंतिन इति। पंचधा चो कास हसोमध्ये रेः। प्रकृतिविधिना भावे दिषा
४७ नेन विकारतः। स्वशब्दार्थविशेषानुवादात्तत्कार्यकारितेति। मृतौ क्रमं वेषु वप्रकृतिरदिकृता वपि पितृशब्द स्य स मवेतार्थ
त्वादर्थांतरे प्रयोगाभावान्नोहः। कोर्थं हि मंत्रोहे न यथान्यायमित्यस्य उच्यते। मुधंतोपि तर इत्यत्र न्यायाहृहः। अदि मृतौ को
पाद्विनापित्र पदस्य वक्रो मुधंतोपि तामहः। मुधंतो प्रपितामह इति मंत्र द्व पपाठो नर्थकः स्यात्। अतो जनक त्वाकपाधिनेव प्रत्रू
त्तिः। तेन दिष्टो तोमातामातामहादिष्वाद्दे ऽर्थांतरत्वादूहः। सोपि माति प्रातिपदिकमो ने स्येव। बहुवचने तु प्रकृतावेव एकस्मिन्नित
र्थ समवेतार्थमिति नोह्यः। ततस्म मुधंतो पमातरः। मुधंतो मातामातामहा इत्यादूहः। एवं पितामह्यादावपि। पितृभ्यः स्वधोच्यतामित्यादि
यथाशास्त्रितो मुदूनमेव वदेवपाठक्रे प्रोत्तत्रापि तद्देवोहः। तत्रापि कात्यायनगोभिलाभ्यां मातामहेभ्यः स्वधोच्यतामिति विषे
तः पठितो मंत्रो नलद्विषयेनोहः। मात्रादेरेतु भवति। तथा। हिरण्यकेशिनोयन्नो मात्रा प्रलुलो मे न्यादि मंत्रे युपन्नो मातामही प्रलु
लोभ तत्रन्नोरेतो मातामहो दृष्ट्रा मित्याद्यूहो भवतिपित्रादिशब्दानामेकवचनोनत्वेनसाधारणत्वाचित्वाभावात्। तथा तेच प
न्नो पितामही प्रलुलो भेन्यादि मंत्रपाठानर्थकाप्रसंगात्। तदुक्तं भाष्यार्थसंग्रहकृता। अत्रत्रेहोमेतथा स्वर्गेत्रलपिंडादिपाके।
पन्नेमातामहीत्यादितत्रोदाहरणमतेदिति उदाहरणमूहः। स्पर्शे एवतेततमः धुमानित्यादिमि वेद्ब्राह्मणमोज त्वार्थीमंत्रस्य राम॰
४७

र्वी। एवं मंत्र त्राषियवन्यायादूहस्त्र विचार्य कार्यः। यत्तु मंत्रोहे न मंत्रपाठेन तत्तु विकाररूपो हे नेच्यर्थ इति केश्चित्। तत्र। उहू
शाव्दस्य पादे ऽप्रसिद्धत्वात्। एवं कुर्यादिस्मे नैवधर्मांतरवन्मंत्रपाठस्यापि त्राभेरे तस्य चर्यत्वापातात्। गृह्ये धीमान् भागमा
भेनवा परिसंख्यापत्तेः। यथान्यायमित्यस्यानर्थकापत्तेश्च। तस्माद्दसहुक्त एवास्य विषयः। पितरेत ते ऽर्थ मित्यादि पुत्रहा
तद्विचारेण कार्य एव। एतत्साभिलाषमात्रत्वेन मंत्रत्वाभावात्। तत्वेवा शेषाणां मंत्रवुर्जितमित्युक्ता भिलापस्यापि वर्जित
प्रसंगात्। अत्र पमेव धिः प्रोक्तः। अद्वा रणां मंत्रवर्जितइति वहाहृत्तु एरोग कर्मान्द्र स्याप्यभिलापवर्जना पत्तेः। अतो शेषस्य एवमंत्र
शव्दो मुख्यो न्यत्र गौणः। अन्नरवो हृप्रपुरन्यान्यामसंचनेति सिद्धांत इति। एषपार्वणोद्दृष्टहृविवेकः। एकोद्दिष्टेन्वयंतोन त्रपु
राणोकोद्दिष्टे पार्वणादेवा सपिंडीकरणे न पितृभावापत्तेर्जीनत्वात्। प्रेतैकोद्दिष्टे त्वेकवचनं चान्वे रैतैकोद्दिष्ट इति विसुव
चनाद्दृहः। सपिंडीकरणाभावे न पितृभावापत्तेरज्ञातत्वात् पितृपदस्याभेदेन तत्पदमेकवचनांतप्रयोगमितिविसुवच
नादी। अन्नरए वान्यलापनग्रत्यपरिशिष्टे पितृपदनिवृत्तिरेकोद्दिष्टे क्रमात् समितिरलावलीकाररूपावहुवचनेन एकवचन
मात्रमूहितव्यं न तु पितृपदेदूहः। एकवदूद्देशे निवचनात्। इतरेषां व्याप्यायमूहेदिशेषावसरत्। तेषु मातृमानात् पितृमा
दिष्वाद्दे एकवचनमात्रमूहतव्यं पितृशाब्दस्य यथास्थितएव। तस्य प्रमीतमात्रवचनत्वादिति विसुव्रनार्थमाह। तथा चाह

त्रिं॰ला॰ लायनपरिशिष्टोक्तपितृपदनिवृत्तिरोधात्। प्रमीतमात्रवाचित्वेमुख्यत्वेपि तत्र तत्प्रयोगे सर्वोक्तोहाभावप्रसंगात्। अभिलापपि
४८ पितृपदस्यैव सर्वत्र प्रसंगात्। शिष्टाचारविरोधाच्च। विष्णुना तु पितृपदेन्यापादेवोहः प्राप्नोतीति तन्मविधायकवचनस्य प्रकृतत्वा
त्समवेतार्थत्वाद्धोहेन प्राप्नोतीति तन्नायं विधिर्नियमः एकवचनं चात्र हेतोनैव तस्मादेकवचनांतः प्रेतशब्द उपपत्तेः प्रेतेकोद्दिष्ट इतिसि
द्धं श्राद्धानां मंत्रवर्जितमितिविस्तुवचनशेषः। अस्यार्थः मात्रमूलपाणिः पितृव्यमातुलादीनामेकोद्दिष्टरूपे प्रयोगे पितृपद
वेन्नं त्र एवनप्रयोज्यः। ऊहः कार्यः। ननु पितृपदरहितो प्रयोगोऽपकृतत्वादिति। पितृव्यमातुलादीनामावाहनादिमंत्रवर्जि
तं कार्यमित्यर्थ इति। कल्पतरौ तु उक्तं लिंगं। अकृतविवाहभोगार्थं रक्षितस्त्री विषयमिदं पारशव करणादिस्मृत्यादावपि पर्यं चा
स्त्रीरणाम मंत्रकं श्राद्धं तथा भ्रातृस्तनस्वरा प्राहितोऽश्वत्रतो देशातेन कुर्वीतपैतृतदितिमरीचिः। स्मरणात्। अत्रस्त्रीणामिमञ्चल
विवाहस्त्रीविषयमितिहेमाद्रिः। प्राणिगितिः। अथतु पत्नीनाद्विजातयः तेष्वस्त्रीपारशवकरणादयोः संस्कृतत्वात्संस्कृतानामपिश्राद्धं
तथैवामंत्रकं कुर्युः। पहारश्चाणामितिकर्तरिषष्ठी। तत्रश्चवशीशेषाणांश्रूद्राणां तत्तुल्यानां पारशवकरणानुपनीतस्त्रीणां
च कर्तव्यं श्राद्धं तेरमंत्रकं कार्यमित्यर्थः। तदुक्तं श्राद्धं प्रकृतस्य पाश्चेत्स्वयं शूद्रः अमंत्रमंत्रकं कुर्यादनेन विधिना त्वयेति। म
रीचिः प्राणिहितानां तत्सादिवराहपुराणे। अथप्रेमेववधिः प्रोक्तः श्रूद्राणां मंत्रवर्जितः। अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेणगृह्यतेइति रा॰म॰ ४८

विप्रो मंत्रेण गृह्यते संबध्यत इत्यर्थः इदं च परिभाषा। न च परिभाषाप्रकरणेन नियम्यतेति वाच्यम्। श्राद्धप्रकरणपाठेपि अस्य स्वा
दानादावपि विप्रेणमंत्रः पठनीय इतिमूलपाणिः। अत्रामंत्रकमिति वैदिकमंत्रप्रतिषेधः। तेन पौराणो नाम गोत्राद्यभिलाप
श्चवक्तव्य एव इत्युक्तं प्रसक्तौ तु प्रसक्तप्रकृतमनुसरामः। तीर्थश्राद्धस्यपार्वणप्रकृतिकत्वपक्षे पुरूरवार्द्रवो वैश्वदेवेण समु
दातत्वाविनिवृहस्पति वचनात् पुरूरवो विश्वेदेवत्वेनपदावि प्राप्तोत्पादिनस्य संयोग पृथक्त्वेन काम्यत्वस्यापि सत्वाद्विशे
हतन्न्यायेन काम्यस्य नित्यबाधकत्वान्नैमित्तिकस्यापि चावश्यकत्वान्नित्यकाम्यचधुरिलोचनाविति उक्तोभावाविता
धुरिलोचनो भवतः। न च तत्र प्रधानभूतेनगोहस्त्वेन काम्येन नित्यांगचमसबाधे वीहकाम्यांगेन कथं नित्यांगबाधो गतस्य स्या
दितिवाच्यं। समानन्यायतया काम्यांगस्यापि नित्यांगबाधकत्वात्। पक्षापर्वणवा काम्यत्वादिति नकाम्येष्ट्यंगभूतो पांशुत्वेनजातेष्टेम
ध्यमेन हवीष्यासिष्टकृतइतिवचनविहितवीतेरकप्राप्तमध्यमस्वरबाधकत्ववत्। अतः काम्यत्वेनतीर्थश्राद्धकरणे धुरिलोचनौ
यदा तु कामाभावे केवलविकृततया करोतितदापुरूरवार्द्रवौ। यदापि हविष्यान्नेन वैमासमित्यादिगुणफलाधिकारो गोदोहवत्।
तदाप्तिकाम्यप्राप्त्यभावेन धुरिलोचनाप्राप्तेनित्यककर्मांतरवत्तेन च गुणफलविधेः कर्मसाद्गुण्यापादनतो वानकानेन स्वकाम्यगुणा
स्याष्टमिकन्यायेन पार्वणविकृतौ तीर्थश्राद्धे पुरूरवार्द्रवावेति वाच्यं। प्रकरणमध्यपातिकाम्यगुणविषयतायां स्यात्। हविष्याद्यप्राप्त

नि॰ सि॰ मन्वादिवचनैः सकलश्राद्धशेषमन्नाद्यस्मलं॥ ॥ इति तीर्थश्राद्धविधिः॥ अनिषिद्धानि तत्र संग्रहे च॥ ॥ अथ यात्रामें हेमश्राद्धादिति
४९ चारः॥ ॥ गारुडे। तीर्थेषु गत्वा तु यः श्राद्धं मामन्नं भोजयेद्द्विजः। कास्यापनः। आपद्यनग्नौ तीर्थे च प्रवासे पुत्रजन्मनि। आमश्राद्धं प्र
कुर्वीत भार्यारजसि संक्रमे। सुमंतुः। पाकाभावे विकारः स्याद्द्विजादीनां न राधिपा। अपत्नीकं महाबाहो विदेशगमनादिभिः सदा
वैव तु शूद्राणाम् आमश्राद्धं विदुर्बुधाः। आत्मनो देशकालाभ्यां विप्लवे समुपागते। आपद्यनग्नौ तीर्थे च प्रवासे पत्न्यसंभवे। एकद्र
मित्रहे चैव दद्यादामं विशेषतः। तथा। तीर्थे श्राद्धं प्रकुर्वीत पक्वान्नेन विशेषतः। आमान्नेनाहिरण्येन कंदमूलफलैरपि वा
मभावे कुर्याद्ब्रह्मद्विपजलेन वा॥ तथा। द्रव्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि। हेमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वला। एवं चा
नारूपेषु पाकेषु सत्सु पाकश्राद्धं मुख्यं पाकासंभवे ब्राह्मणासंभवे च आमश्राद्धं तदसंभवे हेमश्राद्धमपि वा पश्चाशिष्टा वा
रं कार्यमिति मदनपारिजातादयो नासाधुः। प्राच्यास्त्वेवं। स्थितिरलावतीकारादयः कामग्रहणे तीर्थादौ चामश्राद्धं हेमश्राद्धं वा
मुख्यं पाकश्राद्धं तु न भवत्येवेत्याहुः। एवं तु युक्तं पश्यामः। तीर्थे जलसमीपे श्राद्धमेव हेम्ना वा। गृहे देवद्विजानां नेषु आमश्राद्धं व
शास्यते। गृहादेशमुरां तु रायेऽपलभे तीर्थे निवापकृत् इति वचनात्। गृहादौ तु केनैवेति। दाक्षिणात्यास्तु भयं कुर्वंति। सर्वोत्तमा राम॰
पक्वान्नेन विशेषत इति वाक्यात्। अत्र यथादेशाचारं व्यवस्था। शूद्रेण तु सर्वदामेनैव कार्यं। सदा चैव तु शूद्राणामामश्राद्धं वि ४९

र्बुधाः। न पक्वं भोजयेद्विप्रान् शूद्रो पि कदाचन। भोजयंस्तत्र चाप्नोति स्यात्तमवृजस्य फलं लभेत्। इति सुमंतूक्तेः॥ ॥ आमश्राद्धे
तु विशेषः। व्यासः॥ आमं दद्यात्तु कौंतेय दद्यादन्नं चतुर्गुणं। यत्तु आमे दद्दक्षिणां तेनाश्रामे तु द्विगुणं भवेदिति मदनगुणाद
दानाद् आम्नोदेदितव्यं। अन्नमेव समर्पिते। आमं ददाति चेद्राजन् न्यूनान्मतद्विगुणं भवेत्। त्रिगुणं चतुर्गुणं वापि नत्वेकगुणमर्पयेत्।
ब्राह्मणाय प्रदातव्यं सर्वोपस्कारसंयुतमिति। अत्रोत्तरेणात्र रयश्ह्यमुख्यता। हिरण्यपक्षे त्रिगुणां चतुर्गुणां द्विगुणां वा दद्यात्। अ
त्राक्रो समममध्यमाने हेमं वा दद्याद्विगुणमित्यादि चतुरस्योक्ता एपेद्या। उशनाः। आमश्राद्धं यदा कुर्याद्विधिज्ञः श्राद्धदस्तदा। तेनै
वाग्नौकरणं कुर्यात्पिंडांस्तेनैव राणस्य विधाचतः॥ तथा। सिद्धान्नेन तु विधिर्यः स्यादामश्राद्धेप्ययं विधिः। आचारादादिसर्वं स्यात्पिंडदा
नेन समाचरेत्। दद्याच्च द्विजातिभ्यः पक्वं वामान्नमेव वा। तेनाग्नौकरणं कुर्यात्पिंडांस्तेनैव निर्वपेत्। तथा। आमश्राद्धं यदा कुर्याद्विधि
ज्ञः श्रद्धयान्वितः। उक्तरीत्या पूर्ववत् आवाहनादिकं यहणादिभिस्त्वाम आमश्राद्धे न तु तीर्थश्राद्धे तन्निषेधस्योक्तत्वात्। पद्मपुराणे
ते। आमश्राद्धं यदा कुर्यात् पिंडदानं कथं भवेत्। गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा। पिंडदानं भवतीति शेषः। आममन्नं पाक
सक्तुपायसेषु पयालोभं स्याद्वा। यत्तु आमेन पिंडं दद्याच्च द्विजान्यकेन भोजयेत्। पक्केन कुरुते पिंडं मामा त्रैयः प्रपद्यति। ता
तु भोमनुचः श्राद्धे नरकार्हो वसंशयः इति तदमावास्यादिपरं। आमश्राद्धे भोजनसंकल्पे पोशानादयो तु प्रयोजना निवर्तते

त्रि.सा. ५० कृत्स्नलेवद्यात्तत्। तदुक्तं तत्रप्रश्नोवगाहस्तु पप्रश्नोयथासुरं। आमश्राद्धेभवेदेषैतत्पोशालेदपंचमं॥ अवगाहेतुमुत्तति
विशने। ततश्च आमश्राद्धपक्षेएतेनभवंति आवाहनादयश्चतीर्थश्राद्धत्वात्। पाकश्राद्धेतुआवाहनादयएवनभवंतीति
विवेकः। हेमश्राद्धपक्षेपिंडनिवृत्तिरपीतिदिवोदासः। स्वस्त्यर्थसारेतुविकल्पः। आमश्राद्धेकेपोद्विनंतारणंमंत्रापिभवति।
अनरएवमशीकिः। आवाहनेस्वधाकारेमत्राद्यूह्याविसर्जनेअन्यकर्मेराघन्नत्यासुरामश्राद्धविधिःस्वतः। आवाहने। पि
तृन्हविषेअत्तवइतिमंत्रेअत्तवइपदस्थानेस्वीकर्तवेइतिपदोहः। स्वधाकारेनमोवःपितरइषइतिमंत्रेइषपदस्थितिपदेश्रा
मापेत्त्रहः। विसर्जनेवाजेवाजइतिमंत्रेउत्तायांतपधिभिर्देवयानैरित्यत्रयथाइतिक्रमस्यस्थानेतप्तेतिलोदूत्रप्पोहःका
र्यः। संघपिपूयतितारतहयोरूपदेनद्वहतीतिश्चूहोनिषिद्धःलघ्वाधिवाजेवाजेवतेतिकद्विवचनाहृदेमंत्रतिएवमिद्या
तमिति। अवमादोइत्यामास्निसाद्योहोपः। अन्यकर्मणीविसोहव्यरहस्येमादोनोदइतिमरीचिवचनार्थः। यत्तुदक्षिणादि
यथाशक्तिआमहेमश्राद्धयोरपिदेयमेव। सिद्धान्नेतुविधिर्यःस्यादामश्राद्धेप्यसौविधिरितिसुमंतुवचनात्। यदातुआम
स्याप्यहवोनसंतितदैकेनापिश्राद्धंकार्यं। आभावेद्विजाभावेतीर्थरूपेमहालये। एकस्मिन्नीपतेचात्रमर्थाल्पिंडान्स् राम. ५०
यज्ञपयामितिवचनात्। महातुरकोपिनलभ्यतेतदादर्भवटोपरिश्राद्धंकार्यं। अन्नंवाश्राद्धेदिष्टेत्। पात्राभावेरिवलेदेशा

पितृयज्ञखिलंत्तरणानिधायवादर्भवटूनासनेषुसमाहितः। प्रैषानुप्रैषसंयुक्तंविधानंप्रतिपादयेत्। संदीपाभावेद्विषद्यो।
वेदयाद्ययास्तुवानेवप्रास्तस्यलोपोत्तिपेत्। कस्मादिशेषतइतिदेवलोक्तेः। प्रैषानुप्रैषसंयुक्तमितिश्राद्धंसंपन्नंसुसंपन्नमि
त्यादिप्रश्नप्रतिवचनेतत्पमेववदेदित्यर्थः। इदंचामश्राद्धपक्षे। आमहेमपक्षयोस्तुसर्वश्राद्धेनिर्दृश्रीतद्यंकालांतरेश्रा
द्धणापद्यात्। इदंचामेश्राद्धेसतिसंभवेस्तुवर्षीहेतौतीर्थप्राप्तिसंपाद्यतदैवकार्यं आमश्राद्धंतुपूर्वाह्ने। एकोदिष्टंतुमध्याह्नः
पार्वणंचापराह्ने। तथातद्वृद्धिनिमित्तकंप्रातिहारीतोक्तेः। आकस्मिकवाप्तौतुप्राप्तिलक्षणनिमित्तानुरोधेनकालांतरेपीत्युक्तम्
क्रापदितुतीर्थकेनापिप्रकारेणश्राद्धंशक्तिस्तदासक्तादिनापिंडदानमप्यवश्यंकार्यं। अतएवदेवीपुराणेश्राद्धेनेवपिंडदा
नप्रकोपिपिंडदानंतुतद्धस्तेपितृणांचैवदुर्लभमितितुनःपिंडमात्रेष्टमुक्तं। अत्यपांगोतरपरिसंख्यपादोषश्रमेस्यात्तादेव
लः। पिंडमात्रंप्रदातव्यमभावेद्रव्यविप्रयोः। श्राद्धाहनिनुसंप्राप्तेभवेन्निरशनोपिवेति। विष्णुपुराणेपि। अकुर्वन्नित्ततशाम्यंपः
पिंडानिनिर्वपिष्यतीतिपितृणांवाक्येपिंडमात्रमुक्तं। अतएवंज्ञापकातीर्थपिंडदानेनमपिप्रधानंएकोदिष्टवत्। पिंडेव
द्रव्याणिदेवीपुराणे। सक्तुभिःपिंडदानंचसंयावैःपायसेनवा। कर्तव्यमृषिभिःप्रोक्तंपिण्याकेनैंगुदेनवा। गुडेनवेतिलवा
पाटः। संयावोगोधूमविकारः। पिण्याकस्तिलकल्कः। इंगुदंतापसतरुफलं। अत्रत्तर्वपूर्वासंभवेउत्तरोत्तरंज्ञेयं। सक्तुप्रतः।

त्रि·स्था· ५१ शाकमूलफलाद्यैस्तु वा सो गोभूमिकांचनैः। अद्भिर्वा विप्रसंवादात्पितृणां प्रीतिमावहेत्। विप्रसंवादः सर्वाभावे दिग्भ्रं
ब्रूयान्न याचमानाद्यं हृतमन्नं तत्स्त्वित्येवं विप्रो ब्रूयादित्येवं तत्पः। पिंडप्रमाणं चाङ्गिराः कपित्थबिल्वमात्रान्वापि
डान्दद्याद्विधानतः। कुक्कुटांडप्रमाणान्वा केचिदामलकैः समान्। बदरेण समान्वापि दद्याच्छ्राद्धे समन्वित इति।
त्र आप्य शाकोऽस्तु हस्तप्रमाणमपि देयं। शमीपत्रप्रमाणेन पिंडं दद्याद्गयाशिर इति लिंगात्। अ[illegible]स्थाति ल
मं त्रं च पानीयं धूपं दीपं च वस्त्रथा। मधुसर्पिःखंडयुक्तं पिंडं मद्दं दुत्त उच्यते। तथा। अवनेजनं पिंडदानं पुनः स्तु अवने
जनं। दक्षिणा चान्नसंकल्पस्तीर्थश्राद्धे त्वयं क्रम इति त्वश्लोकः। तीर्थश्राद्धे पिंडदानं पिंडं शक्नो गोजविप्रेभ्यो दद्यात्। देया
जले पिक्षेदिति याज्ञवल्क्योक्ता प्रतिपत्तिर्न कार्या किं तु जल एव देहः। तीर्थश्राद्धे सदा पिंडान्क्षिपेत्तीर्थे समाहितः। दक्षि
णाभिमुखो भूत्वा पित्रादिकप्रकीर्तितैरिति वचनात्। तीर्थपिंडदाने नंदादिप्रयुक्तो निषेधो न प्रवर्तत इति श्राद्धप्रसं
गे वाम्यधापि। परातु पिंडदानेऽप्यशक्तिस्तदा तर्पणमवश्यं कर्तव्यं। तिलैः सप्तभिर्वापि समवेतं जलांजलिं। भक्ति
नम्रः समुद्दिश्य मुखं तस्माकं प्रदास्यति। यतः कृतं वस्ते प्राप्य गोभ्यो वापि ग्रासं भक्तिकस्मित् अपि शब्द उक्तः पितृवचनात्। तः
रवं च स तेष्वसंकृत् पाशक्तेन तर्पणं श्राद्धपिंडदानानि त्रीण्यपि कार्याणि। अशक्तेन तर्पणपिंडौ। अशक्ततरेण तर्पणमा राम· ५१

त्रमपीति॥ ॥ यत्र तु कारस्यापदेवकस्यचित्तीर्थे अन्नेन कांम्यवांतरतीर्थानि एकदिने गम्यंते तदैकस्मिन्नपि दिने तत्तत्तीर्थप्राप्ति
निमित्तकानि बहूनि श्राद्धानि निमित्तक्रमेण कार्याणि निमित्तभेदात्। दर्शे तु परगश्राद्धवत्। पतुप्रवेशसोऽवचनं नैकं श्रा
द्धद्वयं कुर्यात्समाने ऽहनि कुत्रचित्। न द्वे तत्र त्रिते होमं च न स्वाध्यायं व्रतपरायमिति तत्समाननिमित्तकश्राद्धविषयं। तत्रा
ह जाबालिः श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न तद्दिने। नैमित्तिकं तु कर्तव्यं निमित्तानुक्रमोदये। काश्यपोऽपि द्वे श्रा
नि निमित्ताः निजापरत्वेक वा सर्वं नैमित्तिकान्निकार्याणि निमित्तोत्पत्तुक्रमात्। अन्यत्रापि एकस्मिन्नेक निमित्तमेकदिवसे
श्राद्धं त्रवारं वर्तयेदिति। उपवासमुंडने तु सकृदेव। प्रयागकाश्यादिव्यापकतीर्थोपाध्यवच्छेदेन विधानात्। पञ्चतुव्याप्य
त्तीर्थावच्छेदेन श्राद्धवरणा ह्यापकतीर्थश्राद्धमपि सिध्यतिन्न तत्र प्रतिनिमित्तमावृत्तिर्न भवति किंतु इदं कृतमिदं नेत्यनु
त्वमाणाविशेषत्वात्। तं त्रैण वश्राद्धानां सिद्धिर्देशकालकर्तृकत्वात्। द्रव्यदेवतयोरभेदाच्च। यथा गंगाप्रयागनिमित्तको
गो। गंगाकाशीमणिकर्णिकानिमित्तकानंतवेश्यादि। न तु प्राप्नोति। व्याप्यतीर्थदेशश्राद्धे तु निमित्तकं पश्चादिति देशका
लयोर्भेदात्क्रयं तंत्रतामेवं। सापंप्रातः पौर्णिमा स्नमावास्याकावशाद्यावज्जीववचनोक्तजीवनार्थ्य निमित्तसंकोचव
न्मणिकर्ण्यादितत्तत्प्रधानतीर्थावच्छेदेन प्राप्यमिकत्तानश्राद्धादिबोधकवाक्यवशात्तोत्तरेवेति वचनोक्तप्राप्यारभ्या मि

त्रि॰से॰ ५२ मित्तसंकोचात्। तथा हि। काशीखंडे व्यासवचः। निशामय महाप्राज्ञ लोमहर्षण वच्मि ते। यथा प्रथमतो यात्रा कर्तव्या या वि
के मुंडनं। सचैलमादौ स्नानं तु चक्रपुष्करिणीजले। संतर्प्य पितृदेवांश्च ब्राह्मणांश्च पयादिभिः। इत्यादि। तथा च मणिक
र्ण्याख्यप्रधानतीर्थावधिकं तु काशीप्राप्तेर्निमित्तत्वाद्देशकालभेदो नास्तीति मुक्तानंतरं। एवं प्रयागगयादावपि तन्ने
विशिष्टस्य निमित्तत्वे निमित्तभेदाभावाद्द्विस्नानाद्यप्रसक्तिरेवात्रास्तीति केचनांतं वक्ता। सत्यं। किंतु मणिकर्ण्यादिस्नाने
पि दृष्टफलनाशस्य बोधकवाक्येन स्नानेऽदृष्टफलकस्याद्यनिमित्तत्वं। तथा यो वेणीमासमाघस्य पोरस्ति च तीव्रनारव
निमित्तावच्छेदकत्वात्तिथ्यादिवन्नाप्युक्तं तेदृष्टिकालता। नइदं चापि द्विविधवचनेन मणिकर्ण्यादेर्निमित्तावच्छेदक
तास्वतंत्र्याद्वनिमित्ततावच्छेदकं भविष्यति। संयोगपृथक्त्वेनन्यायात्। उक्तं तत्र निमित्तसंकोचे सति प्रतिबंधकवशान्मणिक
र्णिकाद्यप्राप्तौ निमित्तानिष्पत्तेर्नैमित्तिकस्याप्यननुष्ठानमेव स्यात्। अतः काश्यादिप्राप्तिनिमित्तकस्यैव स्यान्मणिकर्णिका
दिदेशांगत्वेन विधीयते। तथा चैन निमित्तकत्वावच्छेदकं त्वात्तदभावेऽपि देशांगविकलमपि स्याद्देकांयनिमित्तस्य दत्तता
दितिदिक्। तस्माद्दर्शने कप्राप्तिः। नन्वेकप्रयोगविधिपतितदृष्टी ते तु प्रधानांगयोगे पृथग्वत्तेर्नेदृष्टं। नस्तंते प्रधाने स्यापीति राम॰ ५२
त। अत्र यावद्दृष्टनाहीमूढः। यो यं दर्शपूर्णमासरागस्यादोषफलतंत्रत्वां सांनाय्य च संप्रति [illegible] पत्र देवताकत्वेन प्रधानत्वे

रपि देवतोद्देशस्यागात्मयागयोः। पमलगुवजन्मनि जाते श्योः पवरोहोमेष्वनेकहोमानां युगपदनेकग्रहदाहादिनिमित्ते पु
नामवत्सादीनां। स्मार्ते च संकोचममावास्यादिनिमित्तकस्याप्याग्रयणं च प्रधानानामपि देशांगेकेनाग्रयणमाराविशेषत्यपास
कृदनुष्ठानादेव सर्वार्थेदनिष्पत्तेर्गुणपन्यायमानत्वात्तंत्रभावेनालोचपतोपेनेतिकर्तव्यतामात्रविषयत्वात्तंत्रस्यास्तस्मा
त्काशीनिमित्तकं मणिकर्णिकानिमित्तकं च स्यादित्यनेनेराग हं करिष्य इति संकल्पे एकमेव स्यादनुमीत। तदाह श्रेस्ता संत्रप्राका
लिंगंगायामकृतेप्सा इत्युदाहणास्याद्वे चेत्रयिवे देता। एवं प्रयागगयादावपीति। केचित्तु काश्यादिप्राप्त कालीर्थसेवादेश्यता
तत्रकं करोमि च मणिकर्ण्यादिव्याप्यतीर्थयात्रावन्यथया ता स्वं विशेषयं दृष्टा स्तीतिपन्य यानुष्ठितप्रपाजेः पशुपुरोडाश प्रयाजा
नां। कामान्यायित्वेत्रेणाग्निप्रस्था परपक्षे केराम्यतिस्मात् दुरप्रसंगासिद्धि वद्यापककाश्यादिस्नाने दन्यात्प्रस्या दुस्यापि प्रसंग
त एवसिद्धिमनुपेत्स काशीप्राप्तिनिमित्तकस्नानं करिष्यइत्येव संकल्पइत्याद्युः। पन्नु नतंत्र। तथा प्रसंगः। किं तु काश्यां प्राप्तिनि
मित्तकमेकमेव स्नानं निमित्तसंकोचात्। दृष्टफलबोधनं तु पंचतीर्थादिगतमणिकर्ण्यादिस्नानविषयं। स्वतंत्र तत्प्रापि
षये वा भविष्यतीति। तत्र न्यायतीर्थप्राप्तिनिमित्तेऽस्नापि तेद्विनिमित्तकस्याद्वाचे हेतुमाभावात्। विपर्ययेऽप्रमासत्वाच्चानेक
चतीर्थावगतंतमणिकर्ण्यादिस्नानविषयं दृष्टफलस्य दशनां। तदंतर्गतस्नानस्योक्तादेरितरस्य हितस्येव समुदायोपाधिनार

त्रि. से. रूपमप्यपतितावेष्ट्यादिवत्तत्सुदायप्रयोगवाक्यागतफलेननिराकांक्षत्वात्पृथक्फलाकांक्षाया अभावात्। नापि स्वतंत्रमश्राद्ध
५३ विषयं पृथक्फलमप्यवगतं। फलांतरार्थश्राद्धांतरविधौ गौरवात्। अस्मत्पक्षे तु प्रागेव प्राप्तिनिमित्तकश्राद्धे संविधौ त्वदि
आगादितिन्यायेनावेष्टौ तथा त्राधकामं याजयेदिति वत्फलसंबंधमात्रं क्रियत इति लाघवं। तस्मान्नैमित्तिकएवादिश्राद्धमवे
ष्टिवद्विधेयं। इतरैः सहसमप्रधानं स्वतंत्रं क्रियत इति लाघवं। तस्मान्नैमित्तिकरूपादिश्राद्धमवेत्याद्याधकामं याजयेदिति व
त्फलसंबंधमात्रं क्रियत इति लाघवं। तस्मान्नैमित्तिकरूपादिश्राद्धमवेष्टिवद्विधेयं। इतरैः सहसमप्रधानं स्वतंत्रं चेति। तथा
यं वंचतीर्थ्याधंतर्गते। द्वितीयं तु प्राप्तिनिमित्तकं। न चैवं तल्लोपे हेत्वभावाद्दुत्तरीत्यातंत्रेण प्रसंगेन वा सिद्धिरिति वत्तुयुक्तं। एकस्या
पि चानेकफलसाधनत्वात्प्रयोगभेदाद्दवहेदकभेदाच्चावेष्टिवद्दोषपादनीया। एवं च सर्वेषत्फलं च क्रम॥ ॥ अथ श्राद्धांत
रसमवायो निर्णयः॥ ॥ तत्र यदि तीर्थप्राप्तिदिने वार्षिकं स्यात्तदा पृथगेव कार्यं। तदुक्तं कालादर्शे। प्रत्याब्दिके युगालंभ
योगे पुनिहितस्य तु। संपातेऽदेवताभेदाच्छ्राद्धयुग्मं समाचरेदिति। तत्राप्याद्यो तीर्थनिमित्तकं। प्राप्त्यनंतरमेव कार्यत्वादिति। वा
योगात्। यद्वा वार्षिकं दार्शिकव्यतीपातयुगादिमन्वादिसंक्रांत्यादिनिमित्तकानि तु प्रयोगभेदेन हेत्वापाततीर्थश्राद्धं कि यो
तदाह पृथगेव कार्यमिति तेषां पकसाध्यत्वेन द्रव्यभेदात्प्रसंगायोगात्। तदा तु तीर्थश्राद्धेनैव सिद्धिः। दार्शिकस्य तु गौरेश्र राम. ५३

दार्शिकालभ्ययोगयोः प्रसंगादितरस्यापि सिद्धेरुत्तरमाचरेदिति कालादर्शोक्तेः। अत्र दार्शिकशब्दः सत्समानन्यायानां सर्वे
षामुपलक्षकः। मित्रश्राद्धमपि यथामेन हेत्वाभावात् वार्षिकं तदा पृथक्। तस्य एकोद्दिष्टकत्वात्। यत्तु नांदीमुखतीर्थश्राद्धेषु
नित्यश्राद्धदेवतानां मिष्टत्वात्प्रसंगसिद्धत्वात्पार्वणपक्षे नित्यश्राद्धं च कर्तव्यमिति हेमाद्रिणोक्तं तत्तीर्थश्राद्धस्याद्येनकरणे
दृष्टव्यं। तदुक्तं नागरखंडे। नित्यश्राद्धं न कुर्वीत प्रसंगाच्च प्रसिद्ध्यति। श्राद्धांतरे कृते न्यत्र नित्यत्वात्तत्र हापयेदिति। परस्तु
केनचिन्निमित्तेनाशक्यावा सर्वेषां दार्शिकादीनि श्राद्धाभेन हेत्वावार्षिकी चैतत्तरामि केनहेमेन वा तीर्थश्राद्धेनैव सिद्धिरिवा
द्पोनिर्णयाः सुबुध्या कार्याः। इदं तीर्थनिमित्तकश्राद्धं द्वादशमासानंतरं तीर्थप्राप्त्यभावावश्यकं। अन्यतरत्तु फले क्षयात्कृताकृतं।
सवत्सरं हि मासानं पुनस्तीर्थं व्रजेद्यदि। मुंडनं चोपवासं च ततो यत्नेन कारयेदिति। यत्तु पद्मपुराणवचनेनोक्तं मुंडनादि समानका
यत्वात्। चकारेणोपसंग्रहात्। तत्रोच्यते राजादिति सर्वं दर्भवर्तीनि वहूनः॥ ॥ इति श्रीभट्टरामेश्वरसूरिसूनुनारायणभट्टसूरि
विरचिते त्रिस्थलीसेतौ सामान्यप्रघट्टके सपरिकरतीर्थश्राद्धविचारः॥ ॥ अथ तीर्थश्राद्धाधिकारिणः॥ ॥ तत्रापि तुः पुत्रेणाक
र्तव्या पिंडदानोदकक्रिया। पुत्राभावे तु पत्नी स्यात्पत्न्यभावे तु सोदर इति कात्यायनवचनात्। पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रा
तृसंततिः। सपिंडसंततिर्वापि श्राद्धादिनृप जायत इति विष्णुपुराणवचनाच्च पुत्रादीनामधिकारः। एवमन्येपि सामान्यावि

त्रि·स्था· ५४

कारिणो ग्रंथांतराद्द्रष्टव्याः। विशेषस्तु जीवत्पितृकोपि तीर्थश्राद्धं कुर्यात्। तदुक्तं मैत्रावरुणीयपरिशिष्टे। उद्वाहे पुत्रजनने पित्र्येष्ट्यां जी
वत्पितृकोपि तीर्थश्राद्धं कुर्यात्। तदुक्तं मैत्रावरुणीयपरिशिष्टे। उद्वाहे पुत्रजनने पित्र्येष्ट्यां सौमिके मखे। तीर्थे ब्राह्मण आप
न्ने षडेते जीवतः पितुः। उद्वाहो वृद्धिरित्यादिः। प्रथमे पितुरेवाधिकारात्। पुत्रजनने जातकर्मणि। इदमपत्यसंस्कारमात्रोप
लक्षणं। पित्र्येष्ट्या चातुर्मास्यांतर्गतायां। सौमिके मखे तृतीयसवनिकैः पुरोडाशखंडैः स्वचमसाध्ये पिंडदाने। ब्राह्मणआ
याते। त्रिमधुत्रिसुपर्णीक इत्यादिगुणयुक्तविप्रसंपदि। जीवतः पितुः पुत्रस्यैते श्राद्धकालाः षडित्यर्थः। एवं तीर्थमात्रे श्राद्धप्रस
क्ते गयायामपवादमाह लौगाक्षिः। दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकं। न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणं। मैत्रावरु
णीयपरिशिष्टेपि। महानदीषु सर्वासु तीर्थेषु च गयामृते। जीवत्पितापि कुर्वीत श्राद्धं पार्वणधर्मवत्। मृतमातृकस्य तु प्रासं
गिकगयाप्राप्तौ मातृश्राद्धे परिशिष्टस्य प्रतिप्रसवः स्मर्यते। अन्वष्टक्ये गयाप्राप्तौ सत्यां च मृतेऽहनि। मातुः श्राद्धं सुतः कु
र्यात्पितर्यपि च जीवति। अत्रापि गयाप्राप्तौ सत्यामित्यनेन प्रासंगिकप्राप्तिरुक्ता। तस्यां सत्यां मातृश्राद्धं कार्यं न तूद्दिश्य गत्वा।
अत्रापि गयाप्राप्तौ सत्यामित्यनेन प्रासंगिकप्राप्तिरुक्ता। तस्यां सत्यां मातृश्राद्धं कार्यं न तूद्दिश्य गत्वा। अत एव स्मृत्यंतरे ग राम· ५४
यां प्रसंगतो गतानां मातुः श्राद्धं समाचरेदिति। तत्र गयातिरिक्ततीर्थे जीवत्पितृकेण वसुमारोणोद्देशेन श्राद्धं कार्यं। गयायां तु

पदि प्रसंगाद्याति मृतमातृकस्तत्र मातृपार्वणमात्रं कुर्यात्। अमृतमातृकस्तु नैवं कालादर्शस्मृतिदर्पणकारस्योव
हृवो मेनिरे। अपरे तु जीवत्पितृकश्राद्धविधायकवाक्यानां साधारण्याद्गयायामपि जीवत्पितृकेण पितृपित्रादिभ्य एव समारोप्यः
श्राद्धं कार्यं। एतस्मिंश्च पक्षे मृतमातृकस्यापि पितृपत्नीत्वेन मातृश्राद्धसिद्धावपि अन्यस्त्रीकामित्यादिवचनेन मातृत्वादिरूपेण
एव वक्ष्यमाणप्राप्तस्यैवानि तु गयाश्राद्धनिषेधवचनानि तानि मृतमातृकेण पितृश्राद्धोद्देशेन गत्वा श्राद्धं न कार्यं किंतु प्रासंगि
कगमन एवेत्येवं पराणीत्येवं वचनानां व्यवस्थामाहुः। एवमुभयथा वचनव्यवस्थायां संदेशाचाराद्व्यवस्था। उभयथापि
तीर्थश्राद्धे जीवत्पितृकस्याधिकारः सिद्धः। एवं च तत्स पितुः पितृकृत्ये पुत्रस्याधिकारो न विघ्यते। न जीवंतमतिक्रम्य किंचिद्दद्यादिति श्रु
तेरिति। ताश्चापवचः यद्यपि जीवत्पितुर्नोक्तमिति निगमवचः। तद्धि हि कालषट्कातिरिक्तपरं भवति। ननु यदि जीवत्पितृकस्या
पि तीर्थश्राद्धाधिकारस्तदा पितरि तीर्थयात्रासि निदेशांतरं गते नपुंसके न राज्ञा श्राद्धं कर्तव्यं स्यात्तन्निमित्तस्याद्वैतत्वात्। कर्तव्यमेवेति च
दानोबाधकाभावात्। नहि पित्रा सह गमनेनापि कृतो न क्रियते। उच्यते। वचनात्प्राप्तौ पित्र्येवालोकविद्विष्टत्वान्न तु अनं। तदुक्तं
अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न [illegible]विति। पितृकृते न प्रसंगसिद्धेरनुष्ठानं कुतो नेति चेन्न। भिन्नकर्तृके प्रसंगाभा
वात्। तस्मिन् इदं जीवत्पितृकस्यापि तीर्थश्राद्धे धिकारित्वेऽन्यतरस्य यदि विभक्ताः पृथक् पदयुगपद्वा तीर्थगतास्तदा प्रत्येकं दर्शपक्ष

त्रि॰ सा॰ श्राद्धं कुर्युः। अविभक्तेषु तु परस्परं गमने तेन कार्यं। सहगमने तु यहणादिवत् ज्येष्ठेनैव न तु सर्वैः। तदाह मनुः। भ्रातराम विभक्ता
५५ नामेको धर्मः प्रवर्तते। विभागे सति धर्मो विभवेत्तेषां पृथक्पृथक्। प्रदीयते। विभक्तास्तु पृथक्कुर्युः प्रतिसंवत्सरादिकं।
एकेनैवाविभक्ते पुत्रकृते सर्वैः कृतं भवतीति॥ ॥विधवा तु यदि पुत्रवती तीर्थं गता तदा तेनैव कुर्यात्। सपुत्रया न कर्त
व्यं भर्तुः श्राद्धं कदाचनेति वचनात्। अपुत्रया तु कार्यमेव। अपुत्रा त्वेव पत्नीति च वचनात्। केचित्तु पुत्रवत्या अपि पुत्रासंनिधौ
ने ब्राह्मणादिद्वारा संकल्पश्राद्धं कारणीयं संकल्पे च वर्जनीयानि वसिष्ठः। आवाहने स्वधाशब्दं पिंडाग्नौकरणं तथा। विकिरं
पिंडदानं च संकल्पे षड्विवर्जयेत्। पिंडश्चाद्दिष्टपिंडः। इत्याकृतत्र मूले मृग्यं। अनुपनीतोऽपि तीर्थे श्राद्धं कुर्यात्। एतच्चानुपनी
तोऽपि कुर्यात् सर्वेषु पर्वसु श्राद्धं साधारणं नाम सर्वकामफलप्रदं। भार्याविरहितो वापि प्रवासस्थोऽपि भक्तिमान्। शूद्रोऽप्यमं
त्रकं कुर्यादनेन विधिना द्विजः इति पाद्मे सृष्टिखंडे तीर्थश्राद्धादिकमुक्तम्। तत्र स्त्रिया अनुपनीतेन च यथादेशाचारं ब्राह्मणद्वा
राकारणीयं स्वयं वाऽमंत्रकं कार्यं। तदुक्तं स्मृत्यर्थसारे। अनुपनीतः स्त्रीशूद्राश्च श्राद्धमृत्विजा कारयेयुः स्वयं वाऽमंत्रकं ना
मगोत्राभ्यां कुर्युः। देवेभ्यो नमः पितृभ्यः स्वधा नम इति मंत्राभ्यां वेति कार्ष्णाजिनिवचनात्। एवमन्येऽपि ग्रंथांतरतोऽधिका
हूतेजादीनां तु यो विशेषः स नोच्यते औरसेतरेषां तु पुत्रत्वेन परिग्रह इति पुत्रांतरनिषेधेन कलावनुपयोगात्। तथा यो राम॰ ५५

यस्य स्त्रियं धनं वा हरति स तस्य कुर्यात्। स्त्रीहारी धनहारी च कुर्यात् पिंडोदकक्रियामिति कार्ष्णाजिनिवचनात्। एवमन्येऽपि ग्रंथांतर
तोऽधिकारिणो ज्ञेयाः। केचित्तु संप्रदायनिर्णये चास्य विस्तरो भविष्यतीति॥ ॥अथाधिकारापवादः॥ ॥तत्र पतितेनाकार्यं। न कुर्यात्पतित
कं भिन्नः श्राद्धपिंडोदकक्रियां। स्वर्के संन्यासयोगे नग्नहृद्धर्मादिकं व्रतं। गोत्रादिचरणं सर्वं पितृमातृकुलं धनमिति स्मरणात्। पति
तोऽपि न कुर्यात्। द्विजातिकर्मभ्यो हानिः पा॥ तत्रापि तद्वचनेन निषेधात्। उपपातकादिना तु कार्यमेव। तस्य नित्यनैमित्तिकयोर्निषे
धाभावात्॥ ॥इति श्रीमद्रामेश्वरसूरिसूनुनारायणभट्टविरचिते त्रिस्थलीसेतौ सामान्यप्रघट्टके तीर्थश्राद्धाधिकारिणः॥
॥ ॥अथ तीर्थश्राद्धे संप्रदाननिर्णयः॥ ॥तत्र नदीतीरे पुण्यतीर्थेषु सत्सु मध्ये चैव सानुषु। विविक्तेषु च तुष्यंति दत्तेन पितरः सदेति स्मृते
रात्तु पिंडीकरणं हृद्येऽपत्यप्रदीपते। पार्वणेन तु कर्तव्यमेकोद्दिष्टेन कर्हिचिदिति वचनात् पित्रादिपार्वणानां तावत्कार्यं
तो मातामहादिपार्वणानि। पितरो यत्र पूज्यंते तत्र मातामहा अपि। अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेदिति गौतमोक्तेः। के
र्तृसमन्वितं मुक्त्वा तथान्यच्छ्राद्धषोडशं। प्रत्याब्दिकं च शेषेषु पिंडाः स्युः षडिति स्थितिरिति कात्यायनोक्तेश्च। एवं गयातिरिक्ततीर्थे
षु षड्दैवत्यमेव। त्रिस्थलीरत्नावलीकारास्त्वाममेनिरे। अन्ये तु तीर्थादिश्राद्धमनुपक्रम्य हविःशेषमात्रे तो मुष्टिमात्रे दोषैकै
कमादृतः क्रमशः पितृपत्नीनां पिंडनिर्वपणं चरेदिति वृद्धवचनान्मातृपार्वणमपीच्छंति। स्मृत्यर्थसारे तु तत्र मातृश्रा

त्रि॰ सा॰ द्दृष्यकुर्या शास्त्रमिति वदन्ति कृताकृतं तत्त्वमुक्तं। गयायां तु मातामहादिपार्वणमावश्यकमिति निर्णैवदु स्याम्नः एतद्धि पित्रादिपिंडानंप
५६ श्चिमभागे देयमिति शांखायनः। एवं नवदैव संभवति। अन्ये तु मातामह्यादिपार्वणमपि पृथगा कुः केचित्तु द्वितनारी राणां ए
यकुर्याद् महर्षय इति चतुर्विंशतिमते नारीणामिति सामान्योक्तेः पित्रादिवदेव तंत्र पाद्वादशदैवतमिति। अपि तु पुराणोक्ते
ष्वा।। विकल्पार्थस्तथा शब्दः। तथा च द्वादशदैव संभवति। अत्र देशशिष्टसमाचाराद्व्यवस्था। तत्र पत्नी मातामहा मातामही पार्वणोद्दय
क्रनस्तत्रापि त्रादीनां मातामहादीनां च सपत्नीकत्वेन निगमे श्रुतिर्दृशः कार्यः। स्वेन भर्त्रा समं श्राद्धं माता भुंक्ते सुधासमं। पिता
मही वत्नेनैव प्रपितामहीति बृहस्पतिना मात्रादीनां पित्रादिसहभावेन देवतात्वोक्तेः। अन्वष्टकायां मातृश्राद्धं चैवमन्ते दनि।
रकोद्दिष्टं तथा तु स्याद्वीतु तान्वष्टक्यं भवेदिति शंखेन एकोद्दिष्टनिषेधात्। अप्य एकाग्भवेदित्यनुज्ञानाच्च। मात्रादीनां
एकश्राद्धपेह्यपि यदि ताः कृतसहगमनास्तदा भर्त्रैकांवोद्दिश्य सहैव पुगन्श्राद्धं राभोजने। पिंडोपि चोभयोर्द्दशैनैकएव
देयः। इत्येवंसमासेन तु वाक्यं। मृताहनि समासे तु पिंडनिर्वपणं पृथक्। नवश्राद्धं तु दंपत्योरन्वारोहणएव तितिलो गाद्दिवच राम॰
मात। अत्र यम्यः। दंपत्योरन्वारोहणे तु निमित्तेन सहेति व्येकतेपिंडनिर्वपणं पिंडोनिर्वपणं श्राद्धे पोकश्चोक्तप्रकारेण द्विपि ५६
त्तकश्राद्धवत्तोमासेन नवश्राद्धं तु प्राक्तपिंडीकरणात्पत्तनतष्टपकुं न तु समासेन। अत्र मृताहनीति विशेषो पादानाम्

तिथेर्भेदे तु न समासः किंतु पृथगेवा। अत्र नवश्राद्धेऽप्येवं पृथक्त्वविधानाद्दर्शसांवत्सरिकतीर्थश्राद्धादिषु परिसंख्यया समा
स एवावगम्यते। एवमनेकासामप्यन्वारोहणे ज्ञेयं। यच्छ्रुस्मृत्यंतरे। एकचित्यां समारूढौ दंपती निधनं गतौ। पृथक् श्राद्धं तयोः
कुर्यादोदनं च पृथक् पृथगिति तन्नवश्राद्धविषयमित्येवं मदनपारिजातकारादयः। हेमाद्रिस्तु नवपक्षपरिसंख्यापरिहारा एयम
त्वाद्वीति पश्चात्ता तु शेषाद्य सांवत्सरिकमात्रविषयमितत्तरा गेनतीर्थादौ पृथगेव देयमिति। तथा। सपत्नमातुस्सपत्नपि
तामहीसपत्नप्रपितामहीभ्यो पितीर्थे दद्यात्। पितृपत्न्यः सर्वा मातर इति सुमंतुना तासु पि मातृत्वातिदेशात्। तत्रापि जननी
द्विस्थानीयत्वाद्धारीतस्थिं डेचतासामप्युद्देशो न तु पृथक्। अनेकामातरेयस्य तीर्थे वापरपक्षिके। अर्घदाने पृथक्कुर्यात् पिंडमे
कं तु निर्वपेदिति गालवोक्तेः। मिताक्षराकृतस्तु शाकविषयत्वेनोक्त्वा पृथगेव श्राद्धं पिंडं च कुर्वंति। तथा। सपत्नमातामहेभ्योपि
श्राद्धं कार्यं। मातृसपत्नीनां तु मेतु नामान्वेतेतिदिष्टे तत्र स्पष्टगामप्याधिक्ये गौणमातामहत्वासिद्धेः। तदेतत्सर्वमुक्तं श्राद्ध
कल्पे हेमाद्रिणा। परान्तु नान्नपितृलिकामनयाविशिष्टे महालयादिकाले गयादितीर्थविशेषे वा श्राद्धं कुर्यात् तदापुत्रवती
नाम पुत्रा सांपा मातृसपत्ना केमपि श्राद्धं कुर्यात्। पुत्रवतीनामपि तासां सिद्धे पुत्रप्यास्वेहेन वा सपत्नीपुत्रस्य पार्विकाधिका
रवत्वात्। एतेनैव पितृजननीव्यतिरिक्ताः पितामहपत्न्यः पितामहजननीव्यतिरिक्ताः प्रपितामहपत्न्योपि व्याख्याताः। जननीत्व

पत्नीनां गौणमातृत्वनिरूपणेन तज्जनकानामपि गौणमेव मातामहत्वं श्राद्धे देवतात्वमिश्र पि निरूपितं भवति। यदा तु विधिपि दृष्टे
शकालादेनापि तृप्तिकामनया श्राद्धं कर्तुमिच्छेत्तदा पात्रत्वमिश्र पि निरूपितं भवति। यदा तु विधिदृष्टे दर्शकालादेनापि
तृप्तिकामनया श्राद्धं कर्तुमिच्छेत्तदा हि केवलाधिकारेणापि तेषां मातृपितृकुर्यादि विशिष्टमिति। पितृव्यस्तु तेषां रूपि कार्यं श्रा
कार्यादीनां चाश्माचार्यगुरुशिष्येभ्यः सखिज्ञातिभ्य एव च। ज्ञात्यंत्वीभ्यश्च सपीभ्यः ज्येष्ठे वच जलांजली च। पिंडांस्तेभ्यः सदद्यात्स्व
भ्रातृपदेन भ्रात्रीयौ वैधुचे वस्त्रे वैधुमाच मासिमपात्सुचेति चतुर्विंशतिमन्नान्नं ज्ञातपः पितृव्यस्तु तस्मात्तुल्यायाः मविष्ये
पि विशेषः दौहित्रश्वशुरदाराश्च येकेष्ठाः सहोदरमनिः सन्तानमन्नायेव तेभ्यो ध्यन्नप्रदीयते। वृद्धशातातपो पित्री मातामहं तु केवे
वंसर्वेषां वर्णिलिंगिनां। एवं कुर्वन्नरः सम्यक् महतीं श्रियमाप्नुयात्। वर्णिलिंगिनो ब्रह्मचारीरिपत्स्यादयः। अत्र सामान्यो ज्ञाव
पि ज्ञातिमन्तारवते श्राद्धाः। तत्पत्नीभ्यश्चेति चतुर्विंशतिमतवचनात् वपितृव्यादिपत्नीभ्योपि देयमेव। एते पंचसर्वेषामेके
द्दिष्टमेव। सपिंडीकरणात् ऊर्ध्वं पित्रोरेव हि पार्वणं। पितृव्यभ्रातृमातृणामेकोद्दिष्टं सदैव हीति जीवत्कर्मवचनात्। सपिंडी
करणादूर्ध्वं त्रयत्रयप्रदीयते। भ्रातृभगिनीपुत्राणामेव मातुलादयश्च। मित्राय गुरवे श्राद्धमेकोद्दिष्टं न पार्वणमिति सुमं
त्रोक्तेश्च। सर्वथा केमातृपत्न्याः सपत्नमातृविषयं सुखमातृपार्वणस्य सर्वमुक्तत्वापितृव्यादिसममभिव्याहारात् दैवतिरेपाणि

पत्नुवर्ततं। पितृव्यभ्रातृमातृणां वर्णस्य सर्वेषु रामपुत्राणां तेषेव चमातामहस्यापुत्रस्य श्राद्धे पितृत्वं ज्ञेवेदिति तदा
स्य कृतपातुल्यत्वार्थं वृतुपार्वणविधावेन तु लक्षार्थं न तु पार्वणविधाने न तु लक्षार्थं। न चापस्य योदृक्त्वे हस्तिनेनापि त
सिद्धं वामित्राधिकारि इकी। अत्र वपार्वणानां विशेषः कस्यमाहस्त्र व्रतः। पितृणां प्रथमं दानं मातृणां तदनंतरं। ततो माता
महानां च पितृव्यस्य तु तस्य चाद्यागतेयः। कन्याहे केवलाः कार्याः दूवावादेषु कीर्तिताः। सर्वत्रैवाहि मध्यस्थानेभ्यः कार्या
स्ता मातरः पत्नुवचने। पितृमातामहादावेरमातृतत्त्वदर्शेतर। तथ्यैरो वह काश्राद्धे तीर्थे वायं कमकः स्मरणं इति स्मृतिरत्नाव
लीकारोदाहृतं तत्रैवनिर्मूलतेति तामूपेकरणीयं। अत्र नरंपोतनिवेशानिषेधमोहराशवाः। श्रं तमीतामहास्त्वत्तामातृणां यः
प्रवक्ष्यति। समूढो नरकं याति यावदाभूतसंप्लवं। जाबालः। अंतमीतामहान्त्कत्वा मातृणां यः प्रयच्छति। समूढो नरकं यातिया व
दाभूतसंप्लवं। जाबालः। अंतेनेपि देशांय घस्तमातृः श्राद्धे पुमानवः। समूढो नरकं याति कालसूत्रमवाकिराः। तस्मान्मातृ
पार्वणं पितृपार्वणानेतरं मेव। अत्रैनेवे कन्यापेन मातामहत्यादि पार्वणामपि मातामहादिपार्वणानंतरं। पत्न्यादीनां तु कम
तपेणाक्र एव। अत्र च पितृमातामहपार्वणोनिरो। ताव के वपणास्तु थि संपतेः। अत्रमातिनु पार्वणे को हिष्टानि कान्यानी तिपाव
कृतिकार्यारि। तत्तु सर्वारापावश्यकानि। गयावीतु मातृपार्वणमप्पावश्यकमिति तत्रैव वचनाम्। एव पार्वणेकोद्दिष्टामा

त्रि॰से॰ ५८ नेकेषां तु गणपत्नीपातेनैवैकपाकः कार्यः। तथा च त्रिः वृद्धगार्ग्यमपत्नीत्वा भार्याश्राद्धे चेत्स्यात्स्ये मरविः। तत्रैवाम्नपलं कुर्तात्यपक्वश्च
कालिका स्पेनः। इत्यलं प्रसक्तेः। अशक्तौ तु पार्वणैकोद्दिष्टानां नैव। अन्नेनैकोद्दिष्टेषु शक्तौ प्रत्नेकं ब्राह्मणभोजनं। अशक्तौ त्रैक
पुलस्त्यः। महालये गयाश्राद्धे गजच्छायां तथैव च। अन्नेनैवामपरां कुर्यात् श्राद्धं कुर्यात्तत्र कृत्स्नकृतं। तत्रापि पार्वणैकोद्दि
ष्टोः क्रममाह मरीचिः। पंचके त्रयमेवातो मे कोद्दिष्टं च पार्वणं। पार्वणं तु पूर्वं सि एकोद्दिष्टं समापयेत्। एतत्तु शक्तौ। अश
क्तौ तु पार्वणैकोद्दिष्टानां नैव। अन्नेनैकोद्दिष्टेषु शक्तौ प्रत्येकं ब्राह्मणभोजनं। अशक्तौ तु एकस्मिन्नेव पित्रादिलक्षणस्य चातुर्थ एकोद्दिष्टा
नि। अत एव चतुर्विंशतिमते। अत्रापि गुरूणि षोडशसापिण्डकम्यतीर्थेषु चैवं सर्वेषु माघमासे मघासु मघासु च। एकस्मि
न्नासनेऽसुपर्वीनाचायाँ दीक्षप्रक्षेपणं। इत्युक्तं। पिंडदाने तु पृथगेव नीचैः श्राद्धेन सम्पादनात्। अत एव ब्राह्मसमात्रे कातुर्थे
वचने। पित्रादिपार्वणे च पितृदिशाक्तिस्तथा प्रयाति देवता मैकैकब्राह्मणभोजनं देवं तु सर्वपार्वणानां तन्त्रमेवाकालभेन तं
त्रेस्पो देवामे देवं चेदि। तस्मात्तं वै प्रधानं तु गोतु यो गयपंचदीपतनइति संग्रहकारेण देशकालैकोद्देशनं वाभिधानात्। पद
तु मातृकं तदा पित्रादिपार्वणेषु पित्रादित्रयपत्रयस्थाने एकैकं भोजयेद्दैवं चतं त्रेण केमेदतिनिर्णयः। पराति तेनसामदाता
दिना प्रेरितस्तीर्थयात्रिनदपयापि स्वस्य कर्तृत्वं यथाप्यधिका दिशः प्रतीतीर्थयात्राजनपतसि ध्वर्यं तत्त्वित्रादीनां चोद्दिश्यपश्च राम॰ ५८

मं श्राद्धं कुर्यात्। तथा च यजमानस्य पितृपितामहप्रपितामहानामिन्द्रादिसंकल्पः कार्यः। तदनन्तरं प्रासंगिकतीर्थप्राप्तेः स्व
पितृश्राद्धमिति भिन्नं न तत्र यावत्तत्र प्रत्यवायपरिहारार्थं षोडशांशं सलभन्ते यः परार्थे नग। इतीति वचनबोधित फलला भा
र्थं च स्वपित्रादिभ्यो पिश्राद्धं कुर्यात्। यद्यपि स्वाधिकारिकत्वात्स्वपितृश्राद्धमेनंतरं गतयादेशसज्यतेनतथापि उद्दश्यत्वाभावाद्या
त्रापाः परकीयत्वेन तदनन्तरमुपस्थित्यभावाच्च स्वपितृश्राद्धं मेनंतरं गतयादोषप्रसज्यते तथापि उद्दश्यत्वाभावाद्यात्रापाः परकी
यत्वेन तदनंतरमुपस्थित्यभावाच्च स्वपितृश्राद्धं पश्चादेव। उपवासादिनं चैतद्धेमाद्रिणा विस्तरेण श्राद्धकल्प इति नेह प्रपंच्यते।
अत एव वायुपुराणे। स्वधनदानेन प्रतेप्रविशंस्तस्य कस्यचिद्दशिम् गयां गतस्यादौ प्रतर्पिंडदानदनंतरं च स्वपितृभ्य इत्युक्तं श्रा
दि गत्वा गयाशीर्षे प्रेतराजस्य पिंडकं। समुद्धान्धुभिः सार्द्धं स्वपितृभ्यस्ततो ददौ इति। वामनपुराणे प्यतमेव प्रक्रान्त्या। पिंडनिर्वा
णं च प्रेतानामन्नं पूर्वं शः। चकार वस्तदा पाद्यानित्यं मेकेत्वनंतरमिति॥ ॥ विधवा तु भर्तृपार्वणं स्वपितृपार्वणं च कर्यात्स्वभ
र्तृप्रभृति त्रिभ्यः स्वपितृभ्यः तेभ्येव च। विधवा कारयेच्छ्राद्धं यथाकालमतंद्रिता इति स्मृतिदर्पणे। लिखितस्मृतेरत्नोक्त्वे निभ्य एव।
यथाकालं च यतीर्थमहालयादावनेकोद्दिष्टं विहितं तत्रैव अर्घ्यः। अत्र स्वपितुरपुत्रपौत्रत्वे तत्पार्वणमितिरिक्तस्सीपात्रे
अपुत्रा पुत्रवत्पत्नी इति वचनस्वातिनाश्वकर्णानुरोधाच्छ्राद्धक्रियात्तु सताभिधानात्तत्रस्य च स्वपिमातामह पार्वणापो भिका

रादपुत्रां प्रति च तत्रादीनां भर्त्रादिरूपत्वात् तन्मातामहादीनां च पित्रादिरूपत्वात् पुत्रवतामपुत्राणां वा स्वपित्रादीनां तीर्थश्राद्धे देशु
त्वदेव विधवाया अप्यधिकारावगमात् । अपुत्राणामेवेति विशेषवचनाभावाच्चानेनैव पुत्रस्य मातामहत्वादिरूपेण तच्छ्रा
द्धाधिकारे दत्तस्यापि तत्त्वेनैव स्याच्च तु पितृत्वादिनेति चेत् । न । एकस्यापि संबंधिकत्वसंबंधितावच्छेदकरूपभेदात् । यत्प्र
ति येन रूपेण संबंधिता तं प्रति तेनैवोद्देश्यत्वात् । तावतापि वस्तुक्रियातुल्यतानिर्वाहात् । तत्तच्च यथा पुत्रं प्रति पितृत्वा
दिनोद्देश्यानान्येनतो प्रति भर्तृत्वादिनोद्देश्यत्वं । तथा मातामहत्वादिनोद्देश्यतामपि पितृत्वादिना भविष्यति । एतद्रूपोद्दे
श्यतार्थमेव हि स्वभर्तृप्रमत्रीति वचनात् तस्माद्विधवाया भर्तृपार्वणं पितृपार्वणं चावश्यकं । आवश्यकत्वोपपादने द्विनेच्या
हापत्तु भर्तुः श्राद्धं तया नारी मोघा स्याद्दशामाचरेत् । मते न तत्प्यते भर्त्रीकृत्वा तु नरके ब्रजेदिति वचनं तु पाहेरकोद्दिष्ट
पन्हन्नशंसार्थं । न तु सर्वपार्वणप्रतिषेधार्थमिति । यस्यास्तु श्वशुरो जीवति सा भर्तृतत्पितामहप्रपितामहेभ्यः कुर्वीत ।
श्वशुरतत्पित्रोर्जीवतो भर्तृतत्प्रपितामहवृद्धप्रपितामहेभ्यः । एवं स्वपित्रादिजीवनेऽपीति केचित् । प्रामाणिकास्तु सपिंडि
जीवति द्वादशलोपात्तत्पार्वणलोप एवेत्याहुः । अत एव श्वश्र्वादिपार्वणमपि तिरुत्तानुकृतं । एवं न वृद्धे वसं केचिन्माता याः
स्वमात्रादिपार्वणमपीति द्वादशदैवत्यमाहुः । अपरे तु मातामहपार्वणेन पंचदशदैवत्यमन्ये स्वमातामह्यादिपार्वणेन

मह्याद्वादशदैवत्यं । एतच्चायमपुत्रविषयमिति पुत्रंमन्याति । तत्राप्याद्यपक्षे जीवनेद्वादशलोपात् लोपे भर्तृमातामहादीनां तन्मा
द्वप्रसंग एव नास्ति । श्वश्र्वादिमात्रादिपार्वणयोः करणे भर्तृपितृपार्वणयोरेव यथायोग्यं सपत्नीकानामिति वाच्यं । अन्येषां
तु यथासंभवमेकोद्दिष्टानीति । अत्र च तद्देशीयशिष्टाचार एव संदेहसरिदुत्तारणतरिरित्यलं ॥ ॥ जीवत्पितृके तु विशेषमाह
मनुः । ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेदिति । स्मृत्यन्तरे । दृष्टो तीर्थे च सन्न्यस्ते चा तेच पतिते सति । येभ्य एव पिता दद्यात्ते
भ्यो दद्यात्स्वयं सुतः । स्वयमिति स्वाधिकारिकत्वोक्तेः । भविष्यत्पुराणे तु जीवत्पितृकः पितामहप्रपितामहयोरेव दद्यादि
त्युक्तं । जीवमाने न देयं स्यात् यस्मात्तत्र सनातनः । तस्माज्जीवत्पिता कुर्याद्द्वाभ्यामेव न संशय इति । विष्णुस्तु नाविशेषमाह
पितरि जीवति यः श्राद्धं कुर्याद्येषां पिता कुर्यात्तेषां कुर्यात् पितरि पितामहे च जीवति येषां पितामहः । पितरि पितामहे प्रपितामहे
हे च जीवति नैव कुर्यात् । यस्य पिता प्रेतः स्यात् स पित्रे पिंडं निधाय प्रपितामहात्पराभ्यां द्वाभ्यां दद्यात् । यस्य पिता पितामहश्च प्रेतौ स्या
तां स ताभ्यां पिंडौ दत्वा पितामहप्रपितामहाय दद्यात् । यस्य पितामहः प्रेतः स्यात् स तस्मै पिंडं निधाय प्रपितामहात्पराभ्यां द्वाभ्यां द
द्यात् । यस्य पिता प्रपितामहश्च प्रेतौ स्यातां स पिंडं निधाय प्रपितामहात्परेभ्यो दद्यात् । मातामहानामप्येवं श्राद्धं कुर्याद्वि
चक्षणः । मंत्रोहेन यथान्यायं शेषाणां मंत्रवर्जितमिति । पितरि जीवति असाधारणनिर्देशः । पितर्येव जीवति सर्वथः । अन्ये त्वविशे

त्रि.सा. जीवत्स्तु नैव कुर्यादित्युक्तो एव मयेऽपि। मातामहानामप्येवमिति। अत्र यद्यपि पितरि जीवति येषां पिता कुर्यात्तेषां पुत्रः कुर्यात्तन्मा
६० महे जीवति येषां मातामहः पश्चात् पित्रादिषु त्रिषु जीवत्सु नैव कुर्यादित्यादि सर्वमतिदेश्यमिति व्याख्यानवान् शूलपाणिः। का
लादर्शकारोऽप्येवमेवाह। मातृजीवनेऽप्येवमेव न्यायसाम्यात्। तत्र मातृजीवति तत्कः पितृपित्रादिभ्यस्त्रिभ्यो दद्यात् तापदिमतत्का
लकर्त्तृदासमात्रादिभ्यो मातृसङ्घे पितामह्यादिभ्यस्तत्स्थः तत्समानामहादिभ्यो मातामहस्त्रयं मातृपितामहादि
भ्यस्त्रिभ्यो दद्यादिति फलितं। तत्रापि एवं त्यादिवचनविरोधः। मातृमातामहशब्दयोः संबंधिशब्दत्वात् पुत्रसंबद्धानामेव
मात्रादीनां मातामहादीनां च मातृमातामहादिशब्दव्याख्याने काधाः पितुर्देवता सा एव पुत्रस्येति व्याख्यानसंभवात्। तत्र
अजीवत्पितृकस्य स्वसंबंधिमातृमातामहादीनामेव स्यादिति। इदं त्वयुक्तं। पत्रवाच्येभ्यस्तत्र व्याचेम इति व्याख्याने पद
शब्दयोर्लक्षणाप्रसंगात्। पितृपित्रादिविषयेषु तात्पर्यसंभवेन युगपद्वृत्तिद्वयप्रसंगाच्च। अपि च। अत्र पतन्त्रशब्दाभ्यामेव मा
कोऽनिर्देशः। सोऽपि च येभ्यः पितेति प्रतियोगिकत्वेन तु स्वप्रतियोगिकत्वेन। यथा च कसंबंधिशब्दवलात्पुत्रसंबद्धमात्रादि प्रा
प्तिः। अविस्तुवद्वचनेन तु एवमित्यनेन मातामहस्याद्धे इति कथं तामात्रमतिदिश्यत इति। तस्मात् पितृसंबद्धा मात्रादयस्तत्तेव राम. ६०
द्वा एवं मातामहादयो जीवत्पितृकस्य तीर्थश्राद्धे देवताः न तु स्वसंबद्धाः। स्वमातुस्तु पितृपत्नीत्वेनैकोद्दिष्टं समानामहस्यापि

६१
पितृस्वसृत्वेन स्वपितुस्तीर्थे तदेकोद्दिष्ट एवाधिकारात्। येभ्य एव पिता दद्यादित्यस्याविशेषाच्चाग्र अजीवत्पितृकोऽपि साग्नि
रेव तीर्थे श्राद्धं कुर्यात्त्वानग्निकः। न जीवत्पितृकः कुर्याच्छ्राद्धमग्निमते द्विजः। येभ्य एव पिता दद्यात्तेभ्यः कुर्वीत साग्निक इति सु
मन्तुवचनात्। साग्निकः श्रौतेन स्मार्तेन वाग्निना। तेन साग्रेरेव जीवत्पितृकस्य तीर्थश्राद्धेऽधिकार इति मदनपारिजातकारादु
यः। साग्नी नाम पिमैत्रावरुणीयस्त्रेतोपजीविनां मे वचनं तु सर्वेषां। षडेते जीवतः पितुरिति उर्वीकवचस्य तत्परिशिष्ट एव
श्रवणादिति स्मृतिरत्नावलीकारदिवोदासादयः। इदं मतद्वयमप्ययुक्तं। कुर्यादहरहः श्राद्धं प्रमीतपितृको द्विजः। साग्निकोऽन
ग्निको वा पितृतीर्थेष्वपि विशेषणतदन्तुमानेनैव वचनाविरोधात्। सौमं तु अग्निरिह्लिनः पिण्डपितृयज्ञविधिना श्राद्धं न कुर्यात् सा
ग्निकस्तु तद्विधिना पितृपितामहादिभ्यो दद्यादित्येवंपरं। षडेते इति वचनं च यद्यपि मैत्रावरुणीपरिशिष्टवस्तुतस्तथापि उ
नोववस्य वृद्धो तीर्थे चेत्यादिप्रागुक्तगारुडवचसंवसाधारणत्वशात् साधारणतयैव व्याख्येयं। किं च मैत्रावरुणीय
वाक्यस्य साग्निकत्वपरिमात्रविषयत्वे तद्वाक्योपात्तवृद्धितीर्थोद्वाहादेरुपादानवैयर्थ्यं तेति। अधिकारविचारेऽप्येवं प्रसंगात्रव्हाः
॥१॥ एवं जीवत्पितृकस्याधिकारे सिद्धे स यदि द्रव्यादिदानेष्वैरिवद्युमंतरवत्पितृपितृत्ववाक्कस्तत्फलार्थमेव पातित्वदपि तु रे
वारिताघञमानस्य पितृपितामहप्रपितामहानामिन्तमेवं प्रकारवाक्यस्वयैकं श्राद्धं कृत्वा स्वस्यापि श्राद्धे हेतुप्रासंगिक

त्रि.से. तीर्थप्राप्तेहन्तत्वात्पितुःपितृपितामहप्रपितामहानामिस्रेवंविधेवोकारयेन्नयाश्राद्धान्तरमपिकार्यं।देवताभेदात्तथभ्यः
६१ पितादद्यात्तेभ्योऽद्यादित्यनेनपितृपितृत्वाद्युपाधिनैवदेवतात्वबोधनात्।सर्वस्माद्देवतउव्यतिरिक्तस्यैकान्तरकर्तृक
इवयजमानपितृत्वाद्युपाधिनैवतात्वात्।स्वयंशब्देनस्वाधिकारिकर्तृतास्वचनाद्वित्राधिरिकयोस्तवेगप्रसंगेनवाप्र
ग्निर्वाहाद्यमशक्तपित्रानुज्ञातोऽनुज्ञातोवास्वफलार्थमेवतीर्थयातितदास्वयंशब्दाद्विमस्वाधिकारिकतानिर्वाहार्थम
मपितुःपितृपितामहप्रपितामहानामित्येवंमादिवाकारयेन्नयाएकमेवश्राद्धंकार्यं॥ ॥अन्योऽपिविशेषः।पद्यस्तनमा
तकःपित्रर्थंगयांयातितदाप्रथमश्राद्धेयजमानपत्नीत्वेनसमात्रेएकोद्दिष्टंर्यं।स्वपितुःसत्स्याएकोद्दिष्टएवाधिकारा
त्।द्वितीयश्राद्धेतुपितृपत्नीत्वेनैकोद्दिष्टमेवमातुःकार्यंसर्वोक्तन्यायादेव।तदनंतरंगयाप्रसंगगमनेऽधिकारवत्करेरा
मातृश्राद्धस्यापिकर्तव्यत्वाभिधानान्मात्रादिपार्वणमपिकार्यंमात्रादीनुद्दिश्यकाम्यश्राद्धेगयायांवमनेदनिपितामह्यादिभिः
सार्धंमातुःश्राद्धंसमाचरेदितिशातातपवचनात्तस्यतत्पार्वणएवाधिकारात्।यदातुप्रसंगाद्गयांसतमातृकोयातित
दाप्रथमश्राद्धेपितृपत्नीत्वेनसमात्रेएकोद्दिष्टंकार्यं।द्वितीयेतुमातृत्वादित्वेनपार्वणमेवेति।कालादर्शादिमतेतुगया राम.
यांजीवत्पितृकस्यश्राद्धेनधिकारात्तीर्थगतस्यद्वितीयंश्राद्धंनास्ति।प्रसंगतस्यत्वायंनास्तीत्येतदधिकारउक्तः।गयाव्यतिरिक्त ६१

तीर्थेतुयथायोगंयजमानपत्नीत्वेनपितृपत्नीत्वेनवाएकोद्दिष्टमेवमातुःकार्यंनतुपार्वणंवचनाभावादितिविवेकः।एवंपितृ
व्यादीनामपियथायोगंगयायामन्यतीर्थेवाजीवत्पितृकेणयजमानभ्रातृत्वेनपितृभ्रातृत्वेनवाएकोद्दिष्टमेवमातुःकार्यंन
तुपार्वणंवचनाभावात्कार्या।पितृव्यत्वादिरूपेणतुश्राद्धंनास्त्येववचनाभावात्।कालादर्शादिमतेतुपितृभ्रातृत्वादिनापिनास्ति
जीवत्पितृकस्यगयाश्राद्धेस्वतोऽधिकाराभावात्।नन्वेवमुपाधिभेदमात्रेणपुनःपुनःश्राद्धकरणेपित्रादेरेवाचार्यत्वादौसति
दुपाधिनापिपुनःश्राद्धप्रसंगः।उच्यते।पितृपितामहएवपितादद्यादित्यंप्रसंगेनोक्तत्वेमेवमादिवचनान्यथानुपपत्त्योपाधिभेदेनपु
नःपुनःश्राद्धंनदोषाय।आचार्यादिश्राद्धेषुशास्त्रंतुपित्राद्यतिरिक्ताचार्यादिविषयमधिकृत्यप्रवृत्तमितितथानपुनःश्राद्धंप्रयोज
यति।किंच।प्रत्यासन्नासाधारणपितृत्वादिरूपोपाधिप्रयुक्तेप्रथमश्राद्धेकृतेऽप्रत्यासन्नसाधारणाचार्यत्वादिप्रयुक्तपुनः
श्राद्धासंभवः।निमित्तनिमित्तत्वप्रयुक्तोद्देश्यत्वेनयज्ञदत्तप्रयुक्तोपाधिप्रयुक्तासंभवात्।उपाध्युक्तवचनस्यैवपत्रुरंतरेश्राचार्या
दि[illegible]श्राद्धवचनस्यकेवलाचार्यान्तरेचरितार्थत्वेऽपिस्फलंबहुना।एवंजीवत्पितृकोऽपिपितृदेवत्यामप्येवतीर्थश्राद्धंकुर्या
दितिसिद्धं।यदातुमृतपितृकोऽपिजीवन्मातृकस्तुदामातृपार्वणलोपएवकिंतुसर्वंवदितियेयोग्यंकार्यं।तदुक्तं।पितृवर्गे
मातृवर्गेतथामातामहस्यच।जीवेचेद्यदिवर्गाद्यस्तंवर्गंतुपरित्यजेत्।अत्रपितृवर्गइत्येतदमातामहादिविषयंतीर्थेवद

त्रि॰ सी॰ ६१
नाज्जीवत्पितृकस्यापि पित्रादिपार्वणाभावोक्तत्वात् । एवं मातृवर्गेपि । एवं यस्य यस्याभावस्तत्र तदूर्ध्वतनाः । श्राद्धे पिंडदानेष्ट
थ कष्टं यत्कृतं तासां मातृवर्गे पिंडो देयः । यदाह देवलः । अतः पिंडमुपादाय संस्कृतासंस्कृतस्य च । ज्ञातिवर्गस्य कृत्स्नस्य साम्प्र
मिति निर्वपेत् । इतीति वक्ष्यमाणमंत्रेण । स च मंत्रः । पितृवंशे मृता ये च मातृवंशे च ये मृताः । गुरुश्वशुरबंधूनां ये चान्ये बांध
वा मृताः । ये मे कुले लुप्तपिंडाः पुत्रदारविवर्जिताः । क्रियालोपगता ये च जात्यंधाः पंगवस्तथा । विरूपा आमगर्भाश्च ज्ञाता
ज्ञाताः कुले मम । तेभ्यः पिंडो मया दत्तो ह्यक्षय्यमुपतिष्ठतामिति । अत्र श्लोकत्रयस्याप्येकमंत्रत्वात् । तावतैव वाक्यपर्यवसाना
त् । तेष्वेव द्वे इति मुनिनैकमंत्रस्यार्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यादित्युक्तत्वात् । पिंडमुपादायेति देवलोक्त
चैकवचनाच्च । तथा । अत्र स्तोत्रे पितृवंशजाता मातुलश्च वंशभवाश्च मदीयाः । कुलद्वये ये मम दासभूता भृत्यास्तथैवा
श्रितसेवकाश्च । मित्राणि सख्यः पशवश्च वृक्षा दृष्टाश्चादृष्टाश्च कृतोपकाराः । जन्मांतरे ये मम संगताश्च तेभ्यः स्वधा पिंडम
हं ददामि इति श्लोकाभ्यां पिंडांतरं देयं । अत्रापि पूर्ववदेकमंत्रता । एवं पिंडदानं कृत्वा ब्राह्मणाननुज्ञाप्य तं श्राद्धं सदस्यस्
त्रोक्तविधिना समापयेत् । यस्तु एतावंतं श्राद्धं कर्तुं न प्रभुस्तेनैकं च पिंडदानं कर्तुमशक्तौ रोगादिना तावतः कालस्य वा राम॰ ६१
भावे स संकल्पश्राद्धं कुर्यात् । तच्चैवं । अद्याहं संकल्पश्राद्धमहं करिष्य इति संकल्प्य । पिता पितामहश्चैव तथैव प्रपितामह

हः । माता पितामही चैव तथैव प्रपितामही । मातामहस्तत्पिता च प्रमातामहकादयः । तेभ्यः पिंडो मया दत्तो ह्यक्षय्यमुपतिष्ठता
मिति मंत्रेणैकं पिंडं दद्यादिति ॥ ॥ इति तीर्थश्राद्धे संप्रदाननिर्णयः ॥ ॥ इति श्रीमद्रामेश्वरसूरिसूनुनारायणभट्टविरचि
ते त्रिस्थलीसेतौ सामान्यप्रघट्टके तीर्थश्राद्धप्रकरणं ॥ ॥ अथ तीर्थेऽस्थिप्रक्षेपविधिः । तत्र तीर्थमात्रेऽस्थिक्षेपे विधिः प्र
वीकफलमुक्तं ब्रह्मांडपुराणे । स्नात्वा ततः पंचगव्येन सिक्त्वा हिरण्यमध्वाज्यतिलैर्नयोज्य । ततस्तु मृत्पिंडपुटे निधाय पश्ये
द्दिशं प्रेतगणोपगूढां । नमोस्तु धर्माय वदन्प्रविश्य जलं स मे प्रीत इति क्षिपेच्च । स्नात्वा तथोत्तीर्य दिवाकरं च दृष्ट्वा प्र
दद्याद्दक्षिणां तु । एवं कृते प्रेतपुरस्थितस्य स्वर्गे गतिः स्यात्तु महेंद्रतुल्या । पंचगव्यं पंचगव्यं । अत्र यद्यपि विशेषतः स्वर्गप्रा
प्तिरुक्ता तथापि तीर्थमात्रे तथापि तत्र वेजास्तं तेषां । गंगायां तु विशेषः । ब्रह्मांडे । अस्थीनि कालेन नरामस्थि गंगायां क्षिप्यते नरैः
तेकालमादितः कृत्वा स्वर्गलोके भवेत्स्थितिः । अस्थीन्यपराणि वर्षेरतुक्तेः कल्पांतरे एवावधिर्मेभ्यत्वात् । तथा ब्रह्मलोकप्राप्तिरपि
स्मृता समः । गंगातोये तु यस्यास्थि क्षिप्यते शुभकर्मणः । न तस्य पुनरावृत्तिर्ब्रह्मलोकात्सनातनात् । तथा । यावदस्थि मनु
ष्याणां गंगातोयेषु तिष्ठति । तावद्वर्षसहस्राणि ब्रह्मलोके महीयते । इत्यादि । ब्रह्मलोकप्राप्तिः प्रयागादिस्थले विशेषाद्ध
या । सामान्यतः स्वर्गावाप्तेरुक्तत्वात् । तत्र काले विशेषः । अत्र संपाते नरो मुक्ते तपामासे मलिम्लुचे । गंगायां यामस्थि निःक्षिपेन्न कुर्या

त्रि·स्थ· दितिगोतमतत्पा। अस्थिदेपं गयाश्राद्धं श्राद्धं चापरपक्षिकं। प्रथमे ब्दे न कुर्वीत यदि तस्मात्सपिंडनं। कृते पितृसपिंडने इति कृपि
६३ ताठः। तथा। अस्थिदेपं गयाश्राद्धं श्राद्धं चापरपक्षिकं। प्रथमे ब्दे पि कुर्वीत कृते तयस्योर्ध्वदेहिकं। पदिस्या इक्तिमात्सु त इति
चतुर्थपादं केचित्पठंति। दशाहाभ्यंतरे तु न दोषः। दशाहाभ्यंतरे यस्य गंगातोये स्थि मज्जति। गंगायां मरणं यादृक् तादृक् तस्य फ
लमवाप्नुयादिति वचनात्। तथा व्यापि विशेषः पुरस्त्रे।। मातुः कुलं पितृकुलं वर्ज्जयित्वा नराधमः। अस्थीन्यन्यकुलोत्थानि
नीत्वा चांद्रायणं चरेत्। इदं च द्रव्यादिलोभविषयं। तथा। अस्थीनि मातापितृवंशजानि नयंति गंगामपि ये कदाचित्। सद्ध
भवतस्यापि दयाभिभूतास्तेषां च तीर्थानि फलप्रदानि।। ।।अथ प्रकारः। शौनकोहं प्रवक्ष्यामि अस्थिशुद्धिविधिं क्रमात्। प्रथमा
दहितस्तेन गत्वा स्नानं कुर्यात्सचैलकं। प्रोक्षयेत्पंचगव्येन तत्र मंत्रैर्विचक्षणः। यत्रास्थीनि निरवाप्तानि संतितानि अभिमंत्र्य हृदि
सर्वः। तत्र मंत्रैः। आप्यायस्वेत्यादि प्रकाशकैः पंचगव्यं मंत्रैः। उपसर्प्यादिभिर्मंत्रैः प्रार्थनं खननं तथा। मंत्रिको हरणं
चासां यहरां चयथाक्रमं। उपसर्पेच तस्त राणि शंखः पितरस्त्रिष्टुप्। प्रथमायामृक्प्रार्थने द्वितीयायाः खनने। तृतीयायामृक्त्रिको
द्धरणे। चतुर्थ्यामस्थिग्रहणे विनियोगः। एवमस्थीनि गृहीत्वा ततो जलाशयं गत्वा स्नानं कुर्याद्यथाविधिः। अस्थिशुद्धिं राम·
तःकुर्याद्दतोन्विंद्रेति मंत्रेति मंत्रतः। स्पृष्ट्वा स्पृष्ट्वा ततः स्नानं पंचगव्येन मुद्यति। दशस्नानानि कुर्वीत तत्र मंत्रैर्विचक्षणः। गो ६३

मूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकं। भस्ममृत्तत्त्वबादीनि मंत्रस्नानानि वै दश। कुशैः संमार्जयेदस्थीन्यतो देवेति मंत्रतः।
एतोन्विंद्रं स्तवामेति नतमहइति तत्पावमानी सूक्तं चरुं द्रस्तं कं यथाक्रमः। एतत्सूक्तं पठेद्विद्वानस्थिशुद्धिर्भवति नान्यथा। हेमश्राद्धं
ततः कुर्यात्पितृशुद्धिस्थलतः। पिंडदानं प्रकुर्वीत ततस्तु तिलतर्पणं। अस्थीनि केवलादर्भा गोकेशाः शाणमेव च। आस्तीर्य पत्रं
उपत्रे सप्तधा वेष्टनं स्मृतो। कपित्थगोकेशाश्मंत्रे पत्रकं। गायत्र्या चैव तत्सूत्रं वेष्टनं समकमिति पाठः। हेमं च मौक्तिकं रू
प्यं प्रवालं नीलकं तथा। तिः क्षिपेदस्थिमध्ये तु शुद्धिर्भवति नान्यथा। ततो होमं प्रकुर्वीत तिलाज्येन विचक्षणः। उदीरतेति सू
क्तेन कृन्नेद्दस्तोत्रं शतं ततो। ततस्तु तीर्थं स्पृश्य दोषा न विद्यते। मूत्रं पुरीषं च मनं कुर्यात्रातुं गामार्गस्थितो अस्थीनि धारय
न्। काशीखंडे। धर्मजपो पिधर्मात्मा मातृभक्तिपरायणः। आदायास्थीन्यथा मातुर्गंगामार्गस्थितोभवत्। पंचगव्येन संस्ना
प्य ततः पंचामृतेन वै। यक्षकर्दमलेपेन लिप्त्वा पुष्पैः प्रपूज्य च। स्थाने वस्त्रेण ततः पट्टांबरेण च। ततः सुरसपत्रेणा
ततिमं जिष्टवाससा। सुरसपत्रं चीनांशुकं नेपालकं वले नाप्य मृदा चाप्य थपुरूपा। ताम्रसंपुटके कृत्वा मातुरंगा
न्प्रहो वसिकाः। अस्पृष्टहीनजातिः समुद्धिम्नान्कुर्याच्छ्लेशयः। व्यासः। पट्टवस्त्रं च कौशेयं मौंजि स्वेत वस्त्रकं। कंबलं शा
राप होव अजिनं च तयोः त्रिशंरतेषां चवेष्टनं साधनानां च कुमाराणां च विकल्पः।। ।।अथास्थिप्रयोगपद्धतिः।।। यत्रास्थीनि

त्रि.स्था. ६४ विनिखातानि संति तन्मत्र गत्वा सचैलं स्नात्वा खनित्रेण भूमिं आप्यायस्वेति पयसा दधिक्राव्ण इति द भ्रागावश्मा गोमूत्रे
रा। गंधद्वारामिति गोमयेन। घृतं मिमिक्ष इति घृतेन प्रोक्ष्य। तत उपसर्पंति वनस्पतांशेरवः पितरस्त्रिद्रुषा श्राद्धा प्रथम आर्य
ने द्वितीयायाः खनने। तृतीयाया मृत्तिकोद्धरणे। चतुर्थ्याश्च खिद्र्यश्रो वितिपांगः इमुक्ताः एताभिः क्रमेणा एना निकृत्त जला
शये ऽस्थिसंहितः स्नात्वा पंचगव्येनास्थीन्येतोन्विद्रमिति सूक्तेन प्रक्षाल्य शुद्धोदकेन स्नापयेत्। ततः सास्थिदेश स्नामानि कुर्या
त्वास्थीन्येतोन्विद्रमिति सूक्तेन प्रक्षाल्य। गायत्र्या गोमूत्रेण। गंधद्वारामिति गोमयेन। आप्यायस्वेति पयसा। दधिक्राव्णा
ति दध्ना। घृतं मिमिक्ष इति घृतेन। आपोहिष्ठेति कुशोदकेन। मा वस्तोक इति भस्मना। वलिस्यापर्णमाना मित्रादित्यस्यपारि
शिष्टाक्रमं चैरथ्यकां तेरथ्य कांतइत्यादिभिर्वा मृदा। मधुवाते ति मधुना। आपोहिष्ठेति शुद्धोदकेन। एवं दश स्नानानि विधा
य कुशैरस्थ्नां मार्जनं कुर्यादिसि मंत्रैः। एतोन्विंद्रमिति सूक्तं। शुचीवो हव्येति सूक्तं। नतमंह इति सूक्तं। इति वा इति से मन इति
सूक्तं। पदंति यञ्चहृरकइमाया पावमान्यः। कया चेति वर्ग इति रुक्। रुद्रसूक्तं। ततो हिरण्यपत्राद्युक्तसपिंडी करणास्थविरे पत्संत्र
कृतसपिंडीकरणास्ये कोद्दिष्टं कुर्यात्। इदं च पद्धीयात्र्यस्थी नितर्दे वत्रेश्राद्धं। तदनंतरं तथैव सक्तुपिंडान्दत्वा तथैव तिलतर्प्य
रा वकृत्वा यन्तुकई मादिना लिस्या पुष्पैः पृष्टस्य ऋजिनादिभिः प्रवीकोपकृत्त्वे नष्टयमध्ये केन चित्सहते वेष्टयित्वा सवर्णमो राम. ६४

कि कार्याप्रवा लनील मणी न्वितं दृष्ट्वा हि पत्ता ततउ दीरतामिति सूक्तेनाष्टोत्तरं शतं तिलांजुलं कृत्वा उदीरतां संतुः पितरस्त्रिकुश
तं तत्र स्नात्वा संपुटस्थीनि निधाय कृतनोऽप्रत्पर्पतितां दस्य शेः मुदिस्तार्थं गच्छेत्। ततस्तीर्थे सास्थिरानात्वापत्तोशपवपुटे स्नापयित्वा
अमुकगोत्रस्यामुकशर्मणोऽमुकपुत्रस्य द्व्यत्निकब्रह्मलोकावाप्तयेऽमुकतीर्थेऽस्थिप्रक्षेपमहं करिष्य इति संकल्प्यास्थीनि पंचगव्ये
न प्रक्षाल्य हिरण्यशकलमधु घृततिल मिश्रितानि कृत्वा मृत्पिंडे निधाय दक्षिणां दिशं दृष्ट्वा नाभिमात्रे जले स्थित्वा नमोऽस्तु धर्म
राजाय समे हं कृतिष्य इति संकल्प्यास्थीनि पंचगव्येन प्रक्षाल्य हिरण्यशकलपीतोस्त्रितिमे तेरथ तीर्थं प्रक्षिप्य स्नात्वा जलाद्रुहि निरागम
स्तर्ये दृष्ट्वा नत्वा चरहरिं स्मृत्वा मुकगोत्रस्यामुकशर्मणो ब्रह्मलोकावाप्तये कृतस्यास्थि प्रक्षेपस्य सांगतापमेदं रत्नतं च इदेवपुसं त्रा
स्तरागाप संप्रददे इति पित्र कृत्यास्नानांतरं जन्मनः पयासक्तिद्यात्। इदं च सर्वं दक्षिणा च जी म प्रसं व्या। एतच्च तीर्थमात्रे कार्यं। गंगायां ति
शेषतः प्रवोहा ह तद्वचनेभ्यः। तत्रापि प्रयागे विशेष इति शिष्टाः। एवं कृते फलं प्रागेवोक्तं। अत्रैतत्कृत्वा सर्वतीर्थविधिः कार्य इ
तिदिवोदासादयः। अपरे तु लिंग्यानि क्रसंयोगविरोधापत्या स्थिक्षेपस्य तीर्थकृत्स्नांतःपाताभावाच्छ्राद्धादौ चविलंबनिषेधाद
नामंते निवेश इति न्यायात्प्रसानादितीर्थकृत्यं निर्वर्त्यानंतरमस्थिप्रक्षेपः कार्य इति मेनिरे न्याय्यमपि दस्तः। अस्थिप्रक्षेपनत्य
फलोद्देशेन तीर्थंगति वा दोस एव कार्यः। उद्देश्यकृतश्राद्धादि विलंबस्य तत्काले स्थिरात्म्य उज्ञानत्वात्। तीर्थकृत्यस्यानां तरीयकत्वे

त्रि.सा.
६५

द्दश्येके... विलंबकारित्वाद्योगात् ॥ अत एव तीर्थनिमित्तकं सविधिः स्नानमपि यस्माद्देवायस्क तीर्थकालो देशो न गच्छन्ननुपंगद
स्तीनिनयतिसंसकलतीर्थकृत्यानंतरं तन्निक्षिपेदित्याहुः ॥ एवं सत्यनवशिष्टा एव प्रमाणं ॥ ॥ इति श्रीतीर्थसेतौ सामान्यप्रपंचको
स्थिते देवपरा विधिः ॥ ॥ अथ प्रकीर्णकास्तीर्थधर्माः ॥ ॥ देवलः ॥ अर्पणं पितृदेवानां श्राद्धदानं सदक्षिणं ॥ तीर्थे च गोदानं नियतः प्राक्तीर्थ
विधिः ॥ विशिष्टत्वात् लिंगे पुष्पदानं विधीयते ॥ स्नाने विलेपने भक्तो देवतानां समाचरेत् ॥ बलराणां तोभ्यमितानंदेवप्रजाकरायवः ॥
सर्वत्र देवयात्रायां विधिरेष प्रवर्तते ॥ तथा देवानां दर्शनं पुरस्पंदर्शनात्स्पर्शनं वरं स्पर्शनादर्चनं श्रेष्ठं तत्स्नानं च ततः परं ॥ अष्ट
कृत्वा मंत्रजपैः स्तुपञ्चतत्सुगंधिभिः ॥ गांगेगाजलैः स्नानं श्रेष्ठं तत्स्नानं समे बुधाः ॥ स्नानयहरणाय चाम्बलोपलरूपेणार्पणेन चनतं देव
विधिह्यानि गंधपुष्पादीनि यात्यानि ॥ भारते तु विशेषः ॥ अर्घं द्रव्यविशेषेण गंगातोयेन यः स्वदत्तामागधप्रस्नात्माकेणात्मप्रपात्र
स्थितेन च ॥ भानवेऽर्घं प्रदद्यात्तु स्वकापवित्रऋषिः सह ॥ पुत्रपौत्रैश्च संयुक्तः स्वर्गलोके महीयते ॥ दीर्घिका स्थाणंगः ॥ स्कांदे ॥ आपः क्षीरं
कुशाग्राणि घृतं मधु गवां दधि ॥ रक्तानि करवीराणि रक्तचंदनमिश्रपित्र्यष्टांगोऽर्घोयमुद्दिष्टस्तीवरवितोपरागः ॥ प्रदक्षिणापि
तु विशेषः ॥ एकां चंड्यां रवेः सप्त तिस्रो दद्याद्विनायके ॥ चतस्रो विष्णवे देयाः शिवस्यार्द्धप्रदक्षिणं ॥ तथा ॥ शिवं प्रदक्षिणं कुर्वंसो
मसूत्रं न लंघयेत् ॥ सोमसूत्रादि परिमाणं विश्वेश्वराद्देशे यात्रावेव काशीप्रकरणे वक्ष्यामः ॥ नमस्कारेपि विशेषः ॥ अष्टेपटभवाम राम.
६५

भागे समीपे जगर्भे मंदिरे ॥ जपहोमनमस्कारान्न कुर्याद्देवतालये ॥ अष्टेमस्तु सकामो तिष्ठेत्तपश्चयस्तु जः ॥ वाममागे भवेन्नारो दक्षि
णा सर्वकामदः ॥ शिवे त्वग्रे पि कार्यः ॥ पद्मेशः पक्षपुष्पते रेखर्दडवस्सति तेनुक्षिपतेति पातकाः सहैनो क्षिष्ठे तिस्तदा सेति ॥ अन्यच्चे
वीपुराणे ॥ देवमात्मा पन यन्नंदे कामारसमन्हन्यास्नापनं सर्वदेवानां कोटिप्रदान फलं स्मृतं ॥ समूहने संमार्जनादि पतितस्योत्थापने
च ॥ तथा पाद्मे ॥ द्रव्यमंत्रं फलं तोयं शिवस्तंसस्पृष्टं त्वकवित् ॥ लेपयेद्वै वनिर्मात्यरूपे सर्वं विनिक्षिपेत् ॥ मत्स्यका पादमात्रं यः शिवस्व
त्ता ५ मुपजीवति लोभात्मा हीयच्चेत कल्पांते नरके नरः ॥ ब्राह्मे तु ॥ बलांगलयं विप्रेभ्यो वै स्व वैचवृपापयेत् ॥ रुद्रांगलयमेपो तु दद्देत्सर्वं पु
त्रकरणात् ॥ विप्रेभ्यस्तत्र च नैवेद्यं मात्रभ्योपं विवेदितं ॥ चाण्डवेभ्यस्तु नैवेद्यं गणेशादि निवेदितं ॥ विष्णोर्ब्राह्मणोत्पवादं वसामः ॥ तीर्थप्रति
ग्रहादिनिवृत्तिश्च कार्या ॥ पाद्मे ॥ जीवनार्थं हतं तीर्थं जीवनार्थं हतं व्रतं ॥ अस सतावत पावाणीतव्यापेमुन्पवा दिनी ॥ न तीर्थप्रतिग
ह्मीयात् ब्राह्मणो कंठगतैरपि ॥ अपि कामातुरेणांतु रेकारं कृतुमातरं ॥ तीर्थे प्रतिग्रहो यस्तं तीर्थविक्रय एव सः ॥ विक्रीतायां तु गंगायां
विक्रीतस्याज्जनार्दनः ॥ जनार्दने च विक्रीते विक्रीतं भुवनत्रयमिति ॥ यस्तु लोभाद्द्विजः कश्चिन् प्रतिग्रहरुचिर्भवेत् ॥ नैव तस्य परो लोको
दुरात्मनः ॥ महादानानि ये विप्रा गृह्णंति ज्ञानदुर्बलाः ॥ दुतासेद्विजरूपेण यातेव्रजलरक्षसाः ॥ न वेददुलमाधित्य प्रतिग्रहरुचि
र्भवेत् ॥ अस्ता नाव प्रमादादत्ते कर्मनेनरता ॥ क्षितो वे न्पनेद्दारि न कुर्याद्देवविक्रयं हत्वा गावपरं मासं मन्रूपीतद्विजाधमः ॥ अ

त्रि.स. यथैव तु तिष्ठत्यहल्या निष्कासितो दृष्टिकर्षितः । दशो शमर्जितं द्वयोरेवं तत्र प्रदीपेनोक्तो मे प्रतिग्रहीयादित्यत्र तत्तीर्थे न गृह्णीयात्पुण्ये
६६ स्थाप्यमाने पुत्रादिभिः त्रेषु वसेद्धेषु अप्रपन्नो द्विजो भवेत् । मात्स्येपीदं वचनद्वयं पठितं । अत्र या च प्रतिग्रहीतं धनमुपभुङ्क्ते तीर्थे सम
तत्प्रतिग्रहस्य पुंसो यावत्तीर्थोपार्जितधनेस्तत्तावत्तु तेन तस्य तीर्थदानादिषु कोटिगुणत्वादि तत्फलं न जनयति । तद्धनस्यापि तु
स्य फलं जनयत्येवेति कल्पतरौ । इदमपि प्रमुनिर्बोधादिना ऽकामकृते । कामकृते तु तीर्थादिकपापे च फलमिति कश्चित् । पाद्मे स्व
ष्टिखण्डे । यदन्यत्र कृतं पापं तीर्थे तद्याति लाघवं । न तीर्थकृतमन्यत्र क्वचित्पापं व्यपोहति । भारते । कामं क्रोधं च लोभं च यो जित्वा तीर्थ
मावसेत् । न तेन किंचिदप्राप्तं तीर्थाभिगमनाद्भवेत् । पाद्मे उत्तरखण्डे । न तीर्थपातकं कुर्यात् ... तीर्थपत्नीवन तीर्थप्रतिग्रहस्तद्य
स्य तथा धर्मस्य विक्रयः । दुर्जरं पातकं तीर्थे दुर्जरश्च प्रतिग्रहः । तीर्थे तु दुर्जरं सर्वं नरकं याति तद्विधः । गारुडे । सन्यासिनं तीर्थगतं रक्ष
ति वनदेवताः । मत्स्यात्तत्राविशेषेण त्वनयाम्योस्तस्यवार्त्तिकाः । सेविते पि सदा तीर्थे अन्यत्र स्त्रियते यदि । पुण्ये देशे कुले धीमान्स भवेद्वे
द विद्विजः । मदे तु यत्कृतं पापं तीर्थस्नानैर्विमुच्यति । तत्र दानातिदत्तायाश्च कृपानिसदा खगः । कुरुते तत्र पापं चेद्वज्रलेपसमं हि
तत् । क्लिश्येत्स नात्र संदेहो यावच्चन्द्रार्कतारकं । तथा न काष्ठे विद्यते देवो न शिलापां कदाचन । भावे हि विद्यते देवस्तस्माद्भावं समा
श्रयेत् । नारदीये । पुराणं हि चाभिगमनं पुरापतीर्थनिषेवणे । पत्नीनां विविधोपन्यस्तक्रावारं नरदृतिः । देवलः । नदी पुनदी प्रापपर्वते राम. ६६

पुत्रपर्वते । न्यान्यत्र शेशे तत्रस्य तीर्थस्नायतने पुत्रोतया । तत्र स्नाने पुत्र तीर्थं नदी पुण्यमया च या । तो ध्याये न्यनसा वाविश्रन्ये त्वेछादि
दिन्ने । इदं स्नानविषयं । इदं द्वयमपि गंगातिरिक्तविषयं । यच्चोक्तं । स्कान्दे । स्नानकाले न्यतीर्थेषु जप्यते जाह्नवी जनैः । विना विष्णु
पदीं कान्यत्समर्थमघशोधने । ब्राह्मे पि । अन्यतीर्थेषु गंगायाः स्मरणं कार्यं जनैः । तस्माद्गंगासमं तीर्थं न दिव्ब्रह्माण्डगोलक इ
ति । कृतं च तीर्थयात्रादिविस्वावर्ष्यरीचं । तदुक्तं । ब्राह्मे पानिपानि च तीर्थानि दानव्रततपांसि च । तानि सर्वाणि सिध्यंति विशेषापा
दार्पणेन वै । तार्पयंति हरौ लोके पुराणानि विविधानि च । तादिफलानि भयं तीर्थस्य मएवफलं भवेत् । देवलः । अरण्यं देवतास्थानं तीर्था
न्यापतनानि च । तस्मात्तेषु वसन्तो कान्यालिनाकं दिवौकसां । तथा । श्रौतस्मार्तक्रियाः कर्तुं यो न शक्नोति मानवः । तेन तीर्थानि सेव्या
नि व्रतानि च तपांसि वा । प्रायश्चित्तस्तत्साध्यारण्ये न तीर्थदिने त्र्यं वासः । तीर्थमपि गम्यत्रतो यवासनियमपुक्ते स्त्रहं मवगाहमा
नश्चिरात्रमुषित्वा सर्वपापेभ्यो मुच्यत इति देवलवचनात् । यत्र चाधिकता विशेषतउक्तावापिग्राह्या । परमार्गगाभिनोत्तरोसरस्व
तीव्यतिरिक्ता नदी पत्नतितदा परपारे स्नानादिकार्यं । सरस्वत्याः स्पर्शो क्रीरे । तदुक्तं । मार्गेण तरानदी प्राप्तो स्नानादि परपारपारतः । अ
र्वागेव सरस्वत्याः एषमार्गगतो विधिः । यन्तु पितृन्तर्पयितृन्तर्पयित्वा तु नदीस्तरति यो नरः । तस्यास्तत्कानकामास्तेभवंतिभृत्या
दुःखितास्तदिति नंतस्तरस्वतीविषयं । तासामपि वहूनां सत्वाबहुवचनोपपत्तेः । अथ द्वारतरणीमतिलंघ्यगमनं । तेनमार्गे पतितापाम

त्रि.से. ६७ पिघांस्नानतर्पणापकरणानगच्छेदित्यर्थः। अत एव संग्रहे। नस्रवंतीमतिक्रामेदनवसिच्येत्यतिक्रमनिषेधमाह। अनवसिच्य तर्पण
मकृत्वा। अत्र वचनद्वये पितृतर्पणस्नानस्याप्युपलक्षणं। तर्पणस्य तदनंतरंभावित्वात्। प्रसिद्धनद्यां मार्गपतितायां श्राद्धमपि
कार्यमस्नानस्यापत्तावा। इदं च नदीषु परपारे स्नानमर्याकी रेविशिष्टतीर्थाभावे ज्ञेयं। तत्स्नानवेलवीगे वस्त्रादि। नदवगणानापंचे
षापते। सरस्तु स्नांतु परपारे तीर्थविशेषस्तत्रैव वीक्षोरे दत्वा परपारेपि कार्यमिति विवेकः। अथ प्रतिग्रहादिप्रतिषेधार्थं तीर्थमार्ग
दिकथ्यते। तत्र ब्रह्मपुराणे। प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयं। तत्र नारायणस्वामी नान्यस्वामी कदाचन। तत्र न प्रतिग्रहः का
र्यः प्राणैः कंठगतैरपि। अत्र प्रवाहमिति जलावध्युपलक्षणं तेन प्रवाहे तडागवाप्यादिरूपे पि तीर्थे सर्वत्रैव जलपर्यवधीकृत्य
हस्तचतुष्टयाभ्यंतरे इति निषेधः। दानधर्मे। भाद्रस्य तु कृष्णचतुर्दश्यां कदाचिद्दृष्टिभावेन जलवृद्ध्यभावेपि किंचिद्दृष्ट्यभावद्वृद्धौ व
लक्षणं हि पुरोडाशादिनित्याय नद्यादिशेषउपलक्षते। तीरावधिमाह ब्रह्मपुराणे। सार्द्धहस्तशतं यावद्गर्भं तत्तीरमुच्यते। स्कांदे। ती
रात्तु क्रतिमात्रं तु परितः क्षेत्रमुच्यते। अत्र दानं जपो होमो गंगायां नात्र संशयः। नटद्वये प्रक्षेत्रं कोशद्वयात्स्यग अतिमात्रं
दे चा। अत एवोक्तं भविष्ये। गंगासीमां न लंघयेदिति। अत्र गर्भे प्रतिग्रहनिषेधः। प्रसिद्धनद्यां तु प्रसिद्धतर सर्वपापान्पोषतः। दिक्षा
दशपलाय्यंते सिंहे दष्ट्राय या मृगाः। एकयोजनविस्तीर्णा क्षेत्रसीमा तटद्वयमिति। अत्र गर्भे प्रतिग्रहनिषेधः प्रसिद्धनारंगडकादि राम. ६७

नदीषु तूभयतः सार्द्धहस्तशतमितेतीरेपि निषेध इति शिष्टाः। देवे तु निषेधो गंगाविषयस्तत्रैव कृत्स्नकथनात्। यत्तु
ब्रह्मपुराणे। पंचगंगा महाराज यां मुक्त्वा तपोवने। सिद्धिक्षेत्रं तु तज्ज्ञेयं समंतात्तु त्रियोजनं। एकैकस्मिन्नर्धसार्द्धयोजन
मिति समंतात्त्रियोजनमित्यर्थ इति तन्नरोऽनिधाय्यर्थं न तु प्रतिग्रहप्रतिषेधार्थं यत्तु समंतात्सार्द्धयोजनमिति पाठस्तदा
स्कांदे न तुल्यार्थं तेवान्यलिंगाघर्थं तेविशेषः। नारदीये। यः स्वदेशान्निर्गतं लिंगं विष्णुं वा प्रणमेन्नरः। न तस्य निष्कृतिर्दृ
ष्टा प्रायश्चित्तायुतैरपि। तथैव चन्द्रसंस्पृष्टं लिंगं वा हरिमेव वा। स सर्वयातनाभोगी यावदावेंद्रनारकं। पाखंडप्रतिष्ठितं लिंगं
नत्वा पाखंडतां व्रजेत्। आभीरशूद्रैः स्थापितं लिंगं नत्वा नरकमश्नुते। येऽपि विप्रैः स्थापितं लिंगं विष्णुं वापि नमेत्कुधीः। स कोटिकुलसं
युक्तो याति रौरवं सदा। एतत्सर्वमिदानींतनप्रतिष्ठितलिंगादिविषयं न तु पुराणप्रसिद्धमहिमविषयं। यदा प्रतिष्ठि
तलिंगं मंत्रवद्विधिपूर्वकं विधि। तदा प्रभृति तद्द्रव्यं योपि द्वापि न संस्पृशेत्। इति नैवोक्तत्वात्। अत एव स्कांदे काशीलिंगा
नि प्रकृत्योक्तं। अदृष्टान्यपि दृष्टानि दुर्लभान्यपि प्रियाणि भद्रान्यपि च काले न तानि रत्नानि सुंदरीति। दुर्लभानि सृष्ट
ष्टानि। तथान्योपि विशेषस्तत्रैव। स्त्रीणामनुपनीतानां शूद्राणां च वनेचरे। स्वापदेनाधिकारोस्ति विष्णोर्वा शंकरस्य वा। यः
शूद्रसंस्पृष्टं लिंगं विष्णुं वापि नमेन्नरः। इह वाऽमुत्र दुःखानि प्राप्नोत्यामुष्मिके। किमुऽन्यदेशानुपनीतो वास्त्रियो वा पतितोपि वा।

त्रि.स्था. ६८ केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते इत्यादि। अन्येषामपि विशेषः महातीर्थगमनमुपवासव्रतानि च। संवत्सरं न कुर्वी
त महागुरुनिपातने तथा। तीर्थस्नानं महादानं नेपराजं तिलतर्पणं। आब्दमेकं न कुर्वीत महागुरुनिपातने। वपनं मैथुनं
तीर्थं वर्जयेद्दुर्दिशे पतिः। श्राद्धं च सप्तमान्मासादूर्ध्वं चान्यत्र वेदवित्। श्राद्धं श्राद्धभोजनं नीललक्षः। उपप्लवे शीतलभानुभा
न्वोरर्धोदये वा कपिलाख्यषष्ठ्यां। सुराप्सुरेपात्तमये पितृतीर्थयात्रादिषु संक्रमणेऽपि शस्तः। उपप्लवो ग्रहणं। गुरुशुक्रा
स्तमय उपलक्षणं। तेन निषिद्धकालांतरेऽपि ग्रहणे दोषो न दोष इत्यर्थः। अस्थिप्रक्षेपार्थयात्रायामाद्यवर्षेऽपि न दोष इत्या
हुः। तथा धर्मविद्वनौ। उपवासो व्रतं होमस्तीर्थस्नानजपादिकं। विप्रैः संपादितं यस्य संपन्नं तस्य तत्फलं। तथा। नारीकृ
तस्नानाश्रोकं होरं तीर्थनिवासिनां देशांतरगतानां च केशो रेनैमित्तिकविना तथा। अंतर्मध्ये गवां गोष्ठे तीर्थे स्थापित
कर्मसु। राहोर्दर्शनकाले च स्नातकं नैव विघ्नते। इदं शीघ्रमतत्र गमनसंभावनायां दानादिविषये द्रष्टव्यं। तथा। ग
हे दशगुणं दानं गोष्ठे शतगुणं भवेत्। पुण्यतीर्थेषु साहस्रमनंतं शिवसंनिधौ।। ।।अन्यच्च।। ।।ये पुनीर्थेषु ये
देवायेषु तीर्थेषु ये द्विजाः। यत्र तीर्थेषु यतो चं विधिकिलेनं त्रतत्रतु। एतेष्वपहतेष्वपि न दोष इत्याशयः। तथा। न देवः पर्यंताग्रे राम. ६८

त्रि.स्था. ६९ पुनर्देवो विष्णुस्तत्राति स्वामिचिदानंदमयो दिव्यभावेन दृश्यते। यत्र यत्र हृदा भक्तिर्यदा यस्य महात्मनः। तत्र तत्र स्य महादेवः प्रसा
दमपि गच्छति।। ।। इत्यादि बहुनालं।। ।।इति श्रीमद्विद्वन्मुकुटमाणिक्यश्रीमद्रामेश्वरसूरिसूनुनारायणभट्टविरचि
ते त्रिस्थलीसेतौ सामान्यप्रघट्टके प्रकीर्णकतीर्थधर्मप्रकरणं समाप्तं।। ।।समाप्तश्चायं प्रघट्टकः।। ।।इतः परं प्रया
गप्रकरणं भविष्यति।। ।।छ ।। संवत १७७५ समये वैशाखमासे कृष्णपक्षे तृतीयायां दिने लिख्यते।। ।।
लीखितं हरिनारायण कायस्थ काशिक्षेत्रमध्ये।। ।।शुभमस्तु।। ९ ९।। रामकृष्ण।। राम।। ९।। राम. ६९